ISSN : 2249-538X

# वाक्यार्थभारती

## नवशृङ्खला

वर्षम् २०२१-२२ अङ्कः १०

आज़ादी का अमृत महोत्सव

**प्रधानसम्पादकः**

आचार्यः सि.एस्.एस्. नरसिंहमूर्तिः

**सम्पादकाः**

डा. गणेश ईश्वर भट्टः डा. वेङ्कटरमण एस्. भट्टः

डा. नारायणवैद्यः डा. गोविन्द जि. हेगडे

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**राजीवगान्धीपरिसरः**

शृङ्गेरी-577139

ISSN : 2249-538X

# वाक्यार्थभारती

## नवशृङ्खला

वर्षम् २०२१–२२ अङ्कः १०

प्रधानसम्पादकः

आचार्यः सि.एस्.एस्. नरसिंहमूर्तिः

सम्पादकाः

डा. गणेश ईश्वर भट्टः डा. वेङ्कटरमण एस्. भट्टः

डा. नारायणवैद्यः डा. गोविन्द जि. हेगडे

केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः
शृङ्गेरी–577139

| | | |
|---|---|---|
| Title | : | Vākyārthabhāratī |
| Chief Editor | : | Prof. C.S.S. Narasimha Murthy |
| Editors | : | Dr. Ganesh Ishwar Bhat |
| | | Dr. Venkatramana S Bhat |
| | | Dr. Narayana Vaidya |
| | | Dr. Govinda G Hegde |

Publisher :

The Director
CENTRAL SANSKRIT UNIVERSITY
RAJIV GANDHI CAMPUS
SRINGERI-577 139 (Karnataka)
www.csu-sringeri.edu.in

| | | |
|---|---|---|
| E-Mail | : | director-sringeri@csu.co.in |
| Year | : | 2022 |
| ISSN | : | 2249-538X |
| Copies | : | 100 |
| Page & Design | : | K.V. Shashidhar |
| Printed at | : | SRI SIRI ENTERPRISES, Sringeri. |

© All the rights are reserved for Publisher. Provided that contributors are responsible for their respective articles.



प्रो. श्रीनिवास वरखेड़ी
कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्,
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

Prof. Shrinivasa Varakhedi
Vice-Chancellor
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)

आज़ादी का अमृत महोत्सव

## शुभसन्देशः

### विलसतु वाक्यार्थभारती.....

**"स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्"** इति श्रुतिः । अनया श्रुत्या प्रतीयते यत् स्वाध्यायः प्रवचनञ्च अध्ययनाध्यापनकर्मसु आत्मानं व्यापारयतां समेषामपि लोकानां परमं कर्तव्यमिति । **"शास्त्रं सुचिन्तितमथो परिचिन्तनीयम्"** इति सुभाषितोक्तदिशा शास्त्रेषु निहितानि गभीरतत्वानि सन्ततं चिन्तनेन अभ्यासेन तपसा च सिध्यतीति संविदते सर्वोऽपि विद्वत्समवायः । महता प्रयत्नेन गुरोः असीमानुकम्पया च यदि शास्त्राणि समधिगतानि भवन्ति तर्हि चतुर्षु पुरुषार्थेषु तुरीयः पुरुषार्थः ब्रह्मज्ञानरूपः मोक्षोऽपि समधिगतो भवतीति नास्ति संशयलेशः । तदनु शास्त्राध्ययनाध्यापनसंरक्षणपरिपोषणादिपरम्परासु सततं दत्तावधानः केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजीवगान्धी परिसरः जगति सर्वत्र प्रथितयशाः वरीवर्ति । उभयेषां जगद्गुरूणां **अनन्तश्रीविभषितानां श्री श्री भारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्री श्री विधुशेखरभारतीस्वामिनां, जगन्मातुः श्रीशारदाम्बायाश्च** सम्पूर्णानुग्रहेण पवित्रेऽस्मिन् शृङ्गगिरिक्षेत्रे प्रतिष्ठापिते परिसरे प्रतिवर्षमिव वर्षेऽस्मिन्नपि **"वाक्यार्थभारती"** इत्याख्यः ग्रन्थः प्रकाशयिष्यते इति वृत्तान्तं विज्ञाय मोमुदीति मे अन्तःकरणम् । श्री शारदाविशिष्टव्याख्यानमालायाः वाक्यार्थपरिषदश्च व्याख्यानसङ्ग्रहरूपं लेखनभूयिष्ठं ग्रन्थरत्नं छात्राणामुपकारकं बोभवीति इति नो महान् प्रत्ययः । सन्दर्भेऽस्मिन् प्रकाश्यमानेऽयं वाक्यार्थभारती चिरं जीयादित्याशासे ।

शुभकृत्-श्रावण-शुक्ल-प्रतिपत्

२९-०७-२०२२

विद्वज्जनविधेयः

(प्रो. श्रीनिवास वरखेडी )

कुलपतिः

प्रो. रणजित कुमार बर्मन
कुलसचिव (प्र.)
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान,
शिक्षा मन्त्रालय, भारत सरकार के अधीन)

Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)

॥ असतो मा सद्गमय.... ॥

केन्द्रीयसंस्कृतविश्वविद्यालयः सारस्वतप्रपञ्चे महत्तमः संस्कृतविश्वविद्यालयः । विश्वविद्यालयस्यास्य भारतदेशे विभिन्नेषु प्रदेशेषु परिसराः शास्त्राध्ययनाध्यापनादिना राराजन्ते । सत्स्वपि बहुषु परिसरेषु **शृङ्गेरीस्थ राजीवगान्धी परिसरः क्षेत्राधिष्ठितदेवतायाः शारदाम्बायाः असीमानुकम्पया, उभयेषां जगद्गुरूणां श्रीमत्परमहंसेत्यादि समस्त बिरुदावळी विराजमानानां श्रीमज्जगद्गुरु श्री श्री भारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्रीमज्जगद्गुरु श्री श्री विधुशेखरभारती महास्वामिनां** च परमानुग्रहेण च सर्वतोमुखं महीयते ।

असाधारणमहिम्नः अपौरुषेयस्य वेदस्य तात्पर्यनिर्णयाय परमकारुणिकाः महर्षयः स्वतपोमहिम्ना शास्त्राणि प्रणिनिन्युः । **"स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्"** इति श्रुत्यनुसारेण अध्ययनाध्यापनादिनैव रत्नसदृशानि शास्त्राणि सुरक्ष्यन्ते । शास्त्राणां, शास्त्रपरम्पराणां च संरक्षणे बद्धदीक्षः शृङ्गेरीस्थराजीवगान्धीपरिसरः छात्राणां अत्यन्तगभीरात्मकस्यापि शास्त्रीयविषयस्य बोधार्थं **"वाक्यार्थपरिषत्"** इति नाम्ना काञ्चित् परिषदं प्रचालयति । तत्र नानाशास्त्रेषु कृतभूरिपरिश्रमाः अप्रतिहतगतयः विद्वांसः परिसरीयाध्यापकाः छात्रानुद्दिश्य वाक्यार्थं विधास्यन्ति । तदनु अनया परिषदा सभायामुपस्थितान् सर्वान् विचारान् सङ्कलय्य **"वाक्यार्थभारती"** इति ग्रन्थः प्राकाश्यं नीयत इति नितरां प्रसीदामो वयम् । अनेन कर्मणा सर्वेऽपि विद्वांसः, परिसरस्य अध्यापकाः छात्राश्च नूनमुपकृताः भवन्तीति नो दृढीयान् विश्वासः। भगवत्याः शारदाम्बायाः कृपया जगद्गुरूणां परमानुग्रहेण च परिसरोऽयं समभिवर्धतां,छात्राः समेधन्तां, निदेशकप्रभृतयः परिसरसदस्याः राराज्यन्तामित्याशास्महे ।

शुभकृत्संवत्सरीयश्रावणशुक्लप्रतिपत्

२९-०७-२०२२

कुलसचिवः

R. K. Barman.

केन्द्रीयसंस्कृतविश्वविद्यालयः,नवदेहली

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakpuri, New Delhi - 110058 (INDIA)
**Ph. No.:** (O) 011-28520979, **EPABX** : 28524993, 28521994, 28524995
**EMAIL** : registrar@csu.co.in / pa2registrar@csu.co.in, **WEBSITE** : www.sanskrit.nic.in

आचार्यः सि.एस्. एस्. नरसिंहमूर्तिः
निदेशकः
केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः
शृङ्गेरी– 577 139

Prof. C.S.S. Narasimha Murthy
The Director
Central Sanskrit University
Rajiv Gandhi Campus
Sringeri - 577 139

## समेधतां वाणी

**ऋषयस्तपसा वेदानध्यैषन्त दिवानिशम् ।**
**अनादिनिधना विद्या वागुत्सृष्टा स्वयम्भुवा ॥**

(महा.भा.शा.प.अ१३२.श्लो.२४)

जगति विद्यमानेषु संस्कृतविश्वविद्यालयेषु नानापरिसरयुक्तः, नैकशास्त्रपरिपोषणरतः केन्द्रीयसंस्कृतविश्वविद्यालयः सर्वातिशायी वर्वर्ति । तत्रान्यतमत्वेन राराज्यते श्रृङ्गेरीस्थराजीवगान्धीपरिसरः । यतोऽयं नानाशास्त्रनदीष्णैः संयमीद्रैः पुम्भावसरस्वतीरूपैः जगद्गुरुभिः श्री श्री भारतीतीर्थमहास्वामिभिः समकल्पि समारम्भि च । अमीषामसीमानुकम्पया समेधमानो वरीवर्त्यम् । अत्र निदेशकाः अध्यापकाश्च समे शास्त्रेषु बद्धादराः अवृतन्, वर्तन्ते च । तेऽन्तेवासिनां तत्तच्छास्त्रेषु कौशलवर्धनाय नैकान् उपायान् समकल्पयन् । ते यथा – १. शारदाविशिष्टव्याख्यानमाला, २.वाक्यार्थपरिषत् , ३.वाग्वर्धिनी इति । तत्र प्रथमा-द्वितीययोः सङ्गोष्ठ्योः यानि दविष्ठादागत्य वरिष्ठैः कृतानि, तथैव परिसरीयैः आचार्यैश्च समुपदिष्टानि, तानि सर्वाणि व्याख्यानानि सङ्गृह्य “वाक्यार्थभारती” इति नाम्ना प्रकाश्यन्ते । तेनान्तेवासिनां महानुपकारो भवतीति वयं विश्वसिमः ।

अवसरेऽत्र कृतश्रमाणां डा.गणेश ईश्वरभट्ट-डा.वेङ्कटरमण एस भट्ट-डा.नारायणवैद्य-डा.गोविन्दहेगडे वर्याणां समेषां शारदाम्बा मङ्गलमातनोतु । एतादृशस्वाध्यायज्ञानयज्ञे सततं प्रोत्साहितवद्भ्यः **कुलपतिभ्यः प्रो.श्रीनिवासवरखेडीमहोदयेभ्यः, कुलसचिवेभ्यः प्रो.रञ्जितकुमारबर्मन्वर्येभ्यश्च** सादरं प्रणामान्निवेदयामः । शुभावसरेऽस्मिन् परमकरुणामूर्तीनां **जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्री श्री विधुशेखरभारती महास्वामिनाञ्च** अनुग्रहाशीर्भिः परिसरीयाणां सर्वेषां श्रेयांसि भूयासुरित्याशास्महे ।

इत्थं बुधजनविधेयः

प. नरसिंहमूर्तिः

Central Sanskrit University, Rajiv Gandhi Campus, Menase
Sringeri- 577139, Karnataka
Phone: 08265250258, email: director-sringeri@csu.co.in
www.csu-sringeri.edu.in

## प्रधानसम्पादकः



आचार्यः सि.एस्.एस्. नरसिंहमूर्तिः, निदेशकः

## सम्पादकाः



डा. गणेश ईश्वर भट्टः



डा. वेङ्कटरमण एस्. भट्टः



डा. नारायण वैद्यः



डा. गोविन्द हेगडे

# सम्पादकीयम्

**भारतीकरुणापात्रं भारतीपदभूषणम् ।**

**भारतीपदमारूढं भारतीतीर्थमाश्रये ॥**

**विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।**

**वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ॥**

अनिन्द्रियगम्यं मनोऽगोचरं सुखप्राप्तिदुःखनिवृत्त्योः साधनं भगवान् वेद एव उपदिशति । **इष्टप्राप्त्यनिष्टनिवृत्त्योः अलौकिकमुपायं यो ग्रन्थः वेदयति स वेद** इति सायणाचार्याः वेदशब्दस्य व्युत्पत्तिं दर्शयामासुः । किन्तु वेदार्थस्य निगूढत्वेन दुरधिगमत्वात् वेदार्थं स्फुटतया आविर्भावयितुं मुनयः शास्त्राणि प्रणिन्युः । आदौ सूत्रेषु बीजरूपेण भूत्वा शास्त्राणि पश्चात् भाष्यव्याख्यानोपव्याख्यानादिरूपेण विस्तरं प्रापुः । वेदस्यैव वस्तुगत्या शास्त्रपदाभिधेयत्वेऽपि आधुनिके काले जनाः वेदार्थनिर्णयोपकारिषु पौरुषेयेषु ग्रन्थेषु अपि शास्त्रपदं प्रयुञ्जते । वैदिकेषु दर्शनशास्त्रेषु द्वयी गतिः । कानिचित् वेदस्य प्रामाण्यम् अभ्युपेत्यापि तस्य अनुमानादिप्रमाणसिद्धार्थानुवादित्वं मन्वानाः तर्केणैव स्वसिद्धान्तं प्रातिष्ठिपन् । ते खलु तार्किका इति प्रसिद्धिं गताः न्यायवैशेषिकसाङ्ख्ययोगमतानुसारिणः । श्रौतमप्यर्थम् अनङ्गीकुर्वतां साङ्ख्यादीनां मतस्य उत्थापने हेतुं प्रदर्शयन्तः श्रीशङ्करभगवत्पादाः प्राहुः **दृष्टसाधर्म्येण चादृष्टमर्थं समर्पयन्ती युक्तिरनुभवस्य सन्निकृष्यते, विप्रकृष्यते तु श्रुतिः, ऐतिह्यमात्रेण स्वार्थाभिधानात्** इति। परं पूर्वोत्तरमीमांसयोः युक्तेरपि श्रुतिरेव गरीयसी । **चोदनालक्षणोऽर्थो धर्मः शास्त्रयोनित्वात्** इति सूत्रे धर्मस्य ब्रह्मणश्च स्वरूपनिर्णयाय श्रुतेरेव प्रमाणत्वं सिद्धान्तयतः ।

पूर्वमीमांसायां तावत् धर्मस्य अपरोक्षज्ञानाविषयत्वात् धर्मनिर्णये तर्का अवसरं न लभन्ते । औपनिषदस्य ब्रह्मणः अपरोक्षज्ञानविषयत्वं विना अपरोक्षाध्यासानिवृत्तेः अपरोक्षज्ञानावाप्तये तर्का अपि उपयुज्यन्ते । यथोक्तं शारीरकभाष्ये- **न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम् । किन्तु श्रुत्यादयोऽनुभवादयश्च यथासम्भवमिह प्रमाणम् इति** । श्रुतस्य अर्थस्य निस्सन्दिग्धतां सम्पादयितुं सयुक्तिकः विचारः कर्तव्य इति सर्वसम्मतं मतम् । उक्तं च **न्यायैः प्रसाधितो ह्यर्थ आरोहति मतिं द्रुतम्** इति । अतः प्राञ्चः परमर्षयः तदनुयायिनश्च बहवः बहुधा बहुवारं विचार्य श्रेयःप्रेयसोः स्वरूपं तत्साधनं च निरचैषुः ।

शास्त्राणि सार्वकालिकानि सार्वजनीनानि च सन्ति पौनःपुन्येन परिचिन्तनीयानि । चिन्तनं विना न उपदिष्टः अर्थः स्फुटीभवति, न वा नूतनः अर्थः परिस्फुरति । अस्माकं प्राचीनपरम्पराणां

चिन्तनानां चार्थवत्वम् अधिगम्य अद्य जना शास्त्रार्थं जिज्ञासमाना दृश्यन्ते । तेषां बोधनम्, संशयानाम् अपाकरणं च शास्त्रज्ञानां कर्तव्यम् । अतः विद्वांसः अस्यां सरणौ विनेयान् सम्प्रेरयेयुः ।

सर्वमेतन्मनसि निधाय बहुभ्यः वत्सरेभ्यः प्राक् अस्माकं राजीवगान्धीपरिसरे परिसरीयाणां विदुषां वाक्यार्थसभा समारब्धा । तथैव प्रत्येकस्मिन् शास्त्रे बाह्यः कश्चन विद्वान् आहूयते, यस्य व्याख्यानं शारदाविशिष्टव्याख्यानमालाङ्गतया समायोज्यते । सर्वेषामेतेषां वाक्यार्थविचाराणां आविष्काराय वाक्यार्थभारतीनाम्नी शोधपत्त्रिका प्रकाश्यते । २०१९-२०२० तमे अपि शैक्षिकवर्षे प्रथितयशसः नैके विद्वद्वरा आकारिषत, येषां व्याख्यानानि पूर्वम् अप्रकाशितानि इदानीं प्राकाश्यं नीयन्ते । तथैव परिसरीयाणां विदुषां वाक्यार्थविचारा अपि अस्मिन् ग्रन्थे समायोजिताः ।

अस्य ग्रन्थस्य प्रकाशनाय अस्मभ्यम् अपेक्षितं मार्गदर्शनं विधाय, सन्देशं च प्रदाय केन्द्रीयसंस्कृतविश्वविद्यालयस्य **कुलपतयः सततोद्यमा आचार्याः श्रीनिवास वरखेडीमहाभागाः कुलसचिवा आचार्या रञ्जितकुमारबर्मन् वर्याश्च** प्रोदसीषहन् । तेभ्य उभयेभ्यः हार्दान् धन्यवादान् आविष्कुर्मः । परिसरस्य **निदेशका आचार्याः सि एस् एस् नरसिंहमूर्तिवर्याः** ग्रन्थसम्पादनकर्मणि अस्मान् उद्बोध्य मार्गदर्शनं व्यधासिषुः । तेभ्यः वयं हार्दं कार्तज्ज्यं समर्पयामः । एवं काले लेखं प्रदाय पुस्तकस्य प्रकाशने सहकृतवद्भ्यः विद्वद्भ्यः पुस्तकस्य मुद्रणविन्यासादिकार्येषु सहकृतवद्भ्यः **सङ्गणकविभागप्रमुखेभ्यः श्रीशशिधरमहोदयेभ्यश्च** धन्यवादान् वितरामः । येषां निरवधिकानुग्रहविशेषं लब्ध्वा अयं परिसरः सदैव आत्मानं धन्यं मन्यते, तेभ्यः **दक्षिणाम्नायश्रृङ्गेरीशारदापीठाधीश्वरेभ्यः श्री श्री भारतीतीर्थमहासन्निधानश्रीचरणेभ्यः** तत्करकमलसञ्जातेभ्यः **श्रीविधुशेखरभारतीसन्निधानश्रीचरणेभ्यश्च** सभक्तिश्रद्धं साष्टाङ्गप्रणामान् निवेदयामः ।

**प्रत्यहं निष्प्रयत्नेन प्रत्यग्ब्रह्मैक्यदर्शिनः ।**
**ध्यायामः परया भक्त्या भारतीतीर्थसद्गुरून् ॥**
**वेदशास्त्रार्थविज्ञानविभातविमलाकृतिम् ।**
**वन्दामहे विश्ववन्द्यविधुशेखरभारतीम् ॥**

इत्थं

सम्पादकाः

**डा गणेश ईश्वर भट्टः, डा वेङ्कटरमणभट्टः**

**डा नारायणवैद्यः, डा गोविन्द हेगडे**

# विषयानुक्रमणिका


| क्र.सं. | शीर्षकम् | नामः | पृ.सं |
|---|---|---|---|
| **अद्वैतवेदान्तविभागः** | | | |
| १ | छान्दोग्यषष्ठाध्यायप्रतिपाद्या सद्विद्या | महामहोपाध्यायाः आर्. कृष्णमूर्तिशास्त्रिणः, चेन्नै | 1 |
| २ | भावरूपं तमः | डा. गणेश ईश्वर भट्टः, | 8 |
| ३ | आत्मस्वरूपविचारः | विद्वान् कू. वेङ्कटेशमूर्तिः | 14 |
| ४ | ज्ञानोत्पत्तौ वृत्तेः प्रयोजनम् | डा. विश्वनाथ हेगडे | 23 |
| ५ | साक्षिस्वरूपम् | विद्वान् निरञ्जन भट्टः | 28 |
| **मीमांसाविभागः** | | | |
| ६ | मीमांसाशास्त्रपरिचयः | आचार्यः रवीन्द्र अम्बादस मुळे | 34 |
| ७ | दम्पत्योस्सहाधिकारविवेक: | आचार्यः सूर्यनारायणभट्ट: | 37 |
| ८ | प्रथमाप्रयोजकाभिहितत्वविचारः | डा. एस्.वेङ्कटेशताताचार्यः | 42 |
| ९ | पाकवर्तमानतादशायां "पचेत्" इति प्रयोगापत्तिपरिहारः | डा.गोविन्द् गोपालकृष्ण हेगडे | 48 |
| **नव्यव्याकरणविभागः** | | | |
| १० | 'विना' योगे काः विभक्तयः भवन्ति? कथम्? | आचार्यः सि.एस्. नरसिंहमूर्तिः | 51 |
| ११ | आदिरन्त्येन सहेता इति सूत्रे संज्ञिविचारः | डा. चन्द्रशेखरभट्टः | 55 |
| १२ | साध्यत्वम् | डा. चिर्रावूरि कृष्णानन्तपद्मनाभम् | 58 |
| १३ | ध्रुवमपायेऽपादानम् | डा. प्रमोद् भट्टः | 63 |
| १४ | इको गुणवृद्धी इति सूत्रस्य किं फलम् ? | डा. अरुणभट्टः | 67 |
| **नव्यन्यायविभागः** | | | |
| १५ | संशयसमुच्चयविवेकः | आचार्यः नवीनहोळ्ळः | 70 |
| १६ | शाब्दतात्पर्यग्रहयोः कार्यकारणभावः | डा.श्यामसुन्दरः ए, | 75 |
| १७ | विशेषपदार्थः | डा.राघवेन्द्र पी आरोल्ली | 79 |
| १८ | वैशेषिकसूत्रोपस्कारोक्तरीत्या अनुमानप्रमाणविमर्शः | डा. नारायण बी राय्करः | 83 |

| क्र.सं. | शीर्षकम् | नामः | पृ.सं |
|---|---|---|---|
| | **साहित्यविभागः** | | |
| १९ | विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः | आचार्यः एन्. लक्ष्मीनारायणट्टः | 88 |
| २० | रीतिविमर्शः | डा. राघवेन्द्रभट्टः | 100 |
| २१ | शान्तरसः | डा. चन्द्रकला आर्. कोण्डि | 108 |
| २२ | रीतिविवेचनम् | डा. कोम्पेल्लि विनयकुमारः | 112 |
| २३ | रामायणस्य नामान्तरौचित्यपरामर्शः | डा. एम्. श्रीनिवासमूर्तिः | 124 |
| २४ | संस्कृतमहाकवीनां दृष्टौ काव्यमीमांसा | डा श्रीकरः वि | 128 |
| | **ज्योतिषविभागः** | | |
| २५ | ताम्बूलप्रश्नचिन्तनम् | डा.नागेश के.सि | 133 |
| २६ | आचार्यगणेशदैवज्ञस्य परिचयः | डॉ. रतनकुमारपाण्डेयः | 137 |
| २७ | द्रेष्काणस्वरूपं तत्प्रयोजनञ्च। | डा. मुरलिकृष्णः टि. | 143 |
| २८ | आकारानुसारं भूमेः शुभाशुभज्ञानम् | डा. सुधांशुकुमार नन्दा | 155 |
| २९ | अष्टमङ्गलप्रश्नः | डा. रमानन्द भट्टः एन् | 166 |
| ३० | ग्रहाणां दृग्बलम् । | विद्वान् नागपति हेगडे | 170 |
| | **शिक्षाविभागः** | | |
| ३१ | श्रीमद्वाल्मीकिरामायणे शिक्षासन्दर्भाः | आचार्य: गङ्गाधरपण्डा | 176 |
| ३२ | अनुशिक्षणव्यवस्था (TUTORIAL SYSTEM) | आचार्यः चन्द्रकान्तः | 188 |
| ३३ | अधिगममूल्याकलनम् | आचार्यः रामचन्द्रुल बालाजि | 195 |
| ३४ | अधिगमस्य आयामाः स्तराश्च (Dimensions and Levels of Learning.) | आचार्यः हरिप्रसादः के | 201 |
| ३५ | मूल्यशिक्षायाः सम्प्रत्ययः | डा.वेङ्कटरमण एस्. भट्टः | 210 |
| ३६ | संस्कृतशिक्षणस्य सामान्यानि उद्देश्यानि महत्त्वं च। | डा. गणेश ति. पण्डितः | 216 |
| ३७ | सूक्ष्मशिक्षणे प्रश्नकौशलम् | डा. दयानिधि शर्मा | 220 |
| ३८ | अनुरूपितशिक्षणम् | डा.नारायणवैद्यः | 229 |
| | समाज: एवं शिक्षाप्रशासनम् Society and Education Administration | डा. अरविन्दकुमार सोमदत्तः | 235 |

# छान्दोग्यषष्ठाध्यायप्रतिपाद्या सद्विद्या

**महामहोपाध्यायाः आर्. कृष्णमूर्तिशास्त्रिणः, चेन्नै**

सुविदितमेवैतत् उपनिषदः परमपुरुषार्थस्य साधनम् आत्मैक्यज्ञानं बोधयन्तीति । यथोक्तं भाष्यकारैः **अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते** इति ।उपनिषन्नाम आत्मतत्वज्ञानम् इत्येवार्थः । इदं मतत्रयस्यापि आचार्याणां सम्प्रतिपन्नम् । तत्प्रतिपादकत्वात् ग्रन्थे उपनिषच्छब्दः औपचारिकः । एकैकस्मिन्नपि वेदे बह्वीषु शाखासु उपनिषदः वर्तन्ते । तत्र सामवेदीया छान्दोग्योपनिषत् अद्वितीयात्मतत्त्वप्रतिपादने प्रसिद्धा ।

आत्मज्ञानं नाम आत्मविषयकः अपरोक्षानुभवः । तदेव आत्मवित्त्वम्, अवगतिः इति वा उच्यते । अत्रैव छान्दोग्ये सप्तमाध्याये नारदस्य तुरीयात्मज्ञानरूपः आत्मानुभवः नासीत् इति दर्शयितुं सोऽहं मन्त्रविदेवास्मि नात्मवित् इत्युक्तम् । अग्रे च **तरति शोकमात्मवित्** इति श्रुतम् । अस्मिन्नेवार्थे अवगतिशब्दः प्रयुज्यते । ब्रह्मजिज्ञासा इत्यत्र **अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म** इत्युक्तं भाष्ये । अवगतिरूपे आत्मतत्त्वज्ञाने सति शोकस्य आत्यन्तिकनिवृत्तिः फलं सिद्ध्यति ।

छान्दोग्योपनिषदि षष्ठाध्याये षोडशखण्डेषु सद्विद्या निरूपिता । अष्टमखण्डे प्रथमवारं **तत्वमसि** इति महावाक्यस्य उपदेशः कृतः । ततः पूर्वं सप्तखण्डाः सन्ति । ततः नवसु खण्डेषु प्रत्येकस्मिन् खण्डे शिष्यस्य हृदयस्थं प्रश्नं स्वयमेव ज्ञात्वा आचार्यः समादधाति । **भूय एव भगवान् विज्ञापयतु** इत्यष्टवारं श्वेतकेतुना प्रार्थितम् ।वाक्यार्थे अद्वैते समग्रस्य प्रकरणस्य तात्पर्यमिति **तत्त्वमसि** इति अभ्यासः ज्ञापयति । अभ्यासस्य तात्पर्यलिङ्गत्वं त्रिभिरपि आचार्यैः अङ्गीकृतम् । **आनन्दमयोऽभ्यासात्** इति सूत्रकारः अभ्यासं हेतुतया उपदिशति । प्रसिद्धानि खलु इमानि तात्पर्यलिङ्गानि-

**उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।**
**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये** ॥ इति ।

यद्यपि सर्वासु उपनिषत्सु इमानि तात्पर्यलिङ्गानि दर्शयितुं शक्यानि । तथापि छान्दोग्यषष्ठाध्याये इमानि सर्वाणि स्फुटम् उपलभ्यन्त इति विशेषः ।

**श्वेतकेतुर्हारुणेय आस** इति आख्यायिका आरब्धा । श्वेतकेतुनामा बालकः पित्रा अध्ययनार्थं गुरुकुलं प्रेषितः । यदा सः द्वादशवर्षपर्यन्तम् अध्ययनं कृत्वा गृहमागतः, तदा तस्मिन् अविनयम् उपलक्ष्य पिता तं सन्मार्गे आनिनीषुः पप्रच्छ- **श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्** इति । एकविज्ञानेन सर्वविज्ञानं कथमिदं सम्भवतीति चकितः श्वेतकेतुः अप्रच्छत् **कथं नु भगवः स आदेशो भवति** इति । तदा पिता **यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्** इत्यादिना वाक्यवृन्देन सदृष्टान्तं तं बोधयामास । तस्यायमर्थः- घटादिकार्यजातं स्वोपादानात् मृदादेः व्यतिरेकेण नास्ति, त्रिष्वपि कालेषु मृदेव विद्यते, घटादिकं नाम कम्बुग्रीवादिमत्त्वादि रूपं च व्यभिचरति, अतः मृत्तिकादि कारणमेव सत्यम्, कार्यं मिथ्या इति । छान्दोग्ये **यथा सोम्यैकेन मृत्पिण्डेन... यथा सोम्यैकेन लोहमणिना... यथा सोम्यैकेन नखनिकृन्तनेन...** इति त्रयः दृष्टान्ता उपात्ताः । एवमेव बृहदारण्यके **स यथा आर्द्रैधाग्नेः** इत्यारभ्य वीणाशङ्खभेरीदृष्टान्ता आम्नाताः । बहुदृष्टान्तानाम् उपन्यासः विवक्षितस्य दृढतया बोधनाय । बहुदृष्टान्तकुशल एव आचार्यो भवितुमर्हति । यद्यपि नैयायिकाः दृष्टान्तबलेनैब विषयं निरूपयन्ति । वेदान्तिनः वेदान्तप्रमाणकाः सन्तः क्वचित् दृष्टान्तमपि अवलम्बन्त इति विशेषः ।

अत्रेदं ज्ञातव्यम्- नववारं शिष्येण प्रश्ने कृतेऽपि कुत्रापि अद्वैतविषये प्रश्नो नास्ति । जीवब्रह्मणोः ऐक्यं कथम्? ऐकात्म्यवादे असाङ्कर्यं कथम्? इति यदिदम् आक्षेपद्वयं क्रियते, तस्य स्पर्शोऽपि प्रश्ने नास्ति । दृष्टान्तास्तु विभिन्नशङ्कानां परिहाराय उपन्यस्ताः ।

ततः **सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्** इत्यादिना सर्वस्यापि जगतः सद्रूपं ब्रह्म उपादानम्, अतः तस्य एकस्य ब्रह्मणः विज्ञानेन सर्वमन्यत् विज्ञातं भवति, ब्रह्मज्ञाने सति अन्यस्य ज्ञेयस्य अभावात् इति कार्यकरणयोः अनन्यत्वन्यायेन एकविज्ञानेन सर्वविज्ञानम् उपपादितम् । श्रुतौ अद्वितीयपदं निमित्तान्तरव्यवर्तनाय इति भाष्य उक्तम् । सदिति पदेन अस्तितामात्रमुच्यते । एतदेव सत्तापदेनापि अभिधीयते । अत्र भावप्रत्ययसद्भावात् सधर्मकं ब्रह्म इति न चिन्तनीयम् । अस्ति सत्ता इत्यादयः शब्दाः असधातोः भूधातोः वा न निष्पन्नाः । अत्र स्वरूपार्थे तल्प्रत्यय उक्तः । अत एव वैयाकरणाः **सा सत्ता सा महानात्मा**

**तामाहुस्त्वतलादयः** इति महास्फोटं सत्पदेन अभिदधति । वस्तुतः ब्रह्म सत्पदलक्ष्यम् । एवं ज्ञानादयः सर्वेऽपि शब्दाः लक्षणयैव ब्रह्म प्रतिपादयन्ति ।

ततः उपनिषदि भूतानां सृष्टिरुक्ता । छान्दोग्ये तेजोबन्नानां त्रयाणामेव सृष्टिरुक्ता । तैत्तिरीये तु पञ्चानाम् । एवमेव क्वचित् **इदं सर्वमसृजत** इत्यक्रमेण सृष्टिरुक्ता । अन्यत्र तु क्रमोऽप्युक्तः । तथापि अत्र विरोधो नाशङ्कनीयः, सृष्टिवाक्यानामपि अद्वितीयब्रह्मपरत्वेन सृष्टौ तात्पर्याभावात् । तदुक्तं गौडपादैः-

**मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा ।**
**उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥** इति ।

यद्यपि छान्दोग्ये वाय्वाकाशयोः सृष्टिः नोक्ता इति बहवः वदन्ति । किन्तु छान्दोग्यषष्ठाध्यायम् अभिप्रेत्य । वस्तुतः छान्दोग्योपनिषदि अपि आकाशादीनां सृष्टिरुक्ता सप्तमाध्याये- **आत्मतः प्राण आत्मत आशात्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप** इति ।

ततः श्रुतिः भौतिकानां चतुर्विधशरीराणां सृष्टिमाह **तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम्** इति । श्रुतौ यद्यपि **त्रिवृतं त्रिवृतमेकैकां करवाणि** इति त्रिवृत्करणमेव श्रुतम् । तथापि तत् पञ्चीकरणस्य उपलक्षणम् । श्रुतौ भूतत्रयस्य एकैकस्य त्रिविधः परिणामः दर्शितः **अन्नमशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुः तत्पुरीषं भवति यो मध्यमः तन्मांसं भवति, योऽणिष्ठः तन्मनः** इत्यादिवाक्येन । **षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो नपिबतो विच्छेत्स्यत** इत्यादिवाक्यैः मनस अन्नमयत्वम् उपपादितम् । तेन यत् नैयायिकैः मनसः नित्यत्वमुक्तम्, यच्च अन्यैः मनसः चेतनावत्त्वमुक्तम्, तदुभयं निराकृतं भवति ।

ततः **स्वप्नान्तं मे सोम्य विजानीहि** इत्यादिना वाक्येन सुषुप्त्यवस्थाप्रदर्शनेन आत्मनः आनन्दस्वरूपत्वं प्रतिपादितम् । आत्मा स्वयमानन्दस्वरूपः । तस्य दुःखित्वादिकम् औपाधिकम्, स्फटिकस्य लौहित्यवत् । यदा अन्ये स्फटिकं लोहितं मन्यते,

तदैव सः स्वच्छः । एवम् आत्मा सर्वदा आनन्दस्वरूपः । अत्र कालिदासः सर्वैः शास्त्रज्ञैः स्मर्तव्यः । सः वेदान्तसारभूतं श्लोकमाह-

**रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।**

**देशे देशे गुणेष्वेवमवस्थास्त्वं अविक्रियः** ॥ इति ।

**सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते** इति श्रुतौ स्वपितिपदं न तिङन्तम्, अपि तु सुबन्तम् । यथोक्तं विद्यारण्यश्रीचरणैः **तिङन्तपदमज्ञानां सुबन्तं तु विवेकिनाम्** इति । एवं स्वपितिशब्दनिर्वचनेन श्रुत्या आत्मनः आनन्दरूपत्वम् असङ्गता च स्वभाव इति प्रत्यक्षतः प्रदर्शितम् । मोक्षस्य उदाहरणं सुषुप्तिः इति भाष्यकारैः बृहदारण्यके चतुर्षु खण्डेषु अभिहितम् । भगवत्पादानां **अनैकान्तिकत्वात् सुषुप्त्येकसिद्धः तदेकोऽवशिष्टः शिवः केवलोऽहम्** इति यत् आत्मनः स्वरूपं अभिहितं तत् सम्यग् विचार्य ज्ञातव्यं ।

ततः, प्रतिदिनं प्रजाः स्वुषुप्तौ स्वस्वरूपं गच्छन्ति चेत् कुतो न जानन्ति ? इति शङ्कायाम्, मधुदृष्टान्तः प्रदर्शितः **यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति** इत्यादिना । लोके मधुमक्षिकाः नाना दिक्षु विद्यमानानां वृक्षाणां रसान् समाहृत्य मधुत्वेन एकतां गमयन्ति अर्थात् मधुत्वमापादयन्ति । अनेकप्रकारवृक्षरसानामपि मधुत्वेन एकतां गतानां मधुरादिभावेन विवेको न गृह्यते । एवमेव इमाः सर्वाः प्रजाः सुषुप्तिकाले मरणप्रलययोश्च अहन्यहनि सति सम्पद्य सति सम्पन्ना इति न विजानन्ति ।

ततः सुषुप्तात् उत्थिताः कुत आत्मानं न जानन्ति इति श्वेतकेतोः संशय उत्पन्नः । तदा आचार्येण नदीदृष्टान्तः प्रपञ्चितः - **इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति** इति । अयमर्थः- लोके गङ्गाद्याः प्राच्यः नद्यः सिन्ध्वाद्याश्च प्रतीच्यः समुद्रं गच्छन्ति । समुद्रं गताः ताः इयमहम् इत्यात्मानं न जानन्ति । एवमेव सुषुप्तिं गत्वा उत्थिताः प्रजाः सत आगता इति न जानन्ति इति । आत्मा समुद्रस्थानीयः । समुद्रो बन्धुः इति श्रुतिः । विद्यारण्यश्रीचरणैः सम्यग् मुदं राति इति व्युत्पत्तिः दर्शिता ।

पुनः शिष्यस्य संशयो जातः- जले वीचीतरङ्गफेनबुद्बुदादय उत्थिताः पुनस्तद्भावं गता विनष्टा भवन्ति । जीवास्तु प्रत्यहं सुषुप्ते कारणं ब्रह्म गच्छन्तोऽपि न विनश्यन्ति । अतः भूय एव मा भगवान्विज्ञापयतु दृष्टान्तेन इति । तदा आचार्यः प्राह- **अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति** इति । अनेकशाखादियुक्तः वृक्षः परश्वादिना सकृद्धातमात्रेण न शुष्यति, जीवन्नेव भवति । स च भौमान् रसान् पिबन् मोदमानस्तिष्ठति । एवं जीवापेतम् अर्थात् जीववियुक्तं इदं शरीरं म्रियते न जीवो म्रियते । सुप्तोत्थितः मम इदं कार्यशेषम् अपरिसमाप्तमिति स्मृत्वा समापयति । अतः न जीवो म्रियत इति ज्ञायते ।

कथं पुनरिदमत्यन्तस्थूलं पृथिव्यादि जगत् अत्यन्तसूक्ष्मात् सद्रूपाद् ब्रह्मणः जायत इति पुनः श्वेतकेतुः पितरं पप्रच्छ । ततः पिता न्यग्रोधदृष्टान्तमाह । न्यग्रोधबीजानि सूक्ष्माणि । तदवयवाः ऐतोऽपि सूक्ष्मतराः । महानपि न्यग्रोधः अत्यन्तसूक्ष्मात् बीजात् सञ्जायते । अतः सूक्षतमाद् ब्रह्मणः स्थूलस्य जगतः कारणत्वम् उपपन्नम् । इदमत्र आचार्यस्य वचनम्- **यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्य** इति ।

एवमपि सद्रूपं ब्रह्म जगत्कारणतया विद्यमानमपि कुतो नोपलभ्यत इति पुनः शिष्यस्य शङ्का उत्पन्ना । तां शङ्कामपाकर्तुम् आचार्यः लवणदृष्टान्तं प्रोवाच । **पटरो विक्लिदः पिङ्गः एतद्वरुणलक्षणम्** इति अरुणप्रश्ने विद्यमानः मन्त्रः । अत्र वरुणशब्देन आवरणमुच्यते । संवत्सररूपेण सूर्यः विद्यते चेत् कुतो न दृश्यत इति प्रश्नः । अविद्यया आवृतत्वात् न प्रकाशत इति समाधानम् । दृष्टान्तवाक्यस्य अयमर्थः- जले निक्षिप्तं लवणं किञ्चित्समयानन्तरं तत्र विलीनं भवति । वयं तज्जलं पश्यामश्चेदपि तत्र जलं नोपलभ्यते । किन्तु तदेव जलं यदा रसनायां स्थापयामः, तदा जलगतं लवणम् अनुभूयते । भाष्ये स्वादुतः लवणम् इत्युक्तम् । आकारेण जलं चेदपि तत् स्वादुतः लवनमित्यभिप्रायः । यथा अत्र चक्षुरादिना अनुपलभ्यमानं लवणं प्रकारान्तरेण उपलब्धम्, एवं कार्यभूतेऽस्मिन् जगति करणतया विद्यमानं सूक्ष्मं कारणं सत् नोपलभ्यते, उपायान्तरं तत्र आवश्यकमिति ।

किं तदुपायान्तरमिति जिज्ञासायाम् आचार्यस्य वाक्यम् - **यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः** इत्यादि । कश्चिद् द्रव्यहर्ता चोरः पुरुषमेकं पिहितनयनं कृत्वा अरण्ये विससर्ज । तस्य हस्तावपि बद्धौ इति भाष्ये लिखितम्, हस्तबन्धनाभावे चक्षुर्बन्धनत्यागसम्भवात् । ततः स पुरुषः दिग्भ्रान्तः सन् गान्धाराख्यस्य स्वदेशस्य मार्गम् अजानन् शुशोच । अस्य शोकं विज्ञाय कश्चित् करूणालुः यदा तं बन्धनाद् विमोच्य मार्गम् उपदइदेश, तदा सः पुरुषः तेन करुणालुना दर्शितं मार्गम् अनुसृत्य स्वदेशं प्राप्य सुखी बभूव । एवमेव संसारारण्यं प्रविष्टः अयं जीवः स्वस्वरूपम् अजानन् देहात्मभावमिव गत्वा नानाविधं शोकमनुभवति । स कदाचित् कृपालुना गुरुणा उपदिष्टः स्वस्वरूपं विज्ञाय शोकान्निवृत्तः । श्रुतिश्च **पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैवमेवेहाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये** इति । अत्र वेदान्तशास्त्रे श्रुतेरेव परमप्रमाणत्वेऽपि तर्कस्यापि आवश्यकता वर्तत इति सूचितम् । अत एव श्रुतिमतस्तर्कोऽनुसन्धीयताम् इति भगवत्पादानां वचनम् । विष्णुसहस्रनामस्तोत्रेऽपि प्रमाणशब्दार्थवर्णनावसरे प्रमाणशब्दस्य अनुमानप्रमाणम् इत्यर्थः लिखितः । भाष्यकारैः उत्तरं दृष्ट्वा प्रश्नस्य स्वरूपं निर्णीतम् ।

ततः आचार्यवान् विद्वान् येन क्रमेण सत् सम्पद्यते, तं क्रमं दृष्टान्तेन भूय एव उपदिश इति प्रार्थनायां सत्याम्, प्रथमतः वैराग्योत्पादनाय लौकिकः विषयः ज्ञापितः **पुरुषं सोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति** इति । अत्र आसन्नमरणः धनिकः । अत एव तं बान्धवाः पर्युपासते ।

यदि मरिष्यतो मुमुक्षतश्च तुल्या सत्सम्पत्तिः, तत्र ज्ञानी नावर्तते, अज्ञानी आवर्तते इत्यत्र कारणं दृष्टान्तेन वद इति शिष्यस्य पुनः प्रार्थना आसीत् । तदा आचार्येण तप्तपरशुदृष्टान्तः समानीतः **पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेय-मकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते** इति । अयमर्थः- कश्चित् चौर्यं कृतवानिति सन्देहो जातः । तस्य परीक्षणाय राजपुरुषाः राज्ञः समीपे

समानयन् । स तु अहं न चौर्यं कृतवानिति वदति । तदा परीक्षणाय तेन तप्तपरशुः ग्रहीतव्यो भवति । तदा यदि सः वस्तुतः चौर्यं कृतवान्, तर्हि अनृताभिसन्धः स दग्धो भवति बध्यते च । यदि न चोरः तर्हि सत्याभिसन्धः सः मुच्यते । एवमेव मरणानन्तरं अज्ञानी बध्यते, ज्ञानी च मुच्यते ।

श्रुत्यर्थवर्णनानन्तरं भाष्ये **किं पुनरत्र षष्ठे वाक्यप्रमाणेन जनितं फलमात्मनि, कर्तृत्वभोक्तृत्वयोरधिकृतत्वविज्ञाननिवृत्तिः तस्य फलम्** इत्युक्तम् । **तत्त्वमसि** इति तत्त्वम्पदार्थयोः वास्तवम् ऐक्यमुपदिष्टम् । यथा उपासनार्थं शालग्रामे विष्णुबुद्धिः क्रियते, तथा अत्र अध्यासे सामानाधिकरण्यं नास्ति । तथा सति तत्त्वमसि इति नववारम् उपदेशः नापेक्षितः । तत्त्वमसि इति बाधायां सामानाधिकरण्यं वा ? अभेदे सामानाधिकरण्यं वा इति महान् विचारः वर्तते । पक्षपातं मेधावित्वं च परित्यज्य उभयथाऽपि एकत्वबोधन एव तात्पर्यम् इति समानतया स्वीकार्यम् । सर्वत्र एकत्वसम्पादनार्थम् एव सर्वैः अपि यतनीयम् । एवं छान्दोग्यषष्ठाध्याये इयं सद्विद्या या षोडशखण्डेषु निरूपिता, सा सङ्क्षेपेण अत्र उपस्थापिता इति शम् ।

# भावरूपं तमः

**डा. गणेश ईश्वर भट्टः,**

सहाचार्यः, अद्वैतवेदान्तविभागः

**श्रुतिस्मृतिनिभत्वेन भक्तचित्ततमोहरान् ।**

**वन्दे जगद्गुरून्नित्यमुभयानभयप्रदान् ।**

वेदान्तदर्शने द्वावेव पदार्थौ निरूपितौ दृक् दृश्यं चेति । तत्र दृक्स्वरूपः अद्वितीय आत्माख्यः एक एव पदार्थः वेदान्तैः तात्पर्येण प्रतिपिपादयिषितः । दृश्यस्य तु मिथ्यात्वेन, स्वातन्त्र्येण तस्य प्रतिपादने फलाभावात् दृश्यनिरूपणे नास्ति शास्त्रस्य तात्पर्यम् । नैयायिकादयस्तु पदार्थान् द्रव्यगुणादिरूपेण विभजमानाः श्रुतिस्मृत्यादिप्रसिद्धस्यापि तमसः द्रव्यत्वम् अपह्नुवते । वेदान्तदर्शने द्रव्यगुणादिपरिभाषाया अनङ्गीकारेऽपि यादृशं द्रव्यत्वं पृथिव्यादीनाम्, तादृशं तमसोऽपि वर्तत इति तमसः द्रव्यत्वम् अत एव भावत्वं चापि प्रतिपादितम् । तदिह पञ्चपादिकाविवरण-चित्सुख्यादिग्रन्थरीत्या सङ्क्षेपेण प्रदर्श्यते ।

**तमःप्रकाशवद् विरुद्धस्वभावयोः** इति भाष्यस्य अर्थं वर्णयन्तः पञ्चपादिकाविवरणकाराः प्रसङ्गात् तमसः स्वरूपं विचारयामासुः । तत्र तमः आलोकाभावरूप इति नैयायिकाः । रूपदर्शनाभाव इति प्राभाकराः । तथा च अभावरूपत्वात् तमःप्रकाशवद् इति भावरूपयोः दृग्दृश्ययोः कथं दृष्टान्तो भवितुमर्हति इति आक्षेपः दर्शितः । एतदभयमयुक्तमिति विवरणकारा न्यरूपयन् । तथा हि तमसि वृद्धिक्षयरूपम् अवस्थावत्त्वं दृष्टम् । तच्च अभावस्य भवितुं नार्हति । तथा चानुमानम्- तमः भावरूपम् अवस्थावत्त्वात् घटादिवत् इति । अत्राशङ्का- बहुलालोकवत्यपि देशे निमीलितनयनस्य पुरुषस्य तम उपलभ्यते । तत्किम् आन्तरमुत बाह्यमिति विचार्यमाणे, न तावद्बाह्यम्, बहिः आलोकस्यैव सत्त्वात् । नाप्यान्तरम्, बहिःप्रसरणशीलानां नयनरश्मीनाम् आन्तरतमोग्राहकत्वाभावात् इति । उच्यते- यथा पिहितकर्णपुटस्य आन्तरः शब्द उपलभ्यते, तथैव नयनरश्मीनाम् अन्तःप्रसरणात् आन्तरं तमः गृह्यते । यद्रूपवत् तत् चक्षुःप्रदेशात् अन्यत्र उपलभ्यते इति व्याप्तिः धूमे व्यभिचरिता । न हि धूमस्य स्पार्शनानुभवः चक्षुःप्रदेशाद् अन्यत्र भवति । एवमेव यद्रूपवत् तत् चक्षुःप्रदेशात् अन्यत्र उपलभ्यत इति नियमस्य भङ्गो वक्तव्यः । अपि च तमः अभावमात्रमिति वदन् प्रष्टव्यः- आलोकस्य बहुविधस्य सत्त्वात् किं

तमः एकैकालोकाभावः उत सर्वालोकाभावः? प्रथमपक्षेऽपि कीदृशः अभावः सः इति वक्तव्यम् । यतः क्वचिद्देशे सवितृकिरणाः व्याप्ताः । तत्र यावत् प्रदीपः नानीतः, तावत् प्रदीपालोकस्य प्रागभावः आसीत् । आनीते सति तस्य सावित्रालोकात् अन्योन्याभावः अस्ति । प्रदीपे नष्टे सति प्रध्वांसाभावः अपि सम्पन्नः । तथापि तस्मिन् देशे तिसृषु अवस्थासु तमोबुद्धिः न जायते । एतेन तमः न प्रागभावः, न अन्योन्याभावः, न वा प्रध्वंसाभाव इति ज्ञायते । यदि सर्वालोकाभावः तम इत्युच्यते, तर्हि यदा सर्वे आलोकाः न सन्निहिताः, विद्यमानैः आलोकैः तमः न निवर्तेत, निवर्तकानाम् आलोकानां सर्वेषाम् अभावात् । किन्तु एकेनापि आलोकेन तमः निवर्तत इति दृष्टम् । तस्मात् न आलोकाभावरूपं तमः ।

नापि तमः रूपदर्शनाभावः, सत्यपि रूपदर्शने तमोग्रहणात् । तथा हि कश्चित् पुरुषः संवृत अपवरके स्थितः तमः अनुभवति । तदैव बाह्यम् आलोकसंयुक्तं विषयमपि स पश्यति । यदि तमः रूपदर्शनाभावः स्यात् तर्हि अत्र स्थले रूपदर्शनस्य विद्यमानत्वात् तमःप्रतीतिः न स्यात् । तस्मात् न रूपदर्शनाभावस्तमः।

तत्त्वप्रदीपिकायां पुनः विस्तरेण सकलाक्षेपनिरासपूर्वकं तमसः भावरूपत्वं निरूपितम् । तत्रायं पूर्वपक्षः- यदि तमः द्रव्यमित्युच्यते, तर्हि तत् किं पृथिव्यादिक्लृप्तद्रव्येषु अन्यतमत् उत अन्यदिति वक्तव्यम् । पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि द्रव्याणि । तत्र न तावत् पृथिव्यादिक्लृप्तद्रव्यान्यतमत्, तावद्गुणाभावात् । तथा हि

**स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकम् ।**
**रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥**
**स्नेहहीना गन्धयुता क्षितावेते चतुर्दश ॥**

इत्याद्युक्तरीत्या, पृथिव्यादिषु विभिन्नेषु भूतेषु विभिन्नसङ्ख्याका गुणाः सन्ति । तत्र तमसः पृथिवीत्वे तमसि अपि उक्ताः चतुर्दश पार्थिवाः गुणाः स्युः । तथैव अबादिरूपत्वेऽपि अबादिषु विद्यमानाः तावन्तः गुणाः तमस्यपि भवेयुः । न चैतदस्ति । अतः तमः न पृथिव्याद्यन्यतमत् । आत्मादिरूपत्वे च तमसः नित्यत्वापत्तिश्च ।

नापि तमः द्रव्यान्तरमेव, तस्य निर्गुणत्वेन द्रव्यत्वस्यैव असम्भवात् । महत् तमः, नीलं तमश्चलति इत्यादिप्रतीत्या तमः महत्त्वनीलरूपविशिष्टतया द्रव्यमिति शङ्का न कार्या ।

यतः येषु नीलरूपादयो गुणाः सन्ति, तेषु पृथिव्यादिषु गन्धादिगुणा अपि सन्ति । तेषां च तमस्यभावात् व्यापकाभावात् व्याप्यस्य नीलरूपादेरपि अभावः ज्ञायते । अपि च तमः भिन्नं द्रव्यं चेत् तत्किं सावयवमुत निरवयवमिति वक्तव्यम् । निरवयवत्वे आत्मादिवत् तमसः नित्यत्वापत्तौ आलोकनिवर्त्यत्वं न स्यात् । यदि सावयवम्, तत्रापि प्रश्नः किं स्पर्शादिवद्भिः अवयवैः तमः आरभ्यते उत स्पर्शादिरहितैः इति । स्पर्शादिवदारभ्यत्वे आरब्धे तमसि अपि स्पर्शादयः स्युः, समवायिकारणगतविशेषगुणस्य कार्ये स्वसजातीयगुणारम्भकत्वात् । न हि तमः स्पर्शवत् । स्पर्शादिरहितत्वे तु तमोऽवयवानाम् आरम्भकत्वमेव न स्यात् । न हि स्पर्शादिरहितं मनः किञ्चिद्द्रव्यमारभते । तस्मात् तमः न द्रव्यम् ।

नापि गुणः । गुणश्चेत् कस्य द्रव्यस्य गुण इति वक्तव्यम् । न तावत् पृथिव्यप्तेजसां गुणः, तावद्गुणोपलब्धिप्रसङ्गात् । न हि पृथिव्यादिषु उपलभ्यमाना अन्ये गुणाः तमसि उपलभ्यन्ते । नापि तमः वाय्वाकाशयोः गुणः, तमसः रूपवत्वात् तयो रूपाभावात् । नापि दिक्कालमनसां गुणः, तेषु विशेषगुणाभावात् । रूपवत्त्वादेव तमः न आत्मगुणः, आत्मनः बहिरिन्द्रियग्राह्यगुणानधिकरणत्वात् । एवमेव तमः न कर्मणि अन्तर्भवति । संयोगवियोगयोः असमवायिकारणं हि कर्म । न ह्येतल्लक्षणं तमसि वर्तते । नापि तमः सामान्यम्, तस्य व्यक्तिविशेषाभिव्यङ्ग्यत्वात्, तमसश्च तथात्वाभावात् । नापि समवायः, सम्बन्धिप्रत्यक्षापेक्षाभावात् । नापि विशेषः, विशेषस्य आश्रयप्रतीतिसापेक्षत्वात् तमसश्च तथाभावाभावात् । तस्मात् न तमसः भावपदार्थेषु अन्तर्भावः ।

अपि च तमसः प्रतीतिरपि उपपादयितुम् अशक्या । न हि चक्षुरिन्द्रियं तमोविषयकानुभवजनकम्, तथा सति चक्षुर्व्यापाराभावे तमसः अनुपलम्भप्रसङ्गः । किन्तु निमीलितनयनस्यापि पुरुषस्य तमः पश्यामि इत्यनुभवः जायते । किञ्च रूपस्य रूपवतो वा प्रत्यक्षम् आलोकसहकृतचक्षुषा जायते । तमः तु आलोकनिरपेक्षचक्षुर्ग्राह्यम् । तेन तस्य अरूपत्वं ज्ञायते । मनः अपि तमोऽनुभवं न जनयति, मनसः बाह्येन्द्रियसंयोगाभावे बाह्यविषयेषु असामर्थ्यात् । तथा चानुमानम्- तमःपदम् आलोकाभाववाचकम्,

आलोकानपेक्षचक्षुर्ग्राह्यत्वात् आलोकाभाववत् इति । तस्मात् तमः न भावपदार्थः, अपि तु प्रकाशाभावमात्रं तम इति नैयायिकाः मन्यन्ते ।

अत्रायं सिद्धान्तः-

**तमालश्यामलज्ञाने निर्बाधे जाग्रति स्फुटे ।**
**द्रव्यान्तरं तमः कस्मादकस्मादपलप्यते ॥ इति ।**

अयमर्थः- तमालवत् श्यामलं तम इति ज्ञानं सार्वजनीनम् । तस्य च बाधकन्तराभावात् भ्रमत्वं वक्तुम् अशक्यम् । अतः रूपवत्वात् तमः द्रव्यमेव । रूपवत्त्वप्रतीतिः एव न जायत इति न वक्तव्यम्, प्रतीत्यभावे उक्तव्यवहारासम्भवात् । यथा पटे शुक्लत्वाभावे अयं नील इति औपचारिकः व्यवहारः, तथैव आलोकाभावे इदं तम इति व्यवहार इति न शङ्कनीयम् । मुख्यत्वे बाधके सत्येव औपचारिकत्वं स्यात् । न चात्रास्ति किमपि बाधकम् । तमसः द्रव्यत्वे तस्य तद्रूपस्य च आलोकनिरपेक्षचक्षुर्ग्राह्यत्वं वक्तव्यं भवति, तच्च असम्भवि, अतः नास्ति तस्य द्रव्यत्वमिति चेत्, उच्यते- रूपवत्त्वेऽपि इतरस्मात् विलक्षणं तमः । आलोकाभावव्यङ्ग्यं हि तत् । अतः यथा घटाभावस्य आलोकसहकृतचक्षुर्ग्राह्यत्वेऽपि आलोकाभावः आलोकनिरपेक्षचक्षुर्ग्राह्यः, एवं तमः अपि इत्यभ्युपगन्तव्यम् । यच्च आलोकाभावस्य आलोकविरोधितया आलोकनिरपेक्षत्वम्, तत् तमसोऽपि समानम् ।

अत्र शङ्का- चक्षुर्व्यापाराभावेऽपि तम उपलभ्यते, यथा निमीलितनयनस्य । अतः तमः अचाक्षुषमिति । उच्यते- निमीलितनयनस्य यः तमसः अनुभवः सः चक्षुर्व्यापारादेव जायते । चक्षुषा पक्ष्मपटलान्तर्वर्ति तमः तदा गृह्यते । यथा पिहितकर्णपुटस्य श्रोत्रव्यापारादेव आन्तरशब्दोपलब्धिः, तद्वत् । यच्चोक्तं रूपस्य गन्धव्याप्तत्वात् तदभावात् नीलरूपस्यापि तमसि अभाव इति, तदयुक्तम्, प्रमाणबलात् तमसः नीलरूपवत्त्वसिद्धौ व्याप्तेः हेयत्वात् । यत्र अनुष्णाशीतस्पर्शः, तत्र गन्ध इति पृथिव्यादौ व्याप्तिग्रहेऽपि, वायौ अनुष्णाशीतस्पर्शवति गन्धाभावात् सा व्याप्तिः त्यज्यते । एवमिहापि यत्र नीलरूपम्, तत्र गन्ध इति व्याप्तिः नाभ्युपेयते । यदि, पाकजानुष्णाशीतस्पर्शः गन्धादिव्याप्तः, अतः गन्धाभाववति वायौ पाकजानुष्णाशीतस्पर्शाभाववति गन्धस्य अभावः न दोषाय इत्युच्यते, तर्हि इहापि पाकजं नीलरूपं गन्धादिव्याप्तम्, तमसि गन्धाभावेऽपि पाकजं तु नीलरूपं भवितुमर्हतीति समानम् ।

यच्चोक्तम्, तमः रूपाभाववत् स्पर्शाभावात् आकाशवत् इति, तत्र हेतुः बाधितः, प्रत्यक्षेण रूपस्य ग्रहणात् । अन्यथा वायुः स्पर्शरहितः रूपाभावात् आकाशवत् इत्यपि अनुमानप्रसङ्गः ।

अत्राशङ्का- एवमपि उत्पत्तिविनाशवतः तमसः आरम्भकतया परमाणवः वाच्याः । ते च स्पर्शाभावात् आरम्भका एव न भवन्ति, मनोवत् इति । उच्यते- अनारम्भकत्वे न स्पर्शाभावः प्रयोजकः, किन्तु फलाभावः । तथा हि मनः कुतः द्रव्यारम्भकं न भवति इति विचार्यमाणे, मनआरब्धद्रव्यस्य भोगसाधनत्वाभाव एव तत्र कारणम् । शरीरतया विषयतया इन्द्रियतया वा मनआरब्धद्रव्यस्य भोगसाधनता वाच्या । तत्र न तावत् मनआरब्धद्रव्यत्वेन सम्भाव्यमानं शरीरतया भोगसाधनम्, तस्य पार्थिवादिचतुर्विधशरीरानन्तर्भूतत्वात् इन्द्रियानाश्रयत्वाच्च । नापि इन्द्रियतया, मनस एव इन्द्रियत्वात्, तदारब्धद्रव्यान्तरस्वीकारासम्भवात् । नापि विषयतया, रूपस्पर्शरहितद्रव्यारब्धत्वेन विषयत्वायोगात् । अतः मनआरब्धद्रव्यस्य भोगसाधनत्वाभवात् मनसः द्रव्यारम्भकत्वं न सम्भवति । इह तु महत्त्वात् रूपवत्त्वाच्च तमसः विषयतया सम्भवति भोगसाधनत्वम् । अतः तमआख्यस्य द्रव्यस्य आरम्भो न व्यर्थः ।

वस्तुतस्तु, अस्मन्मते आरम्भवादस्य अनङ्गीकारात्, तमः न स्वावयवैः आरभ्यते । किन्तु महाविद्युदादिवत् तमः मूलकारणात् मायोपहितब्रह्मणः झटिति उत्पद्यते । अपि च मनसः अनारम्भकत्वकथनमपि अयुक्तम्, तस्य सावयवत्वेन परिणामित्वात् । तमःपरमाणवः अनारम्भकाः स्पर्शाभावात् मनोवत् इत्यनुमाने आत्मनि व्यभिचारः, तस्य स्पर्शाभावेऽपि सकलजगदुपादानत्वात् । तथा च रूपवत्त्वे बाधकाभावात् रूपवत्त्वेन तमसः द्रव्यत्वं सिद्ध्यति ।

एवं चलनक्रियावत्त्वादपि तमः द्रव्यम् । अत्र शङ्का- तमसः चलनं न स्वाभाविकम् । यथा स्वतोगमनशून्यानां घटगतरूपादिगुणानां घटचलने अनुविधानम्, एवं तमसः चलनमपि अन्यानुविधानमात्रम् इति । उच्यते- अन्यानुविधानेऽपि तमसः द्रव्यत्वं न हीयते, आकरजतेजोवत् । आकरजतेजसः सुवर्णस्य नित्यं कठिनपार्थिवद्रव्यावष्टब्धत्वेन तदनुविधायि चलनमस्ति । तावता तस्य स्वाभाविकचलनत्वं न हीयते । एवमिहापि तमसः चलनं न हीयते । किञ्च इह अनुविधानं दुरुपपादम् । किं येन निमित्तेन तमः जायते

तदनुविधत्ते तमः उत यन्निवर्त्यं तदनुविधत्त इति वक्तव्यम् । नाद्यः, पर्वतस्य निश्चलत्वेऽपि तन्निमित्तकं छायारूपं तमः चलति इति दर्शनात् । न द्वितीयः , वैपरीत्यदर्शनात् । आलोकागमने सति तमः नागच्छति प्रत्युत गच्छति । अतः आलोकानुविधायित्वं तमसः वक्तुमशक्यम् । अतः तमसः चलनं नानुविधानम् । तदेवं तमः भावरूपं प्रसिद्धद्रव्यव्यतिरिक्तमिति तमःप्रकाशवत् इति दृष्टान्तोपादानं सङ्गच्छतेतरामिति शम् ॥

**आधारग्रन्थाः-**


१. ब्रह्मसूत्रभाष्यम्, भाष्यरत्नप्रभा-भामती-न्यायनिर्णयोपेतम्

२. पञ्चपादिका प्रबोधपरिशोधिनीसहिता

३. पञ्चपादिकाविवरणं तत्त्वदीपनोपेतम्

४. तत्त्वप्रदीपिका नयनप्रसादिन्युपेता

५. न्यायसिद्धान्तमुक्तावली

६. तर्कसङ्ग्रहः

## आत्मस्वरूपविचारः

**विद्वान् कू. वेङ्कटेशमूर्तिः**

सहयकाचार्यः

वेदान्तिनामद्वैतिनां मते अखण्डं ब्रह्मचैतन्यमेवात्मा। स चात्मा चैतन्यरूपः विज्ञानघनः स्वयं प्रकाशश्च । तदेकमेव चैतन्यम् उपाधिभेदेन जीव इति, ईश्वर इति परमात्मेति वा व्यवह्रियते।

**आत्मनोऽस्तित्वम्**

सर्वोऽपि प्रापञ्चिको व्यवहारः अनुभूतिमवलम्ब्य खलु प्रवर्तते। विषयानुभूत्यवसरे चेतनविषयिणः सत्ता स्वयमेव सिद्ध्यति। सर्वेऽपि जनाः स्वसत्तायां सुदृढं विश्वसन्ति। न कश्चिदपि स्वसत्तां संशयेन प्रतिषेधति। तदुक्तं भगवत्पादैः—

''सर्वो ह्यात्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वोऽपि लोको नाहमस्मीति प्रतीयात्।''[१] एवं च सर्वस्यापि अस्मत्प्रत्ययगोचरः (अहं प्रत्ययी) आत्मा इत्युच्यते। आत्मा च ब्रह्म । अतः परमार्थतः ब्रह्मस्वरूपमेव आत्मस्वरूपम्। निबन्धेऽस्मिन् जीवात्मानमधिकृत्य किञ्चित्प्रस्तूयते ।

जीवो नाम अन्तःकरणतादात्म्यापन्नम् अन्तःकरणावच्छिन्नं वा चैतन्यम्। परमार्थतः जीव एव ब्रह्म। जीवात्मा इति औपाधिको विभागः। जीवमधिकृत्य शङ्करभगवत्पादैरुक्तम्— ''अस्त्यात्मा जीवाख्यः शरीरेन्द्रियपञ्जराध्यक्षः कर्मफलसम्बन्धी''[२] इति।

जीवस्य सन्ति त्रीणि शरीराणि अविद्याकल्पितानि — स्थूल-सूक्ष्म-कारणशरीरभेदेन। जाग्रदवस्थायां जीवो बाह्यविषयान् इन्द्रियैर्जानाति। स्वप्ने मनसा सूक्ष्मवृत्तिभिश्च वेत्ति। सुषुप्तौ अविद्यायाः सूक्ष्मवृत्तिभिरावृतः असौ आनन्दैकरसो भवति। शुद्ध आत्मा तु एताभ्यः अवस्थाभ्यः परः निरूपाधिर्निर्विशेषः एकरसः। एष एवात्मा यदा मलिनसत्त्वोपाधियुक्तः (कल्पितः) भवति तदा 'जीवः' इत्युच्यते। वस्तुतः जीवात्मा

---

[१] ब्र०सू०शा०भा० 1.1.1

[२] ब्र०सू०शा०भा० 2.3.17

सत्स्वरूप: चित्स्वरूप: आनन्दस्वरूपश्च। तस्य च आत्मन: त्रैकालिकी सत्ता अस्तीति स: नित्य: शाश्वत:।

**उत्पत्तिविनाशरहितो जीवात्मा**

उत्पत्तिविनाशरहितोऽस्ति जीवात्मा। शरीराद्युपाधीनामेव उत्पत्तिर्भवति, न तु जीवात्मन:। स च कूटस्थ: सर्वविकारवर्जित: । अत एव न तस्य उत्पत्ति: विनाशो वा भवति इति सिद्धम् । ब्रह्माभिन्नस्य जीवात्मन: नित्यत्वम् अजत्वं च श्रुतिभ्योऽवगम्यते। तथा च श्रुतय: — 'स वा एष महानज आत्माऽजरोऽमरोऽभयो ब्रह्म'[१], 'न जायते म्रियते वा विपश्चित्'[२] इत्यादय:।

जीवस्योत्पत्तिविनाशशालित्वशङ्काम् अपनुदन्त: शङ्करभगवत्पादा आहु:[३]— ''न जीवस्योत्पत्तिप्रलयौ स्त:, शास्त्रफलसम्बन्धोपपत्ते:। शरीरानुविनाशिनि हि जीवे शरीरान्तर-गतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधौ अनर्थकौ स्याताम्। श्रूयते च — 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते'[४] इति।''

वियदादीनाम् इव जीवात्मन: अपि परस्मादात्मन: उत्पत्तिरस्ति न वेति निर्णयाय प्रणीतस्य 'नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्य:'[५] इति सूत्रस्य व्याख्यानावसरे सिद्धान्तम् उपस्थापयद्भि: भगवत्पादैरुक्तम् —

''नात्मा जीव उत्पद्यत इति। कस्मात् ? अश्रुते:। न हि अस्य उत्पत्तिप्रकरणे श्रवणमस्ति भूय:सु प्रदेशेषु। ननु क्वचिदश्रवणम् अन्यत्र श्रुतं न वारयतीत्युक्तम्। सत्यमुक्तम्। उत्पत्तिरेव त्वस्य न सम्भवतीति वदाम:। कस्मात् ? नित्यत्वाच्च ताभ्य:। च शब्दादजत्वादिभ्यश्च। नित्यत्वं हि अस्य श्रुतिभ्योऽवगम्यते। तथा अजत्वमविकारित्वम् अविकृतस्यैव ब्रह्मणो जीवात्मावस्थानं ब्रह्मात्मनो चेति। ता: का: श्रुतय:? 'न जीवो म्रियते' (छा० 6.11.3), 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म (बृ० 4.4.22), 'न जायते म्रियते वा विपश्चित्' (कठ० 2.18), 'अजो नित्य: शाश्वतोऽयं पुराण:' (कठ० 2.18),

---

[१] बृ० 4.4.22

[२] कठ० 1.2.18

[३] ब्र०सू०शा०भा० 2.3.16

[४] छा० 6.11.3

[५] ब्र०सू० 2.3.17

'तत् सृष्ट्वा तदेवानुप्राविशत्' (तै० 2.6.1), 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छा० 6.3.2), 'स एष इह प्रविष्ट आ नखाग्रेभ्य:' (बृ० 1.4.7), 'तत्त्वमसि' (छा० 6.8.7), 'अहं ब्रह्मास्मि' (बृ० 1.4.10), 'अयमात्मा ब्रह्म सर्वात्मभू:' (बृ० 2.5.19) इत्येवमाद्या: सत्यो जीवस्योत्पत्तिशङ्कां प्रतिबध्नन्ति।'' इति।

ननु आत्मन: सर्वदेहेषु प्रविभक्तत्वात् विकार:, विकारत्वाच्च उत्पद्यत इति नैव शङ्कनीयम्। यतो हि अत्रोच्यते— वस्तुत: आत्मन: प्रविभागो न वर्तते, 'एको देव: सर्वभूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मा'[१] इति श्रुते:। यत्र क्वचिदपि जीवात्मन: उत्पत्ति: प्रलयश्च श्रुतिषु कथितो दृश्यते तत्र तु उपाधिसम्बन्धात् उत्पत्तिप्रलययो: कल्पना इति ज्ञेयम्। अर्थात् तत्र उपाध्युत्पत्त्या अस्य उत्पत्ति: उपाधिप्रलयेन अस्य प्रलय: इति आत्मनि अध्यस्तस्य उत्पत्तिमत्व-प्रलयशालित्वयो: कल्पनाया: अनुवादमात्रम्। एवं च आत्मा नैव उत्पद्यते प्रविलीयते च।

आत्मन: अजत्वम् अमरत्वं च भगवद्गीतास्वपि स्पष्टमुद्घोषितम्। तद्यथा—

अविनाशि तु तद्विद्धि----------
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति।[२]
न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूय:।
अजो नित्य: शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥[३]
वेदाविनाशिनं नित्यं य एनमजमव्ययम्----- [४]
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावक:।
न चैनं क्लेदयन्त्यापो न शोषयति मारुत:॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्य: सर्वगत: स्थाणुरचलोऽयं सनातन:॥
अव्यक्तोऽयमचिन्त्योऽपमविकार्योऽयमुच्यते।[५] इति।

---
[१] श्वे० 6.11
[२] भ०गी० 2.17
[३] भ०गी० 2.20
[४] भ०गी० 2.21
[५] भ०गी०2.23-25

**नित्यमुक्तो निर्गुणो निष्क्रियश्चात्मा**

आत्मनः ज्ञानरूपत्वात् तस्य परमार्थतः बन्धनं न सम्भवति । अत एव सः नित्यमुक्तः इत्युच्यते। बन्धनस्य पारमार्थिकत्वे तस्य निवृत्त्यभावात् मोक्षलाभो न स्यात्, नहि स्वभावस्य निराकरणं सम्भवति। स चात्मा विभुः, भूमास्वरूपः, देशकालवस्त्वपरिच्छिन्नः, आकाशवत् सर्वव्यापी च। ब्रह्मणः निर्धर्मकत्वेन यद्यपि जीवात्मा अपि स्वरूपतः निर्धर्मक एव, तथापि जीवोपाधीनां जीवे स्वधर्माधानात् औपाधिकधर्मत्वं जीवस्य उपपद्यते।[१] एवम् आत्मा यद्यपि निर्गुणः निष्क्रियश्च तथापि उपाधियोगात् सगुणः सक्रियः इव चोपलभ्यते। न हि नित्यस्य आत्मनः क्रिया सम्भवति, सक्रियत्वे विकारस्य अवश्यं भावित्वात् विकारसद्भावे च अनित्यत्वप्रसङ्गात् ।

**एक एवात्मा**

स चात्मा एकः। सर्वेषु देहेषु एक एव आत्मा वर्तते। तथा च श्रुतिः—'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा'[२] इति। उपाधिनिमित्तक एव भेदः प्रतीयते। ''भेदस्तु उपाधिनिमित्तो मिथ्याज्ञानकल्पितो न पारमार्थिकः''[३] इत्युक्तेः। आत्मनः स्वरूपतः सुखदुःखरहितत्वे अपि अन्तःकरणरोपोपाधिभेदात् सुखदुःखादिमान् इव उपलभ्यते। अत्र, आत्मनः एकत्वे एकजीवगत-सुखदुःखादीनां जीवान्तरेषु अपि प्रसक्तिः स्यात् इति शङ्का न कार्या। उपाधिभेदेन सुखदुःखादिभेदोपपत्तेः।

**आत्मनः कर्तृत्वभोक्तृत्वादिकम् आध्यासिकम्**

नित्यस्य आत्मनः कर्तृत्वभोक्तृत्वादिकमपि परमार्थतो नास्ति। पूर्णस्य क्रियाभोगादौ निमित्तानुपपत्तेः, कर्तृत्वभोक्तृत्वसद्भावे विकारप्रसङ्गेन अनित्यत्वापत्तेः। न हि कूटस्थस्य नित्यस्य आत्मनः विकारो भवितुमर्हति ।

मनःप्रभृतीनां कर्तृत्वभोक्तृत्वादिकम् आत्मन्यारोप्य आत्मा कर्ता भोक्ता इति लोके व्यवहरन्ति। एतदेव आध्यासिकं कर्तृत्वभोक्तृत्वादिकम् उद्दिश्य खलूक्तं सूत्रकारैः— 'कर्ता

---

[१] द्र०शा०वे०त०मी० पृ० 18

[२] श्वे० 6.11

[३] ब्र०सू०शा०भा० 2.4.10

शास्त्रार्थकत्वात्' इति। जीवस्य कर्तृत्वे एव 'यजेत', 'जुहुयात्', 'दद्यात्' इत्येवं-प्रकारकं विधिशास्त्रम् अर्थवद् भवति, तत्र कर्तुः कर्तव्यविशेषोपदेशात्। अन्यथा तत्तु अनर्थकं स्यात्। एवमेव च 'एष हि द्रष्टा श्रोता गन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इतीदं शास्त्रमपि अर्थवद् भवति। एवमेव 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च'[१] इत्यादि श्रुत्युक्त-लौकिक-वैदिक-क्रियासु व्यपदिष्टं कर्तृत्वमपि पूर्वोक्तरीत्या एव अवगन्तव्यम्। न च असङ्गस्यात्मनः कर्तृत्वासम्भवात् क्रियावेशात्मकं कर्तृत्वं भवत्विति वाच्यम्, करणत्वेन क्लृप्तशक्तिकायाः बुद्धेः तर्कशक्तिः न कल्पयितुं शक्या। कठारादौ अदर्शनात्। बुद्धेः कर्तृत्वें करणान्तरस्य कल्पनीयत्वाच्च।

परमार्थतस्तु आत्मनः न कर्तृत्वमस्ति, 'असङ्गो ह्ययं पुरुषः'[२] इति श्रुत्या कर्तृत्वविरोधात्। अतः यथा जपाकुसुमसन्निधिवशात्। स्फटिके रक्तत्वमध्यस्य व्यवह्रियते, तद्वत् अन्तःकरणसान्निध्यवशात् आत्मनि कर्तृत्वम् अध्यस्यते।

उक्तं च भगवत्पादैः—

''न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति। बुध्युपाधि धर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वम्। अकर्तुरभोक्तुश्च असंसारिणो नित्यमुक्तस्य सत आत्मनः।''[३] इति।

**अणोरणीयान् महतो महीयान्**

स चात्मा विभुः भूमास्वरूपः आकाशवत् सर्वव्यापी चेति अद्वैतिनः। जीवो ब्रह्माभिन्नः, ब्रह्म च आकाशवत् भूमारूपं विभुः । अतः जीवात्मा विभुरित्युच्यते। 'स वा एव महानज आत्मा'[४], 'नित्यं विभुं सर्वगतम्'[५] इत्यादि-श्रुतेः।

[१] तै० 2.5.1

[२] बृ० 4.3.5

[३] ब्र०सू०शा०भा० 2.3.29

[४] बृ० 3.4.20

[५] मु० 1.1.6

जैनास्तावत् जीवात्मा देहपरिणामः इति वदन्ति। रामानुज-मध्व-निम्बार्कानुयायिनस्तु परमाणुस्वरूपः जीवात्मा इति मन्यन्ते। न तद्युक्तमिति ब्रुवाणाः अद्वैतिनः आत्मनः विभुत्वमेव सङ्गिरन्ते। तथा हि—आत्मनः देहपरिणामतायां स्वीकृतायाम् अकृत्स्नः असर्वगतः आत्मा इत्यापतति, तेन च घटादिवदनित्यत्वम् आत्मनः प्रसज्येत।[१] न तु आत्मनः अनित्यत्वम् अङ्गीक्रियते। अपि च, जीवात्मनः जन्मान्तरग्रहणं नानायोनिभ्रमणं च जैनैरपि स्वीक्रियते।[२] एवं सति आत्मनः देहपरिमाणत्वे स्वीकृते मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित् कर्मविपाकेन अनन्तरं हस्तिजन्म प्राप्नुवन् न कृत्स्नं हस्तिशरीरं व्याप्नुयात्, हस्तिशरीरपरिमाणस्य आत्मनः कर्मविपाकेन पतङ्गजन्म यदि स्यात् तर्हि पतङ्गशरीरे अल्पकाये प्रवेशो न स्यात्। एकस्मिन् एव वा जन्मनि शिशुदेहपरिमाणस्य आत्मनः यौवनदेहे व्याप्तिः न सम्भवेत्। आत्मनः प्रदीपवत् आधारानुरूपं सङ्कोच-विकासशालित्वेन एतत् सम्भवतीति चेत्, न। यथा गृहविशेषौज्ज्वल्यसाधकस्य प्रदीपस्य बृहत्तरे गृहे आलोकमान्द्यम्, क्षुद्रतरगृहे च आलोकप्राखर्यं दृश्यते, तथा देहविशेषपरिमाणस्य आत्मनोऽपि बृहत्तरे देहे चैतन्यमान्द्यप्रसङ्गात्, क्षुद्रतरे देहे च चैतन्यप्राखर्यप्रसङ्गात्। नापि जीवात्मनि अवयवानाम् आगमापगमाभ्याम् एतत् सम्भवति इति वक्तुं शक्यम्, अवयवानाम् आगमापगमस्वीकारे जीवात्मनः विकारित्वेन विनाशप्रसङ्गात्। एवं च आत्मनः देहपरिमाणत्वं मध्यमपरिमाणत्वं वा न युज्यते।

आत्मनः अणुपरिमाणवादिनस्तु आत्मा अणुपरिमाण इति वदन्तो जनाः - 'एषोऽणुरात्मा चेतसा वेदितव्यः' (मु० 3.1.9) इति, 'बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः .........' (श्वे० 5.9) इति, 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' (श्वे० 5.8) इति च श्रुतिवचनानि प्रमाणत्वेन उदाहृत्य भणन्ति[३] यत् –

श्रुतौ जीवात्मनः देहात् उत्क्रान्तिः, लोकान्तरगतिः, इहलोके आगतिः इत्यादिकं सविशदं वर्णितम् यथा 'स यदास्मच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति' (कौषी० 1.2),

---

[१] द्र० ब्र०सू०शा०भा० 2.2.34

[२] द्र० शा०वे०त०मी०, भा० 2.2.34

[३] द्र० ब्र०सू०शा०भा० 2.3.19-32, शा०वे०त०मी० पृ० 107-109

'तेन प्रद्योतेन एष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः' (बृ० 6.4.2) इति, 'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' (कौषी० 1.2) इति, 'तस्माल्लोकात् पुनरेति तस्मै लोकाय कर्मणे' (बृ० 4.4.6) इति च। न च सर्वव्यापिनः विभोः एतादृशं गमनागमनं सम्भवति—इति। तथा च अनुमानप्रयोगः—'जीवो न व्यापकः, उत्क्रान्तिमत्त्वात्, गतिमत्त्वात्, क्रियावत्त्वात्, खगशरीरवत्।' तस्मात् 'परमाणुरेवायं जीवः, न विभुः। कुतः उत्क्रान्त्यादिभ्यः। न च सर्वगतस्य तस्य ताः सम्भवेयुः' इति ।

**तदेवं समाधीयते**— जीवात्मनः अणुपरिमाणवत्त्वे तेन शरीरं व्याप्य अवस्थितिः न सम्भवेत् इति तदीयधर्मस्य चैतन्यस्यापि सर्वशरीरे उपलब्धिः न स्यात्। भवति हि चैतन्यस्य सर्वशरीरं व्याप्य उपलब्धिः। तत्र धर्मस्य धर्मिव्यतिरेकेण स्थित्यभावात् आत्मनः सर्वशरीरव्यापित्वं स्वीकरणीयम्। ननु यथा हरिचन्दनबिन्दुः देहैकदेशवर्ती अपि सकलदेहव्यापिनम् आह्लादं जनयति तथा आत्मनि देहैकदेशवर्ती सन् अपि सकलदेहव्यापिनीं उपलब्धिं करिष्यति इति चेत्, न। चन्दनबिन्दोः देहैकदेशावस्थितिः प्रत्यक्षगम्या। आत्मनः देहैकदेशावस्थितिस्तु प्रत्यक्षागम्यत्वात् सन्दिग्धा। सर्वशरीरव्यापि चैतन्यं तु प्रत्यक्षग्राह्यम् इति चैतन्यरूपगुणाधारस्य आत्मनोऽपि सर्वशरीरव्यापित्वं सिद्धम्। ''गुणिव्यतिरेकेण अस्य असम्भावितत्वाद् अन्यथा घटव्यतिरेकेणापि घटरूपं स्यात्।'' [१]

यद्यपि श्रुतौ क्वचित् क्वचिद् आत्मनः अणुपरिमाणवत्त्वं कथितं दृश्यते, तथापि भूयशः आत्मनः विभुत्वमेव अभ्यस्तम्। तथा हि— 'स वा एष महानज आत्मा'[२], 'सत्यं ज्ञानमनन्तं ब्रह्म'[३], 'आकाशवत् सर्वगतश्च नित्यः', 'नित्यं विभुं सर्वगतम्'[४], महतो महीयान् इत्येवमादिश्रुतिषु आत्मनः विभुत्वमेव घोषितम्। अपि च, परस्यैव ब्रह्मणः 'जीवेनात्मनानुप्रविश्य'[५] इति प्रवेशश्रवणात्, तत्त्वमसीत्यादि श्रुत्या परं ब्रह्म एव जीवः इति

[१] अ०सि० उद्०शा०वे०त०मी०
[२] बृ० 3.4.20
[३] तै० 2.1.1
[४] मु० 1.1.6
[५] छा० 6.3.2

ज्ञायते। जीवो ब्रह्माभिन्न इत्यत: जीवस्यापि परब्रह्मण इव विभुत्वम् अभ्युपगन्तव्यम्। तर्हि आत्मन: अणुपरिमाणवत्त्वं वदन्त्या: श्रुते: किं तात्पर्यमिति चेत् उच्यते— तत्र आत्मयाथात्म्यस्वरूपस्य दुर्विज्ञेयाभिप्रायेण, बुद्धिरूपोपाध्यभिप्रायेण जीवस्य अणुत्वेन निर्देश: इति बोद्धव्यम्। बुद्धिर्हि अतिसूक्ष्मत्वेन अणुपरिमाणवती इति तदुपहितस्य जीवात्मनोऽपि अणुपरिमाणत्त्वम् अभिप्रेतम् इत्यर्थ:। तथा च श्रुति:— 'बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्ट:'[1] इति। बुद्धिगुणसम्बन्धेनैव आराग्रप्रमाणत्वं अभ्युपगम्यते। अत: आत्मन: अणुत्वं तु औपचारिकम्; आनन्त्यम् (विभुत्वं) च पारमार्थिकम्। स्पष्टप्रतिपत्त्यर्थं भाष्यपङ्क्तिरिह द्रष्टव्या—

''कथं तर्ह्यणुत्वादिव्यपदेश इत्यत आह— 'तद्गुणसारत्वात्तु तद्व्यपदेश:' इति। तस्या बुद्धेर्गुणास्तद्गुणा इच्छा द्वेष: सुखं दु:खमित्येवमादयस्तद्गुणा: सार: प्रधानं यस्यात्मन: संसारित्वे सम्भवति स तद्गुणसार: तस्य भावस्तद्गुणसारत्वम्।...............तस्मात्तद्गुणसारत्वाद् बुद्धिपरिमाणेनास्य परिमाणव्यपदेश:, तदुत्क्रान्त्यादिभिश्च अस्योत्क्रान्त्यादिव्यपदेशो न स्वत:। तथा च— 'बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीव: स विज्ञेय: स चानन्त्याय कल्पते॥' (श्वे० 5.9) इत्यणुत्वं जीवस्योक्त्वा तस्यैव पुनरानन्त्यमाह। तच्च एवमेव समञ्जसं स्याद् यदौपचारिकमणुत्वं जीवस्य भवेत् पारमार्थिकं चानन्त्यम्। न ह्युभयं मुख्यमवकल्पेत। न चानन्त्यमौपचारिकमिति शक्यं विज्ञातुम्, सर्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात्। तथेतरस्मिन्नप्युन्माने............। एषोऽणुरात्मा चेतसा वेदितव्य: (मु० 3.1.9) इत्यत्रापि न जीवस्याणुपरिमाणत्वं शिष्यते, परस्यैवात्मन: चक्षुराद्यनवग्राह्यत्वेन ज्ञानप्रसादगम्यत्वेन च प्रकृतत्वात्। जीवस्यापि च मुख्याणुपरिमाणत्वानुपपत्ते:। तस्माद्दुर्ज्ञानत्वाभिप्रायमिदम् अणुत्ववचनम् उपाध्यभिप्रायं वा द्रष्टव्यम्''[2] इति।

---

[1] श्वे० 5.8

[2] ब्र०सू०शा०भा० 2.3.29

[अपि च उपनिषदि जीवहृदयं ब्रह्मणः गुहा इति, जीवदेहश्च ब्रह्मपुरम् इति चोच्यते। तत्र अतिसूक्ष्मं पद्ममेकं कल्प्यते। तस्मिन्नवच्छिन्नः आकाशः दहराकाश इत्युच्यते। स च दहराकाशः 'ब्रह्मकोषः' इत्युच्यते। स च ब्रह्मकोषः जीवस्य उपाधिरिति कल्प्यते। उक्तं च— 'कोषोपाधि-विवक्षायां याति ब्रह्मैव जीवताम्।'[1] तस्य ब्रह्मकोषस्य अतिसूक्ष्मत्वात्, अणुतुल्यत्वाद् वा तदुपहितस्य जीवस्यापि अणुत्वं क्वचित् निर्दिश्यते। उपाध्यभिप्रायेणैवेदम् अणुत्ववचनमिति स्पष्टम्]

एवं च, आत्मा एकः, निर्गुणः, नित्यः सर्वगतः विभुरित्युच्यते।

[1] प०द० 3.41

# ज्ञानोत्पत्तौ वृत्तेः प्रयोजनम्

**डा. विश्वनाथ हेगडे**

सहायकाचार्यः, अद्वैतवेदान्तविभागः

आत्मनः सर्वव्यापकत्वात् "**सत्यं ज्ञानमनन्तं ब्रह्म**" इत्यादिश्रुतेः[१] आत्मनः ज्ञानरूपत्वाच्च चैतन्यमेव प्रत्यक्षप्रमात्वेन वेदान्तिभिः अङ्गीक्रियते । तथा चोक्तं धर्मराजाध्वरीन्द्रेण "**प्रत्यक्षप्रमात्वत्र चैतन्यमेव**"[२] इति । आत्मनः प्रत्यक्षत्वे "**यत्साक्षात् अपरोक्षात् ब्रह्म** "[३] इत्यादिश्रुतिः प्रमाणम् । तथा च चैतन्यरूपमेव ज्ञानम् अबाधितघटादिवृत्त्यवच्छिन्नं घटादिप्रमा इत्युच्यते । अत एव विशिष्टं चैतन्यं प्रति चक्षुरादेः करणत्वात् चक्षुरादिकं प्रत्यक्षप्रमाणं भवति । ननु चैतन्यमनादि तत् कथं चक्षुरादेः तत्करणत्वेन प्रमाणत्वम् इति चेत् चैतन्यस्य स्वरूपतः अनादित्वेन इन्द्रियाजन्यत्वेऽपि वृत्तिविशिष्टचैतन्यम् इन्द्रियजन्यं तदेव घटादि प्रत्यक्षप्रमा इत्युच्यते । वृत्तेः जडान्तःकरणधर्मत्वेन जडत्वात् वृत्तौ ज्ञानत्वव्यवहारः गौणः । तथा चोक्तं विवरणे "**अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्**"[४] इति ।

ननु अन्तःकरणस्य "**तन्मनोऽसृजत**"[५] इत्यादिश्रुतेः सादिद्रव्यत्वेन सावयवत्वात् वृत्तिरूपेण परिणामः सम्भवति । वृत्तिरूपज्ञानं तु अन्तःकरणस्य धर्मः । तथा च श्रुतिः "**कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव**" इति । अत्र धीशब्देन वृत्तिरूपज्ञानम् अभिहितम् । ईदृशं वृत्तिरूपावच्छेदकमादायैव चैतन्यरूपे ज्ञाने सादित्वादिव्यवहारः । तथा च अविद्यान्तःकरणान्यतरपरिणामत्वं वृत्तित्वम् । तत्र भ्रमः तद्विषयश्च अविद्यापरिणामः । शुक्त्यादिवृत्तिश्च अन्तःकरणपरिणामः ।

इत्थम् अन्तःकरणस्य सावयवत्त्वात् विषयस्य इन्द्रियसन्निकर्षे सति इन्द्रियप्रणालिकया बहिर्निःसृत्य घटादिविषयदेशं गच्छति । तत्र तदाकारेण परिणमते । अज्ञानं च चैतन्याश्रितत्वात् यथा चैतन्यं घटादिविषयदेशे वर्त्तते तथैव तदाश्रितेन अज्ञानेन

---

[१] तै.उ ब्र.व प्रथमोनुवाकः

[२] वे.प.- प्र.प

[३] बृ.उ ३.४.१

[४] पञ्चपादिकाविवरणम् ।

[५] बृ.उ

घटादयः विषयाः आवृताः भवन्ति । घटाद्याकारेण परिणतान्तःकरणवृत्त्या तद्देशस्थम् अज्ञानावरणं नश्यति । एवं च वृत्त्यवच्छिन्नविषयावच्छिन्नचैतन्ययोरभेदो जायते । वृत्तिविषयरूपोपाध्योः विषयरूपैकदेशस्थत्वात् उपहितयोः अपि अभेदो भवति । तथा च प्रमातृचैतन्यम् अन्तःकरणावच्छिन्नमपि तदभिन्नमेव भवति । इत्थं प्रत्यक्षज्ञानार्थं वृत्तिं स्वीकुर्वन्ति वेदान्तिनः ।

अस्याः वृत्तेः बहिर्निर्गमनस्य प्रयोजनविषये सन्ति मतानि भिन्नानि । तत्र आवरणाभिभवार्था वृत्तिः इत्येकं मतम् । अस्मिन् मते घटावच्छिन्नचैतन्यस्य आवरकं किञ्चिदज्ञानं अभ्युपगम्यते । अन्यथा अविद्योपहितस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवाभिन्नतया तदुपाध्योः घटाविद्ययोश्च एकदेशस्थत्वात् विषयेन्द्रियसन्निकर्षाभावदशायामपि विषयावभासकस्य अनावृतचैतन्यस्य घटादिविषयेण साकं सम्बन्धसत्त्वात् जीवसाक्षिणः सर्वदा घटादिभानप्रसङ्गः स्यात् । अतः तैः आवरकं किञ्चिदज्ञानं स्वीक्रियते । तदानीं तु न सर्वदा घटादेः भानप्रसङ्गः । अनावृतचैतन्यस्यैव भानप्रसङ्गात् । इदं च विषयावरकमज्ञानं मूलाज्ञानमिति स्वीकर्तुं न शक्यते । यतः मूलाज्ञानस्य ब्रह्मज्ञानमात्रबाध्यत्वात् संसारदशायाम् अबाध्यत्वात् सर्वदा घटादिभानं स्यात् । तस्मात् घटाद्यावरकज्ञानं मूलाविद्यातादात्म्योपपन्नम् अवस्थाज्ञानं स्वीक्रियते । तच्च आवरणं संसारदशायां यदि न बाध्येत तदानीं घटादीनां प्रत्यक्षत्वमेव न स्यात् । किन्तु तस्य आवरणस्य यदि भङ्गः स्वीक्रियते तदानीं घटादिभानरूपव्यवहारस्य व्यवस्था कल्पयितुं शक्या । इत्थं घटादिज्ञानार्थम् आवरणभङ्गः अभ्युपगम्यते ।

इदं च अस्य विषयावरकस्य आवरणस्य भङ्गः केन क्रियते इति जिज्ञासायां केवलसाक्षिचैतन्येन आवरणनाशो भवति इति न वक्तुं शक्यते । यतः साक्षिचैतन्यं तु आवरणभासकमेव इत्यतः आवरणेन साकं तस्य विरोधो नास्ति । अतः साक्षिणा अज्ञानावरणं न नश्यति । **यत्र यद्भासकत्वं तत्र तदनिवर्तकत्वम्** इति व्याप्तिः । या वृत्तिः यद्विषया प्रत्यक्षा सा तदावरणभञ्जिका इति व्याप्त्या वृत्त्युपहितं चैतन्यं तन्नाशकं स्यात् इत्यपि स्वीकर्तुं नैव शक्यते । यतः वृत्त्युपहितचैतन्यस्य परोक्षापरोक्ष्यसाधारणत्वात् । तथा च परोक्षस्थलेऽपि अविद्यान्तःकरणवृत्त्युपहितचैतन्ययोः सत्त्वात् आवरणनिवृत्त्यापत्तेः जीवस्य सर्वदा विषयभानप्रसङ्गः । तस्मात् परोक्षव्यावृत्तस्य अपरोक्षवृत्तिविशेषस्यैव आवरणभञ्जकत्वं स्वीकर्तव्यम् ।

ननु वृत्तिविशेषस्य अज्ञाननाशकत्वं न युक्तं, तस्य जडत्वात् ज्ञानस्यैव अज्ञाननाशकत्वाच्च इति शङ्कायाम् अपरोक्षवृत्त्युपहितचैतन्यस्य आवरणभङ्गजनकत्वं स्वीक्रियते । यथा तृणतूलादिभासकस्य सूर्यप्रकाशस्य तद्दाहकत्वेऽपि सूर्यकान्तावच्छेदेन स्वभास्यानां तेषां यथा दाहकत्वं सम्भवति तद्वत् स्वतः अविद्यातत्कार्यभासकस्य चैतन्यस्य अविद्याद्यनिवर्तकत्वेऽपि वृत्त्यवच्छेदेन चैतन्यस्य तन्निवर्त्तकत्वं युक्तम् । तथा च वृत्त्युपहितचैतन्यस्य आवरणाभिभवार्थत्वे वृत्तेरपि अवच्छेदकतया आवरणाभिभवार्था वृत्तिः इति स्वीक्रियते । सम्बन्धार्था वृत्तिः इति अपरं मतम् । अविद्योपाधिकस्य अपरिच्छिन्नजीवस्य अन्तःकरणोपाधिकस्य परिच्छिन्नजीवस्य च विषयेण सह सम्बन्धार्थं वृत्तिः स्वीकार्या । अस्मिन्नपि पक्षे अविद्याप्रतिबिम्बितस्य जीवस्य व्यापकत्वात् स्वत एव सर्वगतः इति तत्सम्बन्धार्था वृत्तिः न स्वीकरणीया इति आशङ्का भवितुमर्हति । तत्रोच्यते – अविद्योपाधिकस्य अपरिच्छिन्नस्य जीवस्य सर्वगतत्वेन घटादिप्रदेशे विद्यमानोऽपि तत्तद्विषयाकारापरोक्षवृत्तिविरहदशायां न घटादिकम् अवभासयति । तत्तद्विषयाकारदशायां तु भासयति । अतः जीवस्य सर्वगतत्वनिबन्धनः विषयेण सह जीवस्य यः सम्बन्धः सः घटादिविषयभानप्रयोजको न भवति । अपि तु अपरोक्षवृत्त्यधीनसम्बन्ध एव ।

ननु वृत्तिविरहदशायाम् अपरिच्छिन्नस्य जीवस्य विषयसम्बन्धाभावो न युक्तः । न हि तत्र विद्यमानस्य तत्र तत्सम्बन्धाभावः कस्यचित् दृष्टचरः । यदि त्वसङ्गदृष्ट्या तत्सम्बन्धाभावः कल्प्यते तर्हि वृत्त्यापि तत्सम्बन्धो न घटते असङ्गत्वविरोधात् । 'असङ्गो न हि सज्जते[1]' इत्यादिश्रुत्या चैतन्यस्य प्रपञ्चसम्बन्धनिषेधावगमात् इति चेत् उच्यते - न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषिध्यते । अपि तु घटादिभानप्रयोजकः सम्बन्धविशेष एव निषिध्यते । तथा च सम्बन्धाभावाभिदानं न सम्बन्धसामान्यनिषेधविषयकं, यावद्विशेषाभावस्य सामान्याभावरूपत्वात्, यत्किञ्चित् विशेषसत्त्वे सामान्यनिषेधायोगात् । किन्तु सम्बन्धविशेषनिषेधविषयकम् । कोऽसौ सम्बन्धविशेषः इति चेत् उच्यते स च सम्बन्धविशेषः विषयस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकभावलक्षणः ज्ञातृज्ञेयत्वलक्षणः कादाचित्कः विषयाकारवृत्तिनिबन्धनः ।

कर्तुः जीवस्य ज्ञातृत्वे घटादेः ज्ञेयत्वे तदाकारवृत्तिविषयत्वम् अपेक्षितम् इति वृत्तेः तथाविधसम्बन्धप्रयोजकत्वम् इति भावः । ननु ज्ञातृज्ञेयत्वलक्षणसम्बन्धोऽपि सर्वदैव अस्ति ।

---

[1] बृ.उ.३।९।२६

सर्वगतस्य अहङ्कर्तुः ज्ञातुः स्वत एव सर्वविषयसम्बन्धात् इत्यतः कादाचित्कम् इति स्वीक्रियते । यथा सर्वगतस्य जीवस्य ग्रामसम्बन्धे विद्यमानेऽपि कर्तृसमवेतया गतिक्रियया कर्तृसमवेतो ग्रामव्यापी सम्बन्धविशेषः आधीयते । तद्वत् वृत्तिरूपया अन्तःकरणपरिणामभूतया ज्ञानक्रियया अहङ्कर्तुः जीवे ज्ञातृज्ञेयत्वलक्षणो विषयव्यापी सम्बन्धविशेषः आधीयते । क्रियायाः स्वाश्रयातिशयजनकत्वात् । तत्र प्रयोजकस्य कादाचित्कत्वात् प्रयोज्यस्य तथाविधसम्बन्धस्य कादाचित्कत्वम् इति भावः ।

तथा हि घटादिकं न जीवचैतन्याभिव्यञ्जनसमर्थम् अस्वच्छस्वभावद्रव्यत्वात् । घटाद्याकारवृत्तेः सम्बन्धदशायां तु घटादेः अप्रकाशरूपः जाड्यधर्मः वृत्त्या अभिभूतो भवति । तथा च वृत्तेः विषयस्य च व्याप्तिदशायाम् अन्तःकरणावच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोः अभेदात् विषयस्य अप्रकाशस्वभाव-त्वापगमेन प्रकाशो भवति । अत एव वृत्त्या विषयेषु प्रकाशस्वभावत्वादानात् जडस्यापि विषयस्य चिद्व्यञ्जकत्वयोग्यत्वमायाति इति वृत्तेः विषयव्याप्त्यनन्तरं घटादिकं विषयचैतन्यम् अनावृतं करोति । घटादेः चैतन्याभिव्यञ्जकत्वं च चैतन्यप्रतिबिम्बग्राहित्वम् । तथा च वृत्तिमदन्तःकरणसंसर्गात् घटादिकं जडमपि जाड्याभिभवलक्षणं चैतन्याभिव्यञ्जकत्वयोग्यत्वं प्राप्तम् अपरोक्षतया चाभिव्यक्तं विषयावच्छिन्नचैतन्यावरणं निवर्तयति । तथा चोक्तं विवरणे "अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यताम् आपादयति" इति । तथा च यथा स्वच्छजलसंयोगात् कुड्यादेरपि द्रव्यान्तरप्रतिबिम्बग्राहित्वं तथा स्वच्छान्तःकरणसंसर्गात् घटादेः चैतन्यप्रतिबिम्बितग्राहित्वम् ।

ननु विषयगतजाड्याभिभवैः विषयस्य चिदभिव्यञ्जकत्वम् । स एव तु जाड्याभिभवो नैव घटते, वृत्तेः अन्तःकरणगतत्वेन जाड्याभिभवस्य विषयगतत्वेन तयोः वैयधिकरण्यात् । वैयधिकरण्ये च कार्यकारणभावायोगात् । तस्मात् वृत्तेर्जाड्याभिभावकत्वं विषयस्य अभिव्यञ्जकत्वं च नैव युक्तम् इति चेत् ? उच्यते । एवंविधाभिव्यञ्जकत्वस्य सिद्ध्यर्थमेव वृत्तेः अपरोक्षस्थले बहिर्निर्गमनम् अङ्गीकृतम् । परोक्षस्थले तु वह्न्यादेः वृत्तिसंयोगाभावेन चैतन्यानभिव्यञ्जकतया नापरोक्षत्वम् । तथा च वह्न्यादौ विषये इन्द्रियसम्बन्धाभावेन इन्द्रियद्वारा बहिर्गमनाभावात् वृत्तेः न विषयसंयोगः । तथा च व्यङ्ग्यव्यञ्जकभावसम्बन्धार्था वृत्तिः इति मते विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्जकत्वम् इत्यर्थः । इत्थं जीवस्य अपरिच्छिन्नत्वे अपि वृत्तेः सम्बन्धार्थत्वम् एवं निरूपितम् ।

जीवस्य परिच्छिन्नत्वपक्षे तु अन्तःकरणोपाधिकः जीवः इति तस्य लक्षणम् । तस्य घटादिदेशसम्बन्धो नास्ति इत्यतः घटादीनाम् उपादानत्वं तस्य न सम्भवति । अर्थात् स्वरूपतो जीवचैतन्यस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदेऽपि उपाध्यवच्छेदेन भेदात् अन्तःकरणावच्छिन्नस्य तस्य अन्तःकरणदेशत्वेन घटादिदेशत्वाभावात् न घटाद्युपादानत्वम् । कार्यान्वयेन एव कार्योपादानत्वात् । अत एव अस्य कल्पितभेदस्य न विषयप्रकाशकत्वं विषयदेशासम्बन्धात् । अस्मिन् मते घटाद्युपादानं तु ब्रह्मैव । तस्य मायोपहितचैतन्यस्य सकलघटाद्यन्वयित्वात् । एतद् घटाद्यधिष्ठानं ब्रह्मचैतन्यमेव घटाद्यवभासकम् । तेन तस्य सम्बन्धात् । जीवचैतन्यं तु न घटाद्यवभासकं तेन तस्य सम्बन्धाभावात् । प्रकाशकेन विषयाधिष्ठानब्रह्मचैतन्येन अभेदाभावाच्च । अत एव घटादि अवभासाय घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिध्यर्थं घटाद्याकारा वृत्तिः स्वीकरणीया । प्रकाशकब्रह्मचैतन्येन जीवचैतन्यस्य एकीभावात् जीवस्य प्रकाशकत्वम् । स च एकीभावः वृत्त्यधीनः इति जीवब्रह्मणोः ऐक्यसिद्ध्यर्थं वृत्तिः अभ्युपगन्तव्या ।

तथा च वृत्त्या जीवब्रह्मणोः अभेदे सिद्धे जीवस्य विषयप्रकाशोपपत्तिः । यद्यपि जीवचैतन्यविषयाधिष्ठानब्रह्मचैतन्ययोः उपाधिकृतः भेदः वर्त्तते तथापि वृत्तिकृतः तयोः अभेदः भवितुमर्हति । एवं प्रकाशकेन विषयाधिष्ठानब्रह्मचैतन्येन जीवचैतन्यस्य एकीभावात् जीवस्य प्रकाशकत्वम् । स च एकीभावः वृत्त्यधीनः इति जीवचैतन्यविषयाधिष्ठानचैतन्ययोः ऐक्यसिध्यर्थं वृत्तिः अभ्युपगन्तव्या । वृत्त्या तयोः अभेदे सिद्धे च जीवस्य विषयानुभवः उपपन्नो भवति ।

## अनुशीलितग्रन्थसूची


१. वेदान्तपरिभाषा
२. शिखामणिटीका
३. मणिप्रभाटीका
४. सिद्धान्तलेशसङ्ग्रहः
५. बृहदारण्यकोपनिषत्
६. पञ्चपादिकाविवरणम्

# साक्षिस्वरूपम्

**विद्वान् निरञ्जन भट्टः**
अतिथ्यध्यापकः , अद्वैतवेदान्तविभागः

सर्वानर्थसंसारकारणीभूताज्ञाननिवृत्तिपू - र्वकपरमपुरुषार्थसाधननिरूपणमुखेन सर्वलोकान् अनुजिघृक्षया प्रवृत्तमिदं वेदान्तशास्त्रम् ।

**यया यया भवेत्पुसां व्युत्पत्तिः प्रत्यगात्मनि ।**
**सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता[१] ॥**

इति वार्तिककारोक्तरीत्या स्वशिष्येभ्यः परतत्त्वबुबोधयिषया अनेके आचार्याः बहुविधप्रक्रियाश्रयणद्वारा अद्वितीयपरमात्मस्वरूपं प्रत्यपीपदन् । तच्च वैविध्यं श्रीमदप्पय्यदीक्षितैः "सिद्धान्तलेशसङ्ग्रहः" इत्याख्ये ग्रन्थे तत्त्वविजिज्ञासूनामुपकाराय सङ्गृहीतम् । परिच्छेदचतुष्टयात्मकेऽस्मिन् सिद्धान्तलेशसङ्ग्रहे भगवत्पादशङ्कराचार्यादारभ्य अप्पय्यदीक्षितपर्यन्तानाम् अद्वैताचार्याणां तत्त्वबोधनप्रकारलेशाः क्रोडीकृत्य प्रतिपादिताः । अद्वैतसम्प्रदाये अन्यादृशोऽयं ग्रन्थः अनुपमत्वेन वरीवर्ति । ग्रन्थस्यास्य प्रथमपरिच्छेदः सर्वेषां वेदान्तवाक्यानां प्रत्यगभिन्ने ब्रह्मणि समन्वयनिरूपणपरः । द्वितीयपरिच्छेदः उक्तसमन्वये प्रत्यक्षादिविरोधमुद्भाव्य श्रुत्या तस्य अविरोधं प्रतिपादयति । तृतीयपरिच्छेदः ब्रह्मज्ञानसाधनं कर्म अथवा ज्ञानं, तयोः संबन्धः कीदृशः इत्यादिविचारान् परामृशति । चतुर्थपरिच्छेदः जीवस्य मुक्त्यवस्था कीदृशी इति विस्तरेण प्रतिपादनं करोति । प्रबन्धेऽस्मिन् प्रथमपरिच्छेदे निरूपितानेकविचारेषु साक्षिस्वरूपम् इति विषयः प्रस्तूयते ।

अथ कोऽयं साक्षी जीवातिरेकेण व्यवह्रियते ? इति प्रश्नस्योत्तररूपेण विद्यारण्यस्वामिभिः कूटस्थदीपे उक्तम् – 'देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणात् निर्विकारत्वाच्च साक्षीत्युच्यते' इति । अत्र द्रष्टृत्वं नाम दृष्टिक्रियाकर्तृत्वम्, निर्विकारत्वं कर्तृत्वादिविकारराहित्यम् । तयोर्धर्मयोः परस्परविरुद्धत्वेन लक्षणासम्भवः इति संशयः उत्पद्येत । तन्निरासाय 'साक्षाद् द्रष्टरि संज्ञायाम्[२]' इति

[१] बृ.उ.वा. १.४.४०२
[२] पा.सू. ५.२.९१

सूत्रमुदाहृतम् । साक्षादिति पदात् द्रष्टर्यर्थे 'इनि'प्रत्यये साक्षिशब्दः निष्पन्नो भवति । साक्षाद् द्रष्टा साक्षीति प्राप्तम् । यथा प्रकाशस्वरूपे सवितरि 'सूर्यः प्रकाशते' इत्यनेन प्रकाशकर्तृत्वव्यवहारः औपचारिकः, तथा दृष्टिस्वरूपे कूटस्थे द्रष्टृत्वमौपचारिकम् । लोकेऽपि उदासीनत्वबोद्धृत्वरूपधर्माभ्यामेव साक्षित्वं प्रसिद्धं दृश्यते । तद्यथा – द्वाभ्यां विवद्यमाने सति ताभ्यामतिरिक्तः योऽपरोक्षतया बोद्धा उदासीनश्च भवति सः साक्षीति व्यवह्रियते । तत्रैव उदसीनत्वविशिष्टस्य स्तम्भादेः साक्षित्ववारणाय बोद्धृत्वमपि विशेषणतया आवश्यकमेव । तस्मात् उदासीनत्वे सति बोद्धृत्वं साक्षित्वमिति लक्षणं प्राप्तम् ।

'देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणात् निर्विकारत्वाच्च साक्षीत्युच्यते' इत्यत्र स्थूलसूक्ष्मदेहद्वयभासकत्वं तु अन्तःकरणवृत्तेरपि वर्तत इत्यतः साक्षिचैतन्यस्य नापेक्षा इति शङ्का स्यात् । तत्रोच्यते – अन्तःकरण्स्य प्रकाशात्मकत्वेऽपि जडत्वात् चैतन्यसंसर्गं विना देहद्वयावभासकत्वं न सम्भवति इति । तथा च स्वप्रकाशनित्यचैतन्याभ्युपगमेन तत्प्रतिबिम्बसहितानां वृत्तीनां वस्त्ववभासकत्वं सिध्यति । सर्वत्र व्याप्तं नित्यं कूटस्थचैतन्यमुदासीनत्वेन वर्तत इत्यत एव वृत्तराहित्यावस्थायामपि देहद्वयभानमुपपद्यते । जीव एव साक्षी इति व्यवह्रियते इति चेत् तदपि न । जीवचैतन्यरूपप्रतिबिम्बगर्भात् अन्तःतरणात् वृत्तीनामुदयः इत्युक्तत्वात् अन्तःकरणप्रतिबिम्बो जीवः । तस्य बिम्बचैतन्यरूपः कूटस्थः साक्षी इति उभयोर्भेदः प्रतिपादितः । तस्मादेव अहङ्कारसुखदुःखादीनां तत्सद्भावकाले एव साक्षिभास्यत्वम् । जीवस्यापि कूटस्थचैतन्ये एव कल्पितत्वात् साक्षिप्रकाशितार्थानामनुभवो जीवस्य उपपद्यते । तत्तद्देहावच्छेदकभेदेन तत्तजीवतादात्म्यापन्नस्य साक्षिणो भेदाभ्युपगमात् यज्ञदत्तादिदेहान्तरावच्छिन्नसाक्षिकानुभवो देवदत्तादिदेहावच्छिन्नसाक्ष्यन्तरस्य नोपपद्यते ।

जीवकूटस्थरूपचैतन्यद्वयसत्त्वेऽपि जीव एव साक्षी भवतु इति न वक्तव्यम् । अनेकविधलौकिकवैदिककर्तृत्वाभिमानिनः जीवस्य औदासीन्येन द्रष्टृत्वं न सम्भवति । तथा च श्रुतिरपि कर्तृत्वाद्यभिमानरहितोदासीनत्वादिरूपसाक्षिस्वरूपं वदति – **साक्षी चेता केवलो निर्गुणश्च** [१] इति । केवल इत्यस्य अकर्तृत्वम् उदासीनत्वं चेत्यर्थः । आत्मनो

[१] श्वे.उ. ६-११

ज्ञानादिगुणविशिष्टत्वं निवारयति निर्गुण इति पदम् । एवमेव कूटस्थादन्यो जीवः पुण्यादिकर्मफलं भुङ्क्ते । साक्षी तु कर्मफलभोगमकुर्वन् स्वयं बुद्ध्यादिसाक्षितया प्रकाशते इति श्रुतिरेव तयोर्भेदं समुपपादयति । तद्यथा –

**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति**[१] **॥**

इति । एतावता कूटस्थदीपोक्तसाक्षिस्वरूपं प्रतिपादितम् ।

पञ्चदशीग्रन्थस्य नाटकदीपप्रकरणे नृत्यशालास्थितदीपदृष्टान्तोदाहरणमुखेन साक्षिस्वरूपं प्रतिपाद्यते । तदुक्तम् –

**नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम् ।**
**दीपयेदविशेषेण तदभावेऽपि दीप्यते**[२] **॥**

इति । एवं तदर्थो व्याख्यातः – यथा नृत्यशालायां विद्यमानो दीपः राजानं सभायामुपस्थितान् जनान् नर्तकीं च तेषां सद्भावे भासयति, तेषामभावेऽपि स्वयं दीप्यते । तद्वत् साक्षी अपि विषयभोगाभोगप्रयुक्तहर्षविषादादिमत्त्वात् प्रभुतुल्यम् अहङ्कारविशिष्टं जीवम्, प्रभुपरिसरवर्तिसभ्यतुल्यान् अहङ्कारपरिसरवर्तिविषयान्, तालादिधारिपुरुषैः अनुवर्त्यमाननर्तकीतुल्याम् इन्द्रियादिभिरनुवर्त्यमानां बुद्धिं च अवभावसयति निर्विकारत्वेन रूपेण । सुषुप्त्यादौ अहङ्काराद्यभावेऽपि दीप्यमानं चित्प्रतिबिम्बिताहङ्काररूपजीवभ्रमस्य अधिष्ठानभूतं च कूटस्थचैतन्यमेव साक्षीति सिद्ध्यति । तदत्र विवक्षितार्थो भवति यत् 'कूटस्थदीपे यः साक्षी जीवाद्भेदेन दर्शितः, स एवं नाटकदीपेऽपि जीवाद्भेदेन दर्शित' इति ।

साक्षिणः ईश्वराद्भेदोऽपि सिद्धो भवति उदासीनत्वेन बोद्धृत्वादेव । जगत्सृष्टिपालनादिकर्तृत्वात्तस्य उदासीनत्वासम्भवात् । ततश्च परोक्षत्वादपि ईश्वरस्य जीवं प्रति बुद्ध्यादिसाक्षित्वेन नित्यापरोक्षसाक्षित्वासम्भवात् । तस्मात् जीवेश्वरविभागरहितं शुद्धं कूटस्थपरमात्मचैतन्यमेव साक्षीति शैवपुराणोक्तं पञ्चदश्याम् उद्धृतम् । तद्यथा –

**इति शैवपुराणेषु कूटस्थः प्रविवेचितः ।**
**जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः**[३] **॥**

---

[१] श्वे.उ. ४-६
[२] प.द.ना.दी.११
[३] प.द.८-५९

इति । अत्र 'केवलः शिवः' इत्यस्य उदासीनः शुद्धः परमात्मेत्यर्थः । तेन ईश्वरत्वादिधर्मरहितः चिदात्मैव साक्षीति प्रतिपादितं भवति ।

इदमेव ईश्वरत्वादिरहितं साक्षिस्वरूपं तत्त्वप्रदीपिकायामपि प्रतिपाद्यते । अन्तःकरणप्रतिबिम्बितचित्स्वरूपजीवानां प्रत्यगधिष्ठानभूततया विशुद्धं जीवेशादिभेदरहितं ब्रह्मैव जीवाभेदेन तत्तज्जीवाधिष्ठानतया प्रतिशरीरं भेदं प्राप्तमिव साक्षीति व्यवह्रियते ।

"एको देवः सर्वभूतेषु गूढः" इति श्रुत्युक्तं देवत्वं यद्यपि हिरण्यगर्भादिसाधारणं तथापि तेषु इतरधर्माणामभावेन देवत्वं परमेश्वरस्यैव । तस्यैव रूपभेदो जीवस्य प्रवृत्तिनिवृत्त्यादीनां नैरन्तर्येण बोद्धा उदासीनश्च सः साक्षीति कथ्यते । अज्ञानाद्यवभासद्वारा 'अहं कर्ता, अहं सुखी' इत्यादिव्यवहारनिर्वाहकत्वेन च साक्षिचैतन्यस्य जीवस्यान्तरङ्गत्वं सिध्यति । सुषुप्त्यादावपि साक्ष्यभूतान्तःकरणतद्वृत्त्यादेः उपरतत्वेऽपि तदवस्थास्थितमूलाज्ञानरूपसाक्ष्यस्य व्यञ्जकत्वेन साक्षिचैतन्यमेव प्राज्ञः इति व्यवहारमापद्यते । तत्र सुषुप्त्युत्क्रान्तिविषयकवाक्यद्वयं प्रमाणत्वेन दीयते । यथा –

**अयं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् ।**[१]

इति सुषुप्तिविषयकं वाक्यं सुषुप्तौ जीवः परमात्मना सह उपाधिलयादेकीभूतः जाग्रत्प्रपञ्चं स्वाप्नप्रपञ्चं च किञ्चिदपि न वेद इत्यर्थं वेदयति । तथैव –

**प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति**[२] ।

इति उत्क्रान्तिविषयकं वाक्यं प्राज्ञेनात्मना अधिष्ठितः वेदनावशात् शब्दं कुर्वन् शरीरात् निर्गच्छति इत्यर्थं व्यञ्जयति । एतद्वाक्यद्वयमपि जीवाद् भेदेन प्रतिपादितः प्राज्ञः परमेश्वरः । स एव साक्षिपदवाच्यः इति कौमुदीकाराणां मतम् ।

इममेव पक्षम् उपोद्बलयन्ति तत्त्वशुद्धिकाराः दृष्टान्तदर्शनमुखेन । यथा 'इदं रजतम्' इति भ्रमस्थले रजताभेदेन प्रतीयमानोऽपि इदमंशः वस्तुतः शुक्त्यंशान्तर्भूतः रजताभिन्नत्वेन प्रतिभासते । एवमेव वस्तुगत्या ब्रह्मकोटिरपि साक्षी कल्पिततत्तज्जीवाधिष्ठानरूपेण 'अहं सुखमनुभवामि' इत्यादिप्रतिभासकत्वेन तत्तज्जीवाभिन्नो भवति इति ।

---

[१] बृ.उ.४-३-२१

[२] बृ.उ. ४-३-३७

एतावता जीवसाक्षिणोः भेदपक्षाः उपस्थापिताः । ततः तयोरभेदपक्षो यथा – "अविद्योपाधिको जीव एव साक्षाद् द्रष्टृत्वात् साक्षी" इति । अकर्तृत्वं द्रष्टृत्वं चेत्युभयमपि जीवे एव सम्भवति । स्वयमसङ्गः उदासीनः प्रकाशस्वरूपो जीवः अन्तःकरणप्रतिबिम्बितत्वेन बुद्धिप्रयुक्ततादात्म्यापन्नः कर्तृत्वाद्यारोपभाग् भवति । 'एको देवः' इत्यस्मिन् मन्त्रेऽपि ब्रह्मणः जीवभावापन्नत्वेनैव साक्षित्वम् अभिप्रेतम् । ब्रह्मसूत्रभाष्येऽपि "गुहां प्रविष्टावात्मानौ न तद्दर्शनात्[१]" इत्यधिकरणे 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे[२]' इति मन्त्रे 'गुहां प्रविष्टौ' इत्यनेन जीवपरमात्मानावेव विवक्षितौ इति निश्चीयते । तत्रैव 'द्वा सुपर्णा' इत्ययं मन्त्रोऽपि जीवेश्वरोभयपरः । 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति वाक्येन जीवो विवक्षितः । 'अनश्नन्यः' इत्यनेन च परमेश्वरो विवक्षित इति विरोधो नास्तीति केचन अभिप्रयन्ति ।

अविद्योपाधिकः चैतन्यप्रतिबिम्बरूपजीव एव साक्षी इति यदि पूर्वोक्तम् अभ्युपगम्यते । तर्हि उपाधिभूताविद्यायाः सर्वशरीरसाधारणत्वात् पुरुषान्तरान्तःकरणस्यापि पुरुषान्तरसाक्षिसम्बन्धोपपत्त्या प्रत्यक्षत्वं स्यात् । अन्तःकरणं साक्षिभास्यमित्यतः साक्षिसाक्ष्याभेद एव तत्प्रत्यक्षत्वप्रयोजकं न तु प्रमात्रभेदः । अतः अविद्योपहितत्वरूपेण जीवः साक्षी भवितुं नार्हति । अतः अन्तःकरणोपहितचैतन्यत्वं साक्षित्वं वक्तव्यम् । एवमुक्ते सति प्रतिपुरुषम् अन्तःकरणं भिद्यते इत्यतः अन्तःकरणोपहितचैतन्यरूपः साक्षी अपि प्रतिशरीरं भिन्नः । तस्मात् पूर्वोक्तो दोषः परिहृतो भवति । सुषुप्तिकाले "अथास्मिन् प्राण एवैकधा भवति[३]" इति प्राणशब्दवाच्ये परमात्मनि एकीभूतत्वेन प्रमातृलयः प्रदर्शितः । तदा प्रमात्रभावात् सुषुप्तिगताज्ञानसुखादीनामनुभवः साक्षिणः एव भवति । अत एव उत्थितस्य 'न किञ्चिदवेदिषं सुखमहमस्वाप्सम्' इति स्मरणसम्भवः । तथा च सुषुप्तिकाले साक्षिप्रमात्रोरभेदायोगात् प्रमातुः भिन्न एव साक्षी इति सिध्यति । अतः अविद्योपाधिके जीवे अन्तःकरणं विशेषणतया प्रमातृत्वप्रयोजकं भवति । तदेव अन्तःकरणं जीवस्य उपाधितया साक्षित्वप्रयोजकमिति तयोर्भेदः । एवं लक्षणे सति अन्तःकरणविशिष्टस्य प्रमातुः

[१] ब्र.सू.१-२-११

[२] क.उ.१-३-१

[३] कौ.उ.३-३

कर्तृत्वभोक्तृत्वसद्भावेऽपि उपहितस्य साक्षिणः उदासीनत्वात् विरोधो न सम्भवति इति केचन प्रतिपादयन्ति । अयमेव पक्षः वेदान्तपरिभाषायामपि समर्थितः । तस्मात् अविद्योपाधिको जीव एव अन्तःकरणविशेषणत्वोपाधित्वाभ्यां प्रमातृत्वं साक्षित्वं च आपद्यते इति सिद्धं भवति ।

एवं सर्वावभासककूटस्थसाक्षिचैतन्यरूपपरमात्मज्ञानार्थमेव एता नैकविधप्रक्रियाः आचार्यैः सङ्गृहीताः । तासां मुख्यमुद्देश्यं तु उपनिषत्प्रतिपादिता नित्यनिरतिशयाखण्डानन्दस्वरूपप्राप्तिरेव ।

# मीमांसाशास्त्रपरिचयः

**आचार्यः रवीन्द्र अम्बादस मुळे**

सञ्चालकः, संस्कृतप्रगताध्ययनकेन्द्रम्

सावित्री बाई फुळे पुणेविद्यापीठम्, पुणे

"वेदोऽखिलो धर्ममूलम्" इति स्मृत्या सकलस्य धर्मस्य मूलभूतप्रमाणं वेदः । स च वेदः अपौरुषेयः इति मीमांसकानां सिद्धान्तः । जगतीतले विद्यमानः सर्वोऽपि विषयः वेदे एव समुपलभ्यते । "श्रुतेरिवारर्थं स्मृतिमन्वगच्छत्" इत्यादि स्मृतिपर्यालोचनया स्मृतिरपि वेदार्थमेव अनुवदति । तादृशस्मृतीनां धर्मे प्रामाण्यं भवति । आस्तिकदर्शनानां प्रमाणभूतं भवति वेदः । अतः सकलस्य संस्कृतवाङ्मयस्य परमप्रमाणं वेदः । स च वेदः मन्त्रब्राह्मणात्मकः इति आपस्तम्बश्रौतसूत्रे प्रतिपादितम् ।

वेदः भारतीयसंस्कृतेः मूलं भवति । भारती यसंस्कृतिः इत्युक्ते यज्ञसंस्कृतिः । वेदे बहुविधयज्ञानां निरूपणं वर्तते । भगवद्गीतायामपि ज्ञानयज्ञस्य तपोयज्ञस्य अन्यविधयज्ञानामपि कीर्तनं वर्तते । अग्निहोत्रहोमः, दर्शपूर्णमासौ, ज्योतिष्टोमः, चातुर्मास्यानि इत्येवं रूपेण बहुविधयज्ञानां स्वरूपं तेषां अनुष्ठानक्रमश्च वेदे बहुधा निरूपितः । तादृशयज्ञानां स्वरूपज्ञानाय वेदाध्ययनं यथा आवश्यकं तथैव मीमांसासास्त्रस्यापि अध्ययनं आवश्यकमेव । "आम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानाम्" इत्यादि मीमांसाशास्त्रीयसिद्धान्तानुरोधेन आम्नायस्य क्रियार्थत्वं मीमांसाशास्त्रे प्रतिपादितम् । अयं च अपौरुषेयः वेदः पञ्चधा विभक्तः । विधिः, मन्त्रः, नामधेयम् , निषेधः, अर्थवादः इति । तत्र विधिर्नाम अज्ञातार्थज्ञापकः वेदभागः इति । स च चतुर्विधः । उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिश्चेति । उत्पत्तिविधिर्नाम कर्मस्वरूपमात्रबोधकः विधिः । यथा अग्निहोत्रं जुहोति । अङ्गप्रधानसम्बन्धबोधकः विधिः विनियोगविधिः । यथा दध्ना जुहोति । प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत । फलस्वाम्यबोधको विधिः अधिकारविधिः । यथा ज्योतिष्टोमेन स्वर्गकामो यजेत । मन्त्रः नाम

प्रयोगसमवेतार्थस्मारकः । विधेयार्थपरिच्छेकं नामधेयम् । निवृत्तिबोधकं वाक्यं निषेधः । स्तुतिनिन्दान्यतरबोधकं वाक्यं अर्थवादः । मीमांसाशास्त्रस्य परमप्रयोजनं तावत् वेदवाक्यानां तात्पर्यनिर्णयः । मीमांसाशब्दस्तावत् ब्राह्मणग्रन्थे संहिताग्रन्थेषु सुप्रसिद्धः वर्तते । सर्वत्र विचाररूपार्थे वेदे मीमांसाशब्दः श्रूयते इत्यतः मीमांसा इत्यस्य विचारपूर्वकतत्त्वनिर्णयः इत्यर्थः वक्तुं शक्यते ।

माङ् माने इति धातोः निष्पन्नः मीमांसा शब्दः । मीमांसा नाम वेदार्थविचारः स च वेदार्थनिर्णयार्थः । तस्य च प्रयोजनं यथावदेव साङ्गस्य प्रधानस्य अनुष्ठानद्वारा स्वर्गादिप्राप्तिरेव । अस्मिन् पूर्वमीमांसासास्त्रे प्रधानतया धर्मः प्रतिपादितः । तदुक्तं श्लोकवार्तिके "धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्" इति । तथा च विशेषतः धर्मस्वरूपनिर्णयार्थमेव पूर्वमीमांसाशास्त्रं महर्षि जैमिनिना प्रणीतम् । मीमांसाशास्त्रे द्वादशाध्यायाः वर्तन्ते । तत्र च भिन्न भिन्न अध्याये विभिन्नाः विषयाः विमृष्टाः । प्रथमाध्याये धर्मप्रमाणानि,द्वितीयाध्याये कर्मभेदः, तृतीयाध्याये अङ्गाङ्गीभावः चतुर्थे प्रयोज्यप्रयोजकभावः,पञ्चमे क्रमः,षष्ठे अधिकारः, सप्तमे अतिदेशः, विशेषातिदेशः अष्टमे, नवमे ऊहः, बाधः दशमे, एकादशे तन्त्रम्, द्वादशे प्रसङ्गः इत्येते विषयाः उत्सर्गापवादाभ्यां निरूपितः वर्तते । पूर्वमीमांसायाः सूत्रकाराः महर्षि जैमिनिः, शबरस्वामी भाष्यकारः,कुमारिलभट्टपादाः वार्तिककाराः । एवमेव बहुविधग्रन्थाः अस्मिन् शास्त्रे उपलभ्यन्ते । पूर्वमीमांसायाः अध्ययनोपक्रमः कथमिति श्लोकवार्तिकस्य न्यायरत्नाकराख्ये व्याख्याने एवमुक्तम् – "ब्रह्मा प्रजापतये मीमांसां प्रोवाच,सोऽपीन्द्राय,सोऽप्यादित्याय,स च वसिष्ठाय,सोऽपि पराशराय,पराशरः कृष्णद्वैपायनाय,सोऽपि जैमिनये, स च स्वोपदेशानन्तरमिमं न्यायं ग्रन्थे निबद्धवान्" इति । एवं रूपेण मीमांसाशास्त्रपरम्परा वर्तते ।

पूर्वमीमांसायाः प्रत्यधिकरणे कश्चनन्यायः उत्पन्नः । तेषां न्यायानाम् उपयोगः लोके शास्त्रान्तरे च बहुधा दरीदृश्यते । मीमांसान्यायानां अत्यधिकतया वेदान्तशास्त्रे, धर्मशास्त्रे तत्तद्विषयनिर्णयार्थम् उपयुक्तं वर्तते । लोकेऽपि मीमांसान्यायस्य उपयोगः वर्तते । न्यायालयादिष्वपि मीमांसान्यायपुरस्सरं न्यायनिर्णयः बहुधा दृश्यते । सत्सु बहुविधन्यायेषु

सार्थकता न्यायः इति प्रसिद्धः वर्तते । वेदे अथवा शास्त्रे विद्यमानस्य एकस्यापि पदस्य वैयर्थ्यं न भवति । सकलमपि पदं सार्थकमेव भवति इति न्यायस्वरूपम् । एवं लाघवन्यायः इति अपरः । अल्पीयसा प्रयत्नेन कार्यसिद्धिः भवति चेत् तत्र प्रयत्नाधिक्ये प्रयोजनं नास्ति इति । एवं विकल्पन्यायः इति । यत्र वाक्यद्वयस्य परस्परविरोधः भवति तत्र अन्यतरस्य अनुष्ठानमिति । यथा उदिते जुहोति , अनुदिते जुहोति इत्यत्र अग्निहोत्रानुष्ठानीयकाले विकल्पः वर्तते । एवं रूपेण बहुविधन्यायाः मीमांसाशास्त्राध्ययनेन अधिगताः भवन्ति ।

अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदन्नौमि श्रीरूपं सुन्दरं महः ॥

# दम्पत्योस्सहाधिकारविवेकः

**प्रो. सूर्यनारायणभट्टः**

मीमांसाविभागाध्यक्षः

विषयोऽयं भगवता जैमिनिमहर्षिणा प्रणीतद्वादशाध्यायात्मके मीमांसाशास्त्रे षष्ठस्य प्रथमे पादे विवेचितः । स च षष्ठाध्यायोऽधिकाराध्याय इति विश्रुतः । अयं चाध्यायः पूर्वाध्यायार्थैस्सह अवसरसङ्गत्या हेतुहेतुमद्भावसङ्गत्या च आरभ्यते । अत एव सक्रमे प्रयोज्यवर्गे निरूपिते सम्प्रति अधिकारी निरूप्यत इति प्रतिज्ञा । अत एव शास्त्रदीपिकायां –

**भेदादिलक्षणैरेवमनुष्ठेये निरूपिते ।**

**कोऽनेनाधिक्रियेतेति साम्प्रतं सम्प्रधार्यते** \ \ इत्युक्तम् ।

पूर्वाध्यायैः प्रदर्शितान् विषयानाश्रित्य तत्र कः अधिकारीति निर्णयो विधेयः । चतुर्थान्तैरध्यायैः प्रयोज्यवर्गस्तावन्निरूपितः । तदनन्तरमेव वस्तुतोऽधिकारनिरूपणं कर्तव्यम्, किन्तु कर्तुं न शक्यत अक्रमस्य अनियतक्रमस्य वा अशक्त्या अनुष्ठानासम्भवे अधिकारनिरूपणस्यैव अप्रसक्ति रित्यवसरसङ्गतिः। अतो यावदशक्त्या अनुष्ठानताज्ञानस्य प्रतिबन्धकस्य निराकरणं न भवति तावदधिकारनिरूपणं न सम्भवतीति पञ्चमाध्याये नियतक्रमे निरूपिते शक्त्यानुष्ठानताज्ञानोत्पत्या अग्रेऽधिकारनिरूपणमित्येतस्य पञ्चमाध्यायार्थनिरूपणस्य हेतुत्वमस्तीति हेतुहेतुमद्भावसङ्गतिरपि। ततोऽधिकारनिरूपणमिति। अत्र भट्टपादीयं वचनमुपोद्बलकं, यथा-

**भारो येन हि वोढव्यः स प्रागान्दोलितो यदि ।**

**तदा कस्तस्य वोढेति युक्तं कर्तृनरूपणमिति ॥**

वस्तुतोऽधिकार ईश्वरभावः । अधिरीश्वरे इति व्याकरणस्मृतेः आदौ फलस्वाम्यमत्र वक्तव्यम् । फलभोक्तृत्वसमानाधिकरणं कर्तृत्वम् । अधिकारः फलं तद्वान् अधिकारी, स एव कर्ता । कर्मजन्यफलभोक्तृत्वसमानाधिकरणं कर्तृत्वम् आहिताग्नौ वर्तत इति आहिताग्नेरधिकारः । पितरमुद्दिश्य पुत्रेण अनुष्ठीयमाने श्राद्धे पुत्रस्यैव कर्तृत्वम् ।

श्राद्धजन्यफलभोक्तृत्वम् तु पितुरेव । फलभोक्तृत्वसमानाधिकरणकर्तृत्वस्य पितरि अभावात् न पिता कर्ता । एवं दशपूर्णमासादौ अङ्गानामनुष्ठाने ऋत्विजस्तु कर्तारः । दशपूर्णमासजन्यफलभोक्तृत्वं तु यजमानस्यैव । फलभोक्तृत्वसमानाधिकरणकर्तृत्वं ऋत्विक्षु नास्तीति न ते कर्तारः । प्रयोज्यकर्तृत्वं तु तेषां विद्यते तत्फलं तु भृतिरेव न स्वर्गादिकम्स्।अत एव प्रवृत्तिप्रयोज्यफलेच्छाफलान्यतरसमानाधिकरणकर्तृत्वम् अधिकारिणो लक्षणम् । तेन च जातेष्टौ **यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव तेजस्वी अन्नाद इन्द्रयावी पशुमान् भवती**ति जातेष्टिजन्यं फलं पूतत्वादिकं पुत्रनिष्ठं तथापि पुत्रो मे पूतत्वादि फलयुक्तो भवत्विति इच्छासमानाधिकरणकर्तृत्वस्य पितरि सत्वात् पिता जातेष्टौ अधिकारी सम्पद्यते। एवं यजमानोऽयं स्वर्गादिफलवान् भवत्विति इच्छया ऋत्विजां कर्तृत्वमुपपद्यते । एतादृशाधिकारनिरूपणे प्रमाणं भवति अधिकारविधिः ।

एवमधिकारे निरूपणीये केषां केषामिति विविच्य विचारो विधेयः । तदर्थं जन्तुमात्रस्याधिकारः उत मनुष्याणामेव, यदि मनुष्याणामेव तर्हि तत्र सर्वेषाम् अधिकार उत समर्थस्यैव मनुष्यस्येति तिर्यगधिकरणे विविच्य विधिबलात् साङ्गप्रधानानुष्ठानसमर्थ एवाधिकारी, अतश्च असमर्थत्वात् अविद्यत्वात् न तिरश्चामधिकारः, मनुष्येष्वपि विष्णुक्रमणाद्यसमर्थत्वात् पङ्गु-अन्ध–मूकादीनां नाधिकारः । देवादीनामपि विग्रहाद्याभावादेव नाधिकारः, आर्षेयाभावात् ऋषीणां प्रवराध्यायप्रसिद्धानां भृग्वादीनां न च कर्मस्वधिकार इति सिद्धम् । तथैव **स्वर्गकामो यजेत** इत्यादौ पुंलिङ्गश्रवणात् किं सर्वाङ्गसमर्थस्य पुरुषस्यैव अधिकार उत स्त्रीणामपीति सन्देहे **"लिङ्गविशेषनिर्देशात् पुंयुक्तमैतिशायनः"** इति स्वर्गकामादिवाक्यविहितं कर्म पुंसा एव अधिकारिणा कर्तव्यमिति ऐतिशायनो नाम कश्चिद् आचार्यो मन्यते । किञ्च स्वर्गकामो यजेत इत्यनेन स्वर्गकामकर्तृका यागकरणिका स्वर्गभाव्यिका भावना विधीयते इति बोधः । ततः आख्यातोपात्तैकत्ववदेव पुंस्त्वस्यापि विवक्षा उपपद्यते । लिङ्गस्य विवक्षितत्त्वात् पुरुषस्यैवाधिकार: स्त्रिया नाधिकार:। अद्रव्यत्वमपि स्त्रिया अनधिकारे हेतु: ।

**भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः ।**

**यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥** इति वचनात् भार्यादयो स्वामिनः कर्म विहाय न स्वीयं कर्म कर्तुमर्हन्ति, यदि कदाचित् स्वस्वामिनोऽविरोधेन

(कर्तनादि) कर्म कुर्युः तदा '**यस्यैते तस्य तद्धनम्**' इति स्मृत्या स्वामिन एव तद्धनम् न स्वकीयम् । अतः द्रव्यस्वामित्वं पुंसामेव । त एव द्रव्यत्यागात्मकानुष्ठाने अधिकारिणो न स्त्रियः । अतः स्त्रिया अधिकारो नास्ति । किञ्च **शतमतिरथं दुहितृमते दद्यादार्षेयविवाहे गोमिथुनम्** इत्यादिना पित्रा भर्त्रे मौल्येन दासवत् विक्रीतत्वात् कन्यायाः कुत्रापि स्वत्वं न भवति । अत एव **गर्भेण अविज्ञातेन हतेन भ्रूणहा** इति यज्ञसाधनपुंगर्भहननशङ्कया भ्रूणपदवाच्य यज्ञहन्तृत्वलिङ्गमवकल्पते । यदि द्वयोः स्त्रीपुरुषयोरधिकारः स्यात् तदा अविज्ञातेन इति पदस्य सार्थक्यं स्वारस्यं च न सिध्यति । (भ्रूणः यज्ञः) तथा **आत्रेयीं हत्वा भ्रूणहेति** लिङ्गान्तरम् ।आत्रेयी नाम सगर्भा, तां सगर्भां हत्वा भ्रूणहा भवति पुंगर्भवती इति पूर्वपक्षिणा विवक्षितम्। अतस्तां हत्वा भ्रूणहा भवति यज्ञनाशको भवतीत्यभिप्रायः । अत एव पुंस एव अधिकारो न स्त्रिया इति प्राज्ञे –

**जातिं तु बादरायणोऽविशेषात् तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्य अविशिष्टत्वात्** इत्यादिना सूत्रेण समाधीयते । स्त्रीपुंससाधारणमनुष्यजात्यधिकृतस्वर्गादिकामनायाः स्त्रियामपि अविशेषात् स्त्रिया अपि अधिकारं बादरायणाचार्यो मन्यते । किञ्च स्त्रिया अपि अधिकारोऽस्तीति यदा निश्चीयते तदा अत्रापि अवयुत्यनुवादं स्वीकृत्य साधुत्वार्थं यत् किञ्चिदेकं पदं प्रयुक्तमिति ज्ञायते। यथा **वसन्ते ब्राह्मणोऽग्नीनादधीत** इति ब्राह्मण इत्यत्र पुंस्त्वं श्रूयते परं अत्र स्त्रिया अपि अस्ति अधिकारः । आधानप्रकरणे **क्षौमे वसानौ (दम्पती/जायापती) अग्निमादधीयाताम्** इति तत्र पुंस्त्वमवयुत्यनुवादः । कर्त्रोः द्वयोर्मध्ये एकः पुमान् । तद्वदत्रापि अवयुत्यनुवादः। किञ्च स्वर्गकाम इत्यादौ यत् पुंस्त्वं प्रतीयते तत्पुंस्त्वं कर्तरि अत्र नापेक्षितम् । किन्तु अधिकारिविशेषणत्वमेव । ततश्च तस्य फलं प्रत्यपि प्राधान्यात् उद्देश्यत्वेन तद्विशेषणस्य अविवक्षा इति पुंस्त्वमविवक्षितम् । अतः स्त्रिया अपि अधिकारः सिद्धः । वस्तुतः स्वर्गकाम इत्यस्य स्वर्ग इत्यर्थः लक्षणया स्वीक्रियते । तदा तु पुंस्त्वस्य विवक्षाया वा अविवक्षाया वा जिज्ञासा एव नोदेति । यद्यपि विचारः प्रस्तुत इति किंचित् निरूपणीयमापतितम्, तथापि पुंस्त्वस्य अविवक्षा एव ।

यत्तु स्त्रिया अद्रव्यत्वादिकमाक्षिप्तं तस्य समाधानम् । स्त्रिया अपि अर्जनं कृत्वा द्रव्यं सम्पाद्य सामर्थ्यं सम्पाद्यते । अथवा पित्रादिदत्तस्य दायस्य तस्या एव अधिकारः । न तावन्मात्रम्, पुंसा अर्जितेऽपि द्रव्ये तस्या अधिकारो विद्यते । **धर्मे चार्थे च कामे च**

**नातिचरितव्या** इत्यादि स्मृत्या तस्याऽपि स्वत्वं सामर्थ्यं च सिध्यति । **भसदा वा एताः परगृहाणां ऐश्वर्यमवरुन्धत** इत्यपि स्मृतिः । स्त्रियः पितृगृहे जनित्वा पतिगृहं प्राप्य स्वमित्वं प्राप्नुवन्तीत्यर्थः । किञ्च **सं पत्नी पत्या सुकृतेन गच्छताम्** इति मन्त्रवर्णः, **पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु च** इति स्मृतिरपि स्त्रिया अधिकारं बोधयति । किञ्च **पत्युर्नो यज्ञसंयोगे** इति स्मृतिरपि पत्नीशब्दस्य स्वामित्वाभावे अनुपपन्नैव स्यात् । तदनु भार्या पुत्रश्च दासश्च इति वचनम् अस्वातन्त्र्यपरं न तु अनधिकारपरम्।अतः पुरुषस्य इव स्त्रिया अपि सिद्धे अधिकारे सम्प्रति प्रसङ्गात् **स्ववतोस्तु वचनात् ऐककर्म्यं स्यात्** इत्यादि सूत्रेण किं दम्पती पृथक् पृथक् यजेयताम् उत सहेति विचारः प्रस्तूयते ।

द्रव्यवतोः स्त्रीपुंसयोः पृथक् पृथक् यजने कः प्रत्यूहः । स्त्रीकर्तृकप्रयोगः, पुङ्कर्तृकप्रयोगश्च भिन्नौ भवितुमर्हत इति । यद्यपि स्वर्गकामादिपदे पुंस्त्ववत् संख्यापि अविवक्षिता, तथापि यजेत इत्याख्यातोपात्ता संख्या गुणभूतोपादेयकर्तृगामित्वेन विवक्षितैव । तथा च सहप्रयोगे **'ऋद्धिकामाः सत्रमासीरन्'** इतिवत् कर्तृभेदेन यजेत इति एकवचनविरोधात् दम्पती पृथक् यजेयाताम् ।ननु स्त्रियाः वेदाध्ययने अधिकाराभावात् विद्याभावः, अपि अध्ययनविधिसिद्धा विद्या नास्ति, तदा तु अधिकारविध्यनुग्रहाभावात् कथं स्त्रियाः कर्माधिकार इति सन्देहे..

**समाधानम्** – स्त्रीकर्तृकप्रयोगस्य अमन्त्रकत्वस्वीकारेण अधिकारः सिध्यति । अथवा अस्मिन् कल्पे नित्यवदाम्नातानां मन्त्राणां स्त्रीकर्तृकप्रयोगे पाक्षिकत्वं स्वीकृत्य स्त्रीकर्तृकप्रयोगस्य अमन्त्रत्वं नैव उचितम् इति शङ्का स्यात् – तथापि मन्त्रोच्चारणाय कञ्चन प्रतिनिधिं नियुज्य प्रयोगः स्त्रीकर्तृकः सम्पादयितुं शक्यते । अतः स्त्रीपुंसौ पृथक् पृथक् यजेयातामिति **पूर्वपक्षः** ।

**स्ववतोस्तु वचनादैककर्म्यं स्यात् लिङ्गदर्शनाच्चेति** सूत्राभ्यां दम्पत्योः सहाधिकारः सिद्धान्तितः । स्ववतोः स्वामिनोः (स्त्रीपुरुषयोः) ऐककर्म्यं सम्भूयैव कर्माधिकारित्वं स्यात् – कुतः वचनात् । **यजमान आज्यमवेक्षते, पत्नी आज्यमवेक्षते** इत्यादौ प्रत्येकं पृथक् प्रयोगे अन्यतरकर्तृकाज्यावेक्षणपदार्थलोपेन प्रयोगवैगुण्यापत्तिर्भवति । तदा च उपदिष्टं सर्वाङ्गावयवोपेतं कर्मानुष्ठानं कदापि नैव सिध्यति । किञ्च परिक्रियादिना उपादाने कृतेऽपि फलभोक्तृत्वं नैव सिध्यति। पत्नीयजमानशब्दयोः फलभोक्तृत्वपर्यन्तं यत् सामर्थ्यमुपदिष्टं

तन्नोपपद्यते । अतः सहप्रयोग एव शात्रसम्मतः । न वा आज्यावेक्षणादीनां कर्तृसंस्कारकत्वम् किन्तु आज्यस्यैव संस्कार इति क्रतुधर्मत्वात् उभयकर्तृकमेव अवेक्षणद्वयम् अदृष्टविधया कृतोरङ्गम् ।

किञ्च सर्वेभ्यो दशपूर्णमासौ इत्यादौ तु अन्यतरस्य रोगनिवृत्यर्थं यः प्रयोगः अनुष्ठीयते न तथा सर्वत्र करणे प्रमाणं नैवोपलभ्यते । किञ्च **धर्मे चार्थे च कामे च नातिचरितव्या** इति उभयोरपि द्रव्यं संसृष्टम् । संसृष्टद्रव्यस्य विभागेन प्रयोगस्तु आशास्त्रीयः । अत एव सहप्रयोगः । **न भर्त्रा सह विभजेत** इति विभागप्रतिषेधवचनात् ।किञ्च आख्यातोपात्तमेकत्वं सहाधिकारे गुणभूतस्य कर्तुः विशेषणम् अतः विवक्षितम् इति यदुक्तं तस्य समाधानमित्थम् – एकवचनश्रवणादेव दम्पत्योः व्यासज्यवृत्या एकस्यैव कर्तृत्वस्य कल्पनात् उपपद्यते एकवचनम् । इतरथा सत्रवत् द्विवचनाद्यापत्तिः। अतः दम्पत्योः व्यासज्यवृत्तिः, ततः दम्पत्योः सहाधिकारः ।

लिङ्गदर्शनाच्च इत्यनेन लिङ्गमपि प्रदर्श्यते । **"मेखलया यजमानं दीक्षयति, योक्रेण पत्नीं मिथुनत्वाय"** इति मिथुनत्वसंस्तवः सहाधिकारे एव घटते । पृथक् प्रयोगे मिथुनत्वसंस्तवः नोपपद्यते। एवं च दम्पत्योः कर्तृत्वस्य व्यासक्तत्वात् फलभोगोऽपि तयोः सहैव भवति । तत्र दम्पत्योरन्यतरस्य पूर्वं मृतौ परलोके फलभोगाय इतरस्यापि आगमनं प्रतीक्षते । स्मर्यते – पाणिग्रहणादि सहत्वं कर्मसु तथा पुण्यफलेषु द्रव्यपरिग्रहेषु च इति ।

यद्यपि **न स्त्रीशूद्रौ वेदमधीयेयाताम्** इति निषेधवचनात् स्त्रीणां वेदाध्ययनं नास्ति । तथापि **महीनां पयोऽसीति पत्नी आज्यमवेक्षते** इत्यादि विधिबलात् तदुपयुक्तमात्रमध्ययनं कल्प्यते । एवं च एकस्मिन्नेव प्रयोगे यजमानमन्त्राणां पत्नीमन्त्राणां च समावेशात् पृथक् प्रयोगे कृते कर्मविक्षेपभयात् दम्पत्योः सहाधिकारः अभ्युपगन्तव्य इति सर्वं सुमङ्गलम् ।

**आधारग्रन्थाः**

शास्त्रदीपिका

जैमिनीयसूत्रवृत्तिः

जैमिनीयन्यायमालाविस्तरः

भाट्टदीपिका- प्रभावलीसहिता

# प्रथमाप्रयोजकाभिहितत्वविचारः

**डा. एस्. वेङ्कटेशताताचार्यः**
सहायकाचार्यः, मीमांसाविभागः

"चैत्रो ग्रामं गच्छति" इत्यत्र कर्तृवाचकचैत्रपदोत्तरं प्रथमा कर्मवाचकग्रामपदोत्तरं च द्वितीया प्रयुज्यते । "चैत्रेण ग्रामो गम्यते" इत्यत्र कर्तृवाचकचैत्रपदोत्तरं तृतीया कर्मवाचकपदोत्तरं च प्रथमा प्रयुज्यते । "अनभिहिते"[1] इत्येतदधिकारस्थेन "कर्मणि द्वितीया"[2] इति सूत्रेण अनभिहिते कर्मणि द्वितीयाविधानात् "ग्रामं गच्छति" इत्यत्र द्वितीया सिद्ध्यति । तथैव "कर्तृकरणयोस्तृतीया"[3] इति अनभिहिते कर्तरि तृतीया विधानात् "चैत्रेण गम्यते" इत्यत्र तृतीया सिद्ध्यति । "चैत्रो गच्छति, ग्रामो गम्यते" इत्यनयोः क्रमेण कर्तृकर्मणोः अभिहितत्वेन पूर्वोक्ताभ्यां सूत्राभ्यां तृतीयाद्वितीययोः प्राप्त्यभावेन प्रातिपदिकार्थमात्रविवक्षायां "प्रतिपदिकार्थलिङ्गपरिमाणमात्रवचने प्रथमा"[4] इति सूत्रेण प्रथमैव भवति । तथा च पूर्वोक्तोदाहरणयोः आख्यातेन कर्तुः कर्मणश्च अभिधानं कर्तृकर्मवाचकपदोत्तरं प्रथमायाः प्रयोजकमिति वैयाकरणमतानुसारेण वक्तुं शक्यते ।

**नैयायिकमते प्रथमाप्रयोजकम्, तत्रानुपपत्तिश्च -**

परन्तु नैयायिकमते आख्यातेन कृतेरेवाभिधानेन कर्तुरनभिधानात् "देवदत्तो गच्छति" इत्यत्रापि देवदत्तपदोत्तरं कर्तरि तृतीया आपद्यते । यदि "कर्तृकरणयोस्तृतीया" इत्यादि सूत्राणाम् अनभिहितयोः कर्तृत्वकरणत्वयोस्तृतीया इत्यादिरेवार्थः, कर्तृत्वं च कृतिरेव । देवदत्तो गच्छतीत्यत्र च आख्यातेन कृतेरभिधानात् न तृतीया, किन्तु प्रथमैवेति उच्येत, तर्हि " देवदत्तेन शय्यते, देवदत्तेन ग्रामो गम्यते" इत्यादौ भावकर्माख्यातस्थलेऽपि आख्यातेन कृतेरभिधानात् प्रथमापत्तिः । न च तत्र आख्यातेन कृत्यभिधाने किं प्रमाणमिति वाच्यम् । "देवदत्तेन शयनं क्रियते, देवदत्तेन ग्रामस्य गमनं क्रियते" इति कृञ् धातुना विवरणस्यैव तत्र प्रमाणत्वात् । अथ तिङुपात्तसंख्यान्वयित्वं प्रथमाप्रयोजकम् । यथा "देवदत्तो गच्छति" इत्यत्र देवदत्तपदस्य आख्यातार्थसंख्यान्वय्यर्थकत्वात् तदुत्तरं प्रथमा

[1] पाणिनिसूत्रम् – २-३-१
[2] पाणिनिसूत्रम् – २-३-२
[3] पाणिनिसूत्रम् – २-३-१८
[4] पाणिनिसूत्रम् – २-३-४६

भवति । एवं "देवदत्तेन ग्रामो गम्यते" इत्यत्र ग्रामपदस्य तादृशत्वात् तदुत्तरं प्रथमा । शबादिसमभिव्याहारे यत्र वैयाकरणमते आख्यातेन कर्ता अभिधीयते, तत्र आख्यातार्थसंख्यायाः कृत्याश्रयरूपे कर्तरि देवदत्तादिपदार्थे अन्वयः स्वीक्रियते । यगादिसमभिव्याहारे यत्र तन्मते आख्यातेन कर्म अभिधीयते , तत्र आख्यातार्थसंख्यायाः फलाश्रयरूपे कृत्युद्देश्यरूपे वा कर्मणि ग्रामादिपदार्थे अन्वयः । अतश्च आख्यातानभिहितसंख्याककर्तृकर्मवाचकपदात् तृतीयाद्वितीये भवतः इति फलति । एवं च आख्यातेन संख्याभिधानं तदन्वय्यर्थकपदोत्तरप्रथमायाः प्रयोजकमिति चेत्, न ।

एवं सति "चैत्रेण पाचकस्य पुत्रः, ओदनं पक्वस्य विक्लित्तिः" इत्यादिप्रयोगापत्तेः । चैत्रगतायाः ओदनगताया वा संख्यायाः आख्यातेन अनभिधानात् । आख्यातपदस्य कृदाद्युपलक्षणत्वेऽपि कृत्प्रत्ययेन कर्तृकर्मादिकारकस्यैव अभिधानेन तद्गतसंख्याया अनभिधानात् "चैत्रकर्तृकपाककर्तुः पुत्रः" इत्यर्थविवक्षायां "चैत्रेण पाचकस्य पुत्रः" इति, "ओदनकर्मकपाककर्मणो विक्लित्तिः" इत्यर्थविवक्षायाम् "ओदनं पक्वस्य विक्लित्तिः" इति च प्रयोगयोः वारयितुमशक्यत्वात् । किञ्च संख्याभिधानस्य प्रथमाप्रयोजकत्वे "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमि"[1]त्यत्रापि प्रथमा न स्यात् । अथ यदि "चैत्रः पाचकः, ओदनः पक्वः" इत्यादौ कृता संख्यायाः अनभिधानेऽपि कर्तृकर्मणोरभिधानात् चैत्रादिपदोत्तरं प्रथमा । चैत्रस्य पाचकस्य पुत्रः इत्यत्रापि चैत्रस्य पाचकपदार्थक्रियान्वयविवक्षया तृतीया न भविष्यति, तत्क्रियाकर्तुः ण्वुल् प्रत्ययेन उक्तत्वात् । विभक्त्या कर्तृत्वस्य अनुक्तावपि चैत्रादेः स्वकर्तृकत्वादिसंसर्गेण क्रियान्वयस्तु विभक्त्यर्थमद्वारीकृत्य प्रातिपदिकार्थस्य क्रियायामन्वयस्य अव्युत्पन्नत्वादेव न भवति । अतश्च क्रियायामन्वयासम्भवात् पाचकपदार्थे पाककर्तरि अभेदेन अन्वयः वक्तव्यः । तस्मात् तत्सामानाधिकरण्येन षष्ठ्येव भविष्यतीति न "चैत्रेण पाचकस्य पुत्रः" इति प्रयोगापत्तिः । एवमेव "ओदनं पक्वस्य विक्लित्तिः" इति प्रयोगोऽपि वारणीयः । देवदत्तो गच्छतीत्यादौ च संख्याभिधानादेव देवदत्तादिपदोत्तरं प्रथमा । साम्प्रतमिति निपातेन युज्यते इत्यर्थकेन कर्मकारकाभिधानात् तद्वाचकात् विषवृक्षपदात् प्रथमा । एवं च कर्त्रादितद्गतसंख्ययोः अन्यतरस्य आख्यातादिभिः अभिधानं प्रथमायाः प्रयोजकम् । तदभावः द्वितीयादिप्रयोजकः इत्युच्येत, तदापि "चैत्र इव मैत्रो

[1] कुमारसम्भवम् –२-५५

गच्छती"त्यत्र चैत्रपदोत्तरं प्रथमा न स्यात् , तद्गतसंख्यायाः तदात्मककारकस्य वा आख्यातादिना अनभिधानेन पूर्वोक्तस्य कर्त्रादितद्गतसंख्ययोरन्यतरस्याभिधानरूपस्य प्रथमाप्रयोजकरूपस्य अभावात् ।

**खण्डदेवाचार्यमतेन प्रथमाप्रयोजकनिरूपणम् -**

एवं नैयायिकैः प्रथमातृतीयादिप्रयोजकं वक्तुं न शक्यत इत्याक्षेपं कृत्वा स्वमतेन प्रथमातृतीयादिप्रयोजकम् एवं प्रतिपादयति खण्डदेवाचार्यः –

यद्वृत्तिकारकत्वं स्वान्वयिक्रियाप्रतिपादकेन पदेन वृत्त्या प्रतिपाद्यते तत्त्वं प्रथमाप्रयोजकाभिहितत्वम् । एतादृशाभिहितत्वविशिष्टार्थवाचकात् प्रथमा भवति । अत्र कारकत्वमित्यनेन तद्व्याप्यकर्तृत्वादिकं विवक्षितम् । चैत्रो गच्छति इत्यत्र आख्यातस्य कृतौ शक्तत्वेऽपि कर्तृत्वे लक्षणास्वीकारात् अस्ति चैत्रस्य पूर्वोक्तमभिहितत्वम् । तथाहि – चैत्रवृत्ति कारकत्वम् – कर्तृत्वम् , तच्च चैत्रान्वयवती या क्रिया – गमनभावना, तत्प्रतिपादकं यत्पदं – गच्छतीत्यत्र विद्यमानः आख्यातप्रत्ययः, तेन वृत्त्या (लक्षणया) प्रतिपाद्यते इति भवति चैत्रः अभिहितः । विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमित्यत्र असाम्प्रतमिति निपातेन उक्तायां भावनायां विषवृक्षस्य अन्वयात्, तेनैव च निपातेन तन्निष्ठकर्मत्वस्य च अभिधानेन विषवृक्षस्य पूर्वोक्ताभिहितत्वसत्त्वेन विषवृक्षपदोत्तरं प्रथमा । चैत्र इव मैत्रो गच्छतीत्यत्र इवेति निपातेन सादृश्यमुच्यते । तच्च गमनकर्तृत्वरूपम् । इवशब्दोपात्तगमनभावनायामेव चैत्रस्य अन्वयस्वीकारात् इव शब्देनैव तद्वृत्तिकर्तृत्वस्याप्युक्तेः चैत्रस्य अभिहितत्वोपपत्तिः । न चैवं चैत्रस्य पाचकस्य पुत्रः इत्यत्र चैत्रस्य पाकभावनान्वयविवक्षायां तद्वृत्तिकर्तृत्वस्य तदन्वयिक्रियाप्रतिपादकेन ण्वुल्प्रत्ययेन उक्तत्वेन अभिहितत्वात् चैत्रपदोत्तरं तृतीयापत्त्यभावेऽपि प्रथमा तु आपद्यते एव । प्राचीनमते पुत्रान्वयविवक्षया खण्डदेवमते पुत्रद्वारकसम्बन्धेन अस्तीत्यध्याहृताख्यातार्थान्वयविवक्षया वा षष्ठ्युपपत्तावपि कृत्प्रत्ययार्थपाकभावनान्वयविवक्षया चैत्रः पचतीत्यादाविव प्रथमायाः वारयितुमशक्यत्वादिति वाच्यम् । आख्यातनिपाताभिहितकर्तृत्वकर्मत्वसंसर्गेणैव प्रथमोक्तप्रातिपदिकार्थस्य भावनान्वय इति नियमस्वीकारेण चैत्र इति प्रथमार्थस्य कृदर्थकर्तृत्वघटितसंसर्गेण कृदर्थभावनान्वयस्य अयोग्यत्वेन चैत्रकर्तृकपाकभावनाकर्तुः पुत्र इत्यर्थविवक्षया चैत्रः पाचकस्य पुत्रः इति प्रयोगस्य आपत्तेरभावात् ।

**भाट्टरहस्यपङ्क्तीनां विरोधपरिहारः -**

इदं च "[1]संसर्गश्च आख्यातनिपातोपात्तकर्तृत्वकर्मत्वमेव, न तु कृदाद्युपात्तमपि" इति भाट्टरहस्यपङ्क्तिमनुसृत्योक्तम् । वस्तुतः कृदाद्युपात्तकर्तृत्वादिकं कथं संसर्गत्वेन प्रसज्यते इति चिन्तनीयम् । यतः कृत्प्रत्ययेन कर्तृत्वविशिष्टः कर्ता उच्यते, न तु कर्तृत्वरूपधर्ममात्रम् । कृदन्तात् पाचकादिपदात् कर्त्रादिविशेष्यिकैव उपस्थितिरनुभूयते, न तु भावनाविशेष्यिका येन कृदर्थकर्तृत्वं संसर्गीकृत्य चैत्रनिष्ठकर्तृत्वनिरूपिका पाकभावनेति अन्वयबोधः प्रसज्येत । "चैत्रकर्तृकपाकभावाकर्ते"ति बोध एव हि तत्र आपादयितुं शक्यः । किञ्च कथं निपातार्थकर्तृत्वम् आख्यातार्थकर्तृत्वं वा प्रथमार्थस्य भावनान्वये संसर्ग इत्युच्यते ? न हि एकस्य पदार्थस्य अपरपदार्थान्वये अन्यः पदार्थः संसर्गः इत्युच्यते । यदि तु आख्यातार्थकर्तृत्वसंसर्गेणेत्यस्य प्रथमार्थस्य आख्यातार्थकर्तृत्वे अन्वयः, तस्य च भावनायामित्यर्थे तात्पर्यम् , तर्हि [2]"अतो लाघवात् सुबर्थत्वेन प्रथमार्थस्यापि चैत्रादेः आख्यातार्थभावनायामेव प्रकारते"ति पूर्वग्रन्थविरोधः । यदि तु प्रथमार्थस्य कर्तृत्वसंसर्गेण आख्यातार्थभावनान्वये कर्त्राख्यातं तात्पर्यग्राहकम् , कर्मत्वसंसर्गेणान्वये च कर्माख्यातमित्यतः प्रथमार्थस्य आख्यातार्थकर्तृत्वादिसंसर्गेण भावनान्वय इति व्यवहारः कृतः । यत्संसर्गेणान्वये यस्तात्पर्यग्राहकः तस्य प्रकृते तदर्थकत्वव्यवहारादिति उच्येत, तर्हि संसर्गतात्पर्यग्राहकत्वमात्रेणोपपत्तौ आख्यातस्य कर्तृकर्मलक्षकत्वसिद्धान्तविरोधः । न हि यस्मिन् संसर्गे यस्तात्पर्यग्राहकः तस्मिन् तस्य वृत्तिः स्वीक्रियते । त्त्वाप्रत्ययस्य समानकर्तृकत्वादिसंसर्गेण अन्वयतात्पर्यग्राहकत्वपक्षे समानकर्तृकत्वादौ वृत्तेरस्वीकारात् । तथा च कथं [3]"सत्यपि तिङो भावनावाचित्वे वक्ष्यमाणरीत्या कर्त्रादेरपि लक्षणया अभिधानात्", "(प्रथमार्थस्य भावनान्वये) संसर्गश्च आख्यातनिपातोपात्तकर्तृत्वकर्मत्वमेव, न तु कृदाद्युपात्तमपि", "प्रथमार्थस्यापि चैत्रादेः आख्यातार्थभावनायामेव प्रकारते"ति ग्रन्थानामविरोधस्सम्पादनीयः इति चेत् , अत्रेत्थं प्रतीयते – चैत्रः पचतीत्यत्र प्रथमार्थस्य चैत्रस्य स्वनिष्ठकर्तृत्वनिरूपकत्वसंसर्गेण भावनायमन्वयः स्वीक्रियते । एवं तण्डुलः पच्यते इत्यत्र तण्डुलस्य स्ववृत्तिकर्मत्वनिरूपकत्वसंसर्गेण आख्यातार्थभावनायामेव । एतादृशसंसर्गे च कर्तृकर्माख्यातयोः तात्पर्यग्राहकत्वं स्वीक्रियते । आख्यातस्य कर्तृकर्मणोः लक्षणापि स्वीक्रियते । लाक्षणिकयोस्तयोः कथं शाब्दबोधे भानमिति अनुपदमेव विचार्यते । प्रथमार्थस्य

[1] भाट्टतन्त्ररहस्यम्(खण्डदेवभावप्रकाशसहितम्) पृ.सं-१५२

[2] भाट्टतन्त्ररहस्यम्(खण्डदेवभावप्रकाशसहितम्) पृ.सं-१४५

[3] भाट्टतन्त्ररहस्यम्(खण्डदेवभावप्रकाशसहितम्) पृ.सं-७९

भावनायां संसर्गे घटकीभूतं कर्तृत्वंकर्मत्वं च यद्यपि न आख्यातेन पदार्थविधया उपस्थापितम्, तथापि संसर्गघटकं कर्तृत्वं कर्मत्वं वा आख्यातार्थभावनानिरूपितम् । आख्यातलक्ष्यकर्तृत्वकर्मत्वावच्छिन्नघटककर्तृत्वकर्मत्वे अपि आख्यातार्थभावनानिरूपिते एव इति वस्तुतः संसर्गघटककर्तृत्वादेः आख्यातलक्ष्यककर्तृत्वादेश्च ऐक्यात् "प्रथमार्थस्य आख्यातनिपातोपात्तकर्तृत्वकर्मत्वसंसर्गेण भावनान्वय" इति ग्रन्थे न कश्चिद्दोषः । "न तु कृदाद्युपात्त इति" ग्रन्थस्य "चैत्रः पाचकस्य पुत्र" इत्यापाद्यमानप्रयोगे प्रथमार्थस्य चैत्रस्य कृदुपात्तकर्तृत्वेन कृदुपात्तभावनायां नान्वय इति भावः । कर्तृत्वेन कृदर्थभावनान्वयस्वीकारे पूर्वोक्तरीत्या संसर्गभूतकर्तृत्वस्य कृदर्थकर्तृघटककर्तृत्वस्य च ऐक्येन कृदर्थकर्तृत्वसंसर्गेण भावनान्वयस्य प्रसक्तत्वेन तद्वारणस्य अनौचित्याभावात् । तथा च प्रथमार्थस्य आख्यातनिपातार्थभावनायमेव कर्तृत्वकर्मत्वसंसर्गेणान्वयः, कृदर्थभावनायां तु अन्वय एव न भवतीति पर्यवसितार्थः ।

अथ आख्यातलक्ष्यस्य कर्तुः कर्मणो वा कथं शाब्दबोधे भानमिति विचार्यमाणे अत्रापि भाट्टरहस्य पङ्क्तयः परस्परं विरुद्धा उपलभ्यन्ते । तथाहि – कर्तृलक्षणावादस्थेन [१]"एतेन – एकत्वादेरस्मन्मते कर्त्रादिघटितसामानाधिकरण्यसम्बन्धेनैव भावनान्वयात् कर्त्रादेः सांसर्गिकविषयतयैव बोधः – इत्यपास्तम् । पाककर्ता एको नवेत्यस्य संशयस्य पचतीत्यतः व्युदासानुपपत्तेः......." इति ग्रन्थेन अख्यातार्थसंख्यायाः आख्यातलक्ष्ये कर्त्रादौ अन्वय इति लभ्यते । एवं प्रथमान्तार्थमुख्यविशेष्यकत्वनिरासप्रकरणस्थेन [२]"वक्ष्यमाणरीत्या कर्त्रादेः निरूढलक्षणया भानस्यावश्यकत्वात् तत्र चैकपदोपात्तत्वप्रत्यासत्त्या संख्याया अन्वयेन न कुत्रापि तस्याः प्रथमान्ते अन्वयः" इति ग्रन्थेनापि संख्यायाः कर्त्रादौ अन्वयः प्रतीयते । तथा च पचतीत्यतः एककर्तृकपाकभावनेति बोधो लभ्यते । आख्यातार्थैकत्वस्य आश्रयतया आख्यातार्थकर्तरि अन्वयात् , तस्य च स्वनिष्ठकर्तृत्वनिरूपकत्वसंसर्गेण आख्यातार्थभावनायामन्वयात् , धात्वर्थपाकस्यापि कर्मत्वकरणत्वान्यतरसंसर्गेण भावनायामेवान्वयात् । यजेत स्वर्गकाम इत्यत्र तु कर्तृत्वम् आख्यातेन लक्ष्यते न तु कर्ता । तत्र दम्पत्योः कर्तृत्वेन, तयोश्च द्वित्वेन कर्तरि अख्यातार्थैकत्वान्वयासम्भवात् । कर्तृत्वे तु तदन्वयः सम्भवति, दम्पत्योः व्यासज्यवृत्तिकर्तृत्वस्वीकारात् । कर्तृत्वस्य च निरूपकत्वसंसर्गेण भावनान्वयः ।

[१] भाट्टतन्त्ररहस्यम्(खण्डदेवभावप्रकाशसहितम्) पृ.सं-९१

[२] भाट्टतन्त्ररहस्यम्(खण्डदेवभावप्रकाशसहितम्) पृ.सं-७१

एवं स्पष्टतया संख्याया आख्यातलक्ष्यकर्त्रादौ, तस्य च भावनायामन्वयं प्रतिपाद्य खण्डदेवाचार्यः लडाद्यर्थनिरूपणोत्तरं लिखति – [1] "एवमेकत्वादिसंख्याया अपि तिबाद्युक्तायाः सामानाधिकरण्यादिसम्बन्धेन तस्यामेव (भावनायामेव) अन्वयः, न तु साक्षात्सम्बन्धेन कर्त्रादौ, भावप्रधानमिति स्मृतिसङ्कोचे प्रमाणाभावात् , कार्यकारणभावकल्पनागौरवापत्तेश्च । तत्रापि कर्त्राख्यातस्थले स्वाश्रयसमवेतत्वसम्बन्धेन , कर्माख्यातस्थले स्वाश्रयभूतकर्मवृत्तिफलप्रयोज्यत्वसम्बन्धेन" इति । अनेन च ग्रन्थेन संख्यायाः सामानाधिकरण्यसम्बन्धेन भावनायामन्वयः प्रतिपाद्यते इति स्पष्टः पूर्वोक्तग्रन्थद्वयविरोधः । अत्र विरोधपरिहारो मम न प्रतीयते । अतः कस्य ग्रन्थस्य युक्तियुक्तत्वमित्येव विचार्यते । संख्यायाः कर्तृकर्मघटितसंसर्गेण भावनान्वयस्वीकारे आख्यातस्य तादृशसंसर्गतात्पर्यग्राहकत्वमात्रं स्यात् न तु कर्तृकर्मलक्षकत्वम् । संख्यायाः भावनान्वयं स्वीकृत्यापि आख्यातस्य कर्त्रादिलक्षकत्वस्वीकारे शाब्दबोधे कर्त्रादेः कथं भानं स्यात् ? अस्मिन् हि पक्षे पचतीत्यतः एकत्वाश्रयसमवेता कर्तृनिष्ठकर्तृत्वनिरूपिका पाकभावना इति हि बोधो वक्तव्यः । अत्र च कर्तुः स्वनिष्ठकर्तृत्वनिरूपकत्वेन भावनायामन्वयः अव्यावर्तकः । सर्वापि हि पाकभावना कर्तृविशिष्टैव भवति । अतस्संख्यायाः भावनान्वयपक्षे कर्तुरन्वयस्य अव्यावर्तकत्वेन कर्तृलक्षणैव न युज्यते । कर्तृलक्षणाभावे च अनेके दोषाः स्वयं ग्रन्थकारेण अत्रैव उद्धृते "एतेन....... कर्त्रादेः सांसर्गिकविषयतयैव बोध इत्यपास्तम् । ......." इति ग्रन्थे स्पष्टमुक्ताः । अतः कर्तृलक्षणायाः आवश्यकत्वात् तत्रैव संख्यान्वय उचित इति प्रतीयते । कर्त्रादौ लक्षणायां यत्प्रमाणं तदेव च "भाव प्रधानमाख्यातमि"[2]ति स्मृतेः सङ्कोचे प्रमाणं भविष्यतीति न भावप्रधानमिति स्मृतिविरोध इति ।

प्रकृतमनुसरामः । तत्सिद्धं "चैत्र इव मैत्रो गच्छती"त्यत्र नौयायिकमते चैत्रपदोत्तरप्रथमाप्रयोजकं निरूपयितुं न शक्यते , मीमांसकमते तु तदुक्तमिति न कश्चिद्दोष इति । एवं सङ्क्षेपेण खण्डदेवाचार्यमतेन प्रथमाप्रयोजकरूपम् अत्र प्रस्तुतम् । अस्मिन् विषये इतोऽधिकविचाराः निबन्धान्तरे प्रस्तोष्यन्ते । इदनीमवकाशाभावात् अत्रैव विरम्यते ।

[1] भाट्टतन्त्ररहस्यम्(खण्डदेवभावप्रकाशसहितम्) पृ.सं-११०

[2] निरुक्तम् – १-१

# पाकवर्तमानतादशायां “पचेत्” इति प्रयोगापत्तिपरिहारः

**डा.गोविन्द गोपालकृष्ण हेगडे**

अतिथ्यध्यापकः, मीमांसाविभागः

नैयायिकमते लिङः बलवदनिष्टाननुबन्धित्वे कृतिसाध्यत्वे इष्टसाधनत्वे च शक्तिः । तत्र इष्टसाधनत्वस्य विध्यर्थत्वे येन स्वत एव पाकादौ इष्टसाधनतां ज्ञात्वा प्रवृत्तं तस्य पाकवर्तमानतादशायां “चैत्रः पचेत्” इति प्रयोगापत्तिः स्यात् । तत्र इष्टसाधनत्वादिविशिष्टपाकजनककृतिमत्वस्य चैत्रे अबाधितत्वात् । तथा च यदा चैत्रः पाकस्य इष्टसाधनत्वं स्वयमेव ज्ञात्वा पाके प्रवृत्तिं करोति तदा पाकवर्तमानतादशायां चैत्रः पचेत् इति लिङन्तप्रयोगापत्तिः स्यात् । मीमांसकमते तु चैत्रस्य तादृशप्रवृत्तेः प्रेरणाप्रयोज्यत्वाभावात् विषयबाधेन पाकवर्तमानतादशायां चैत्रः पचेत् इति प्रयोगस्यावसरः नास्ति । तस्मात् इष्टसाधनत्वस्य विध्यर्थत्वं वक्तुं न शक्यते ।

ननु मीमांसकमतेऽपि यदा चैत्रनिष्ठप्रवृत्तिः अन्यप्रयोज्या तदा पाकवर्तमानतादशायां चैत्रः पचेदिति प्रयोगापत्तिः स्यादेव खलु ? तथा हि – पचेदित्यत्र लिङर्थः प्रेरणा , तस्याः प्रयोज्यत्वसंसर्गेण आख्यातार्थकृतौ अन्वयः । प्रेरणा प्रयोज्या पाकानुकूला कृतिः इति शाब्दबोधः । यदा चैत्रः मैत्रस्य प्रेरणया पाकं करोति, पाकवर्तमानतादशायां “चैत्रः पचेत्” इति प्रयोगः स्यात् तस्य प्रामाणिकत्वं च । तत्र चैत्रः पचेत् इत्यस्मात् वाक्यात् चैत्रनिष्ठा प्रेरणा प्रयोज्या पाकानुकूला कृतिः इति बोधस्य जायमानत्वात् पाकवर्तमानतादशायां प्रेरणाप्रयोज्यत्वस्य अबाधाच्च । वस्तुतः यदा स्वत एव इष्टसाधनतां ज्ञात्वा पाकादौ प्रवृत्तः तदा प्रेरणावादिमतेऽपि चैत्रः पचेदिति प्रयोगस्य प्राप्तिः अनिवार्या एव । न च चैत्रनिष्ठप्रवृत्तेः स्वतस्सिद्धेष्टसाधनताज्ञानजन्यत्वेन प्रेरणाजन्यत्वाभावात् नैतादृशप्रयोगापत्तिः इति वाच्यम् । स्वतस्सिद्धेष्टसाधनताज्ञानजन्यप्रवृत्तेः अपि प्रेरणाप्रयोज्यस्वरूपयोग्यत्वात् । प्रेरणाप्रयोज्यस्वरूपयोग्यत्वं नाम प्रेरणाप्रयोज्यतावच्छेदकधर्मवत्वम् । प्रवृत्तित्वावच्छिन्नं प्रति प्रेरणायाः प्रयोजकत्वात् प्रवृत्तित्वं प्रेरणाप्रयोज्यतावच्छेदकम् । तथा च प्रेरणायाः स्वप्रयोज्यतावच्छेदकधर्मवत्वसम्बन्धेन प्रवृत्तौ अन्वयः भवतीत्यतः

स्वतस्सिद्धेष्टसाधनताज्ञानजन्याया अपि प्रवृत्तेः प्रेरणाप्रयोज्यतावच्छेदकप्रवृत्तित्वसत्त्वात् अन्यप्रेरितप्रवृत्तौ स्वतसिद्धप्रवृत्तौ च पाकवर्तमानतादशायां "चैत्रः पचेत्" इति प्रयोगापत्तिः दुर्वारा एव इति चेन्न –

स्वरूपयोग्यत्वरूपप्रयोज्यत्वसम्बन्धेन प्रेरणायाः प्रवृत्तौ अन्वयस्वीकारे पूर्वोक्तदोषस्य सम्भवेऽपि फलोपहितत्वरूपप्रयोज्यत्वसम्बन्धेन अन्वयस्वीकारे दोषः न भवति । फलोपहितत्वं नाम स्वाव्यवहितोत्तरत्वसम्बन्धेन कारणविशिष्टत्वरूपम् । स्वतस्सिद्धेष्टसाधनताज्ञानजन्यायाः प्रवृत्तेः स्वाव्यवहितोत्तरत्वसम्बन्धेन इष्टसाधनताज्ञानविशिष्टत्वेऽपि अव्यवहितोत्तरत्वसम्बन्धेन प्रेरणाविशिष्टत्वाभावादिति चेन्न –

प्रेरणायाः फलोपहितप्रयोज्यत्वसम्बन्धेन प्रवृत्तौ अन्वयः न सम्भवति । बहुवारं प्रेरणे कृतेऽपि आलस्यादिना प्रवृत्त्यनुदयात् प्रेरणाव्यवहितोत्तरत्वरूपस्य फलोपहितत्वस्य नियमतः प्रवृत्तौ असम्भवः । अतः स्वरूपयोग्यत्वरूपप्रयोज्यत्वसम्बन्धेनैव प्रेरणायाः प्रवृत्तौ अन्वयः वक्तव्यः । तथा च स्वतस्सिद्धेष्टसाधनताज्ञानजन्यप्रवृत्तौ पाकवर्तमानतादशायां "चैत्रः पचेत्" इति प्रयोगापत्तिः दुर्वारा एव इति चेत् –

समाधीयते – प्रेरणायाः स्वप्रयोज्यतावच्छेदकधर्मवत्वरूपस्वरूपयोग्यतासम्बन्धेन प्रवृत्तौ अन्वयः भवति इति तु अभ्युपगम्यते । परन्तु प्रयोज्यतावच्छेदकधर्मः कः इति चिन्तनीयम् । न तावत् प्रवृत्तित्वम् । स्वतस्सिद्धेष्टसाधनताज्ञानात् प्रेरणां विनापि प्रवृत्तेः सम्भवात् प्रवृत्तित्वावच्छिन्नं प्रति प्रेरणायाः प्रयोजकत्वं न सम्भवति । अतः प्रेरणाप्रयोज्यतावच्छेदकधर्मः प्रवृत्तित्वं भवितुं नार्हति । तथा च प्रेरणोत्तरप्रवृत्तित्वावच्छिन्नं प्रति प्रेरणायाः प्रयोजकत्वं वक्तव्यम् । एव च प्रेरणाप्रयोज्यतावच्छेदकधर्मः प्रेरणोत्तरप्रवृत्तित्वम् अथवा प्रेरणोत्तरप्रवृत्तिमात्रवृत्तिः प्रवृत्तित्वव्याप्यधर्मविशेषः । तथा च प्रेरणायाः स्वप्रयोज्यतावच्छेदकप्रेरणोत्तरप्रवृत्तित्वसम्बन्धेन अथवा प्रेरणोत्तरप्रवृत्तिमात्रवृत्तिप्रवृत्तित्वव्याप्यधर्मविशेषत्वसम्बन्धेन प्रवृत्तौ अन्वयः । स्वतस्सिद्धेष्टसाधनताज्ञानजन्यप्रवृत्तौ प्रेरणोत्तरप्रवृत्तित्वरूपस्य प्रेरणोत्तरमात्रवृत्तिप्रवृत्ति-त्वव्याप्यधर्मविशेषस्य वा प्रेरणाप्रयोज्यतावच्छेदकधर्मस्याभावेन तादृशधर्मवत्वसम्बन्धेन प्रेरणात्वस्य बाधात् पाकवर्तमानतादशायां "चैत्रः पचेत्" इति प्रयोगापत्तिः न भवति ।

नन्वेवमपि यत्रान्यप्रेरणया चैत्रस्य प्रवृत्तिः तत्र पाकवर्तमानतादशायां चैत्रः पचेत् इति प्रयोगस्य प्रामाण्यापत्तिः न वारयितुं शक्यते खलु इति चेत् – उच्यते – मीमांसकैः प्रेरणायाः विषयतासम्बन्धेन प्रवृत्तौ अन्वयः नोच्यते । प्रेरणाविषयीभूतप्रवृतिविषयत्वेन यागादौ नान्वयः । अपि तु लिङर्थप्रेरणायाः स्वविषयकज्ञानजन्यानुमितिप्रयोज्यत्वसंसर्गेण प्रवृत्तौ अन्वयः । प्रवृत्तिप्राक्कालीनं यत् लिङादिपदज्ञानं तज्जन्यं यत् प्रेरणाविषयकं ज्ञानं , तज्जन्या या इष्टसाधनत्वानुमितिः तत्प्रयोज्यत्वसम्बन्धेन प्रेरणायाः प्रवृत्तौ अन्वयः इति । अन्यप्रेरणाजन्यप्रवृत्तिवर्तमनतादशायां "चैत्रं पचेत्" इति प्रयोगापत्तिः इदानीमापादयितुं न शक्यते । अतः तार्किकरीत्या इष्टसाधनत्वादेः लिङर्थत्वं न भवति इति ।

॥ इति शम् ॥

# ‘विना’ योगे काः विभक्तयः भवन्ति? कथम्?

**आचार्यः सि. एस्. एस्. नरसिंहमूर्तिः**

आचार्यः, व्याकरणविभागः

पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् इति सूत्रेण पृथक्-विना-नानापदैः योगे तृतीया वा विधीयते । अतस्तृतीया विभक्तिर्भवति । यथा – रामेण विना, बालकेन विना । पृथक् रामेण, पृथक् बालकेन, रामेण नाना, बालकेन नाना इत्यादीन्युदाहरणानि भवन्ति ।

तृतीयायाः वैकल्पिकतया तदभावे पञ्चमी - द्वितीये भवतः । अत्र सूत्रेऽन्यतरस्यां ग्रहणं समुच्चयार्थं कृतम् । तेन पृथक् रामात्/रामम् । नाना रामात्/रामम् । विना रामात्/रामम् इत्यादीनि रूपाणि भवन्ति । अत एतैः पदैर्योगे तिस्रः विभक्तयः भवन्तीति सिद्धान्तकौमुदीकारस्याशयः ।

एतत्सूत्रभाष्यपरिशीलनेन ज्ञायते – तत्र द्वे एव विभक्ती भवत इति । तत्र भाष्ये इत्थं विचारोऽकारि । ‘पृथगादिषु पञ्चमीविधानम्’ इति वार्तिककारोऽकथयत् । ‘अपादाने पञ्चमी’[1] इति सूत्रात् पञ्चमी इत्यनुवर्तते । अतः पृथग्वार्तिकस्यावसरो नास्तीति भाष्यकृता समाहितम् ।

ततो वार्तिककृद् ‘अनधिकारात्’ इत्यवादीत् । तस्यायमाशयः – तदनन्तरसूत्रं वर्तते अन्यारादितरर्ते- दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते[2] इति अतस्तेनैव सम्बध्यते, परेषु योगेषु नाधिक्रियते । अतः पञ्चम्याः विधानं कर्तव्यमेवेति ।

ततो वार्तिककृद् – इत्थम् आशङ्कामकार्षीत् । ‘अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः’ इति । ‘एनबन्तेन योगे’ एनपा द्वितीया[3] इत्यनेन द्वितीयाविभक्तिर्विहिता – ‘ग्रामं दक्षिणेन’ इति । एवमेव ‘अतसर्थप्रत्ययेन योगे षष्ठ्यतसर्थप्रत्ययेन इत्यनेन षष्ठीविभक्तिर्विधीयते – ग्रामस्य दक्षिणतः इति । अत्रोभयत्रापि पञ्चमी प्राप्नोति अतस्तस्याः प्रतिषेधो वक्तव्यः इति चिन्तायाम् -

[1] अष्टाध्यायी (सू. सं २-३-२८)

[2] अष्टाध्यायी (सू. सं २-३-२९)

[3] अष्टाध्यायी (सू. सं २-३-३१)

भाष्यकृत् इत्थं समाहितवान् । अन्यतरस्यां ग्रहणसामर्थ्यात् पञ्चमी भविष्यति । कैयटेनैवं व्याख्यातम् - अन्यतरस्यां ग्रहणं पक्षे विभक्त्यन्तरप्रापणार्थं सद्व्यवहितामपि पञ्चमीं प्रापयिष्यतीति । अतो द्वितीयायाः सम्भावना नास्ति इति ज्ञायते ।

अन्यतरस्यां ग्रहणसामर्थ्यात् पूर्वोक्तकल्पना कर्तुं न शक्यते । तस्य प्रयोजनान्तरं विद्यते । यस्यामावश्यकप्राप्तायां या विभक्तिरारभ्यते सा तस्याः बाधिका भविष्यति । षष्ठ्यामावश्यकप्राप्तायां या तृतीयाऽऽरब्धा, सा षष्ठ्याः बाधिका भविष्यति । अतस्तृतीयाया अभावे का विभक्तिर्भवतीति सन्देहे प्रकृतमनुवर्तते अपादाने पञ्चमीति । तदा इत्थं समाहितम् । अनधिकारः सः, अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः इति ।

तत्र पञ्चम्याः अनुवृत्तिविषये इको गुणवृद्धीति सूत्रे 'वृद्धिरादैच्', इत्यतः वृद्धिपदानुवृत्तिः अदेङ्गुणः इति सूत्रस्पर्शेन विना यथा सम्बध्यते तथोपपादितमत्र । प्रथमं समाधानम् – सम्बन्धमनुवर्तिष्यते – अपादाने पञ्चमी ।

अन्यारादितरर्ते - इत्यादिसूत्रम् । षष्ठयतसर्थप्रत्ययेन । अन्यारादिभिर्योगे पञ्चमी । एनपा द्वितीया । अन्यारादिभिर्योगे पञ्चमी । पृथग्विनेति सूत्रे पञ्चमीग्रहणमनुवर्तते, अन्यारादिभिर्योगे इति निवृत्तम् । षष्ठ्यतसर्थेति सूत्रे, एनपा द्वितीयेति सूत्रे च पञ्चम्याः सम्बन्धः पृथग्विनेति सूत्रे सम्बन्धार्थम्, न तु ताभ्यां सम्बध्यते ।

द्वितीयं समाधानम् – मण्डूकगतयोऽधिकाराः । मण्डूको यथा उत्प्लुत्य गच्छति तद्वदधिकारः । अतो मध्ये विद्यमानयोर्द्वयोस्सूत्रयोरतिक्रम्य प्रवर्तते । इत्थमत्र पञ्चमी भविष्यति ।

तृतीयं समाधानम् – अन्यवचनाच्चकाराऽकरणात् प्रकृतस्याऽपवादो विज्ञायते यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति । अन्यविभक्तेः विधानात् अनुकरणार्थस्य चकारस्याकरणात् पञ्चम्या द्वितीयाषष्ठ्यौ बाधके भविष्यतः । यथा अपवादेनोत्सर्गस्य बाधः ।

षष्ठ्यतसर्थप्रत्ययेन, एनपा द्वितीयेति सूत्रे पञ्चम्याः अनुवृत्तावपि किमुत्तरार्था, इहार्था वेति संदिग्धा, षष्ठीद्वितीये तत्तत्सूत्राभ्यां विधानेनासन्दिग्धायां ताभ्यां पञ्चमी बाध्यते । अतः तयोस्सूत्रयोः पञ्चमी सम्बन्धो न भवति ।

चतुर्थं समाधानम् – अनुवर्तन्ते च नाम विधयो, न चानुवर्तनादेव भवति । किं तर्हि? यत्नाद्भवति । पूर्वयोः सूत्रयोः पञ्चम्याः अनुवृत्तिर्भवति चेदपि यत्नाभावान्न सम्बध्यते ।

पृथग्विनेति सूत्रेऽन्यतरस्यामिति यत्नसत्त्वात्सम्बध्यते । अतः पञ्चमीविधानं भवति । एवञ्च विना योगे तृतीयापञ्चम्यौ भवतः ।

एतद्भाष्यपरिशीलनेन विना योगे द्वितीया न भवति' इति ज्ञायते । कथं तर्हि? विना रामं महारथम् ।

**विना वातं, विना वृष्टिं, विद्युत्प्रतपनं विना ।**

**विनाहस्तिकृतान् दोषान् केनेमौ पतितौ द्रुमौ ॥ इति ।**

तत्र सर्वत्र विनायोगे 'उभसर्वतसोः कार्य---- इत्यादि कारिकाघटक ततोऽन्यत्रापि दृश्यते' इति वार्तिकभागेन उपपदद्वितीया भवति । एतेषु स्थलेषु द्वितीया साधनार्थं तस्याः समुच्चयो न वक्तव्यः । प्रत्युत समुच्चयो न भाष्यसम्मतः ।

तत्र सूत्रे भाष्ये वार्तिककारेण 'अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः' इत्युक्तम् । तत्र द्वितीयाषष्ठीति क्रमदर्शनेन 'एनपा द्वितीया' इति सूत्रानन्तरमेव "षष्ठ्यतसर्थप्रत्ययेन" इति अष्टाध्यायीक्रम इत्यवगम्यते । अतः द्वितीयेति पदस्य तदनन्तरस्थे षष्ठ्यतसर्थेति सूत्रेनुवृत्तेरभावेन मध्ये विच्छिन्नत्वान्नात्रानुवर्तते । सूत्रक्रम इत्थमेव भवतीत्यत्र किं प्रमाणमिति चेत् – षष्ठ्यतसर्थप्रत्ययेन, एनपा द्वितीयेति सूत्रक्रमे वार्तिके 'षष्ठीद्वितीयाविषये इति वार्तिककृद् अवक्ष्यत् । द्वितीयाषष्ठीति द्वन्द्वे अल्पाच्तरत्वेन षष्ठीशब्दस्य पूर्वनिपातस्य न्याय्यत्वात्, न्यायविपरीतपूर्वनिपातकरणे बीजाभावाच्च ।

प्रायः पूर्वनिपातप्रकरणनियमान् पालयति वार्तिककृत् । यथा - इको गुणवृद्धीति सूत्रे 'वृद्धिगुणावलोऽन्त्यस्येतिवार्तिके वृद्धिगुणौ' इति प्रायुङ्क । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्[१] इति सूत्रे वार्तिकम् – अवरादीनां च पुनः सूत्रपाठे ग्रहणानर्थक्यं गणे पठितत्वात्' इति । तत्रोद्योते नागेशभट्टः व्याख्यत् – लघ्वक्षरत्वादजन्तत्वाच्च सूत्रेऽवरशब्दस्यैव पूर्वनिपात उचित इत्याशयेनावरादीनामित्युक्तं वार्तिककृतः इति ।

ननु पूर्वनिपातप्रकरणं सूत्रकारेणैव न पालितम् यतः – इको गुणवृद्धी, द्व्येकयोः, अजाद्यतः इत्यादिनिर्देशैः ज्ञायते । तदधारेण कथं निर्णेतुं शक्यत इति चेत् –

[१] अष्टाध्यायी (सू. सं. १-१-३४)

उच्यते, अष्टाध्यायां पृथग्विनेति सूत्रानन्तरं 'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य [१] इति सूत्रे द्वितीयेत्यस्यासम्बन्धः । आह सिद्धान्तकौमुदीकारः – 'एभ्योऽद्रव्यवचनेभ्यः करणे ततीयापञ्चम्यौ स्तः' इति ।

इदमत्र तत्त्वम् – यत्र विना योगे द्वितीया, तत्र ततोऽन्यत्रापि दृश्यते इत्यनेन भवति, न तु पृथग्विनोति सूत्रेणोति ।

अत एव कैयटाचार्यः प्रायः विना योगे तृतीयामेव प्रायुङ्क्त –

१. दुरवधारत्वादुपदिष्टोऽपि विवृतो व्याख्यानेन विना न शक्यते ज्ञातुमिति । [२]
२. विनापि धातुग्रहणेन लोपविशेषणमार्धधातुकग्रहणं विज्ञास्यते । [३]
३. विनाप्यार्धधातुकग्रहणेन बहुव्रीहिर्लभ्यते ।[४]
४. विनापि च क्रियापदप्रयोगेणाभीक्ष्ण्यवृत्तिर्नित्यशब्दः प्रयुज्यते ।[५]
५. यथा घटादीनां विनाप्यर्थक्रियया सत्त्वं गम्यते नैवं शब्दानाम् ।[६]
६. न हि विना शब्देनाऽर्थप्रत्यायनमुपपद्यते । [७]
७. यदि प्रयत्नेन विना फलं स्यात्प्रयत्नस्य वैयर्थ्यमापद्येत ।[८]
८. तत्र प्रकृतत्वादन्यपदार्थत्वेन संख्या स्वरितत्वेन विनाप्यपेक्ष्यत इत्यर्थः । [९]
९. वक्ष्यमाणेन न्यायेन विनाप्येकशेषेण सर्वशब्दस्य संज्ञा सिद्ध्यतीति । [१०]

[१] अष्टाध्यायी(सू. सं २-३-३३)
[२] अष्टाध्यायी(अइउण् सूत्रे)
[३] अष्टाध्यायी(न धातुलोप सूत्रे – २.२)
[४]अष्टाध्यायी( क्ङिति च -२२८)
[५] अष्टाध्यायी(पस्पशाह्निके)
[६] अष्टाध्यायी(पस्पशाह्निके)
[७] अष्टाध्यायी(पस्पशाह्निके)
[८] अष्टाध्यायी(पस्पशाह्निके)
[९] अष्टाध्यायी(बहुगणवतु इति संख्या)
[१०] अष्टाध्यायी(सर्वादीनि सूत्रे)

# आदिरन्त्येन सहेता इति सूत्रे संज्ञिविचारः

**डा. चन्द्रशेखरभट्टः**

सहाचार्यः, व्याकरणविभागः

वर्णानामुपदेशस्तावत्, उपदेशोत्तरकाला इत्संज्ञा, इत्संज्ञॉत्तरकाल आदिरन्त्येन सहेतेति प्रत्याहारः, प्रत्याहारोत्तरअकाला सवर्णसंज्ञा, सवर्णसंज्ञोत्तरकालम् अणुदित्सवर्णस्य चाप्रत्ययः इति सवर्णग्रहणम् एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानाम् ग्रहणं भवति" इति नाज्झलौ इति सूत्रभाष्य[१]प्रामाण्यात् वर्णोपदेशोत्तरम् इत्संज्ञायां कृतायां प्रत्याहारसूत्रस्य प्रसक्तिः। यद्यपि इह सूत्रे अन्त्येन इता सह आदिरित्येवं संज्ञामात्रनिर्देशात् संज्ञिविशेषस्यानिर्देशात् अप्रतिपत्तिः तथापि आद्यन्तशब्दाभ्यामवयववाचकाभ्यां मध्यगा आक्षिप्यन्त इति तेषामेव संज्ञित्वम्। तदुक्तं भाष्ये[२] 'सम्बन्धिशब्दैर्वा तुल्यम्। तद्यथा मातरि वर्तितव्यं पितरि वर्तितव्यम् इत्युक्ते नैवोच्यते स्वस्यां स्वस्मिन् इति। सम्बन्धाद् गम्यते या यस्य माता यो यस्य पितेति।एवमिहापि आद्यन्तशब्दौ सम्बन्धिशब्दाविति सम्बन्धादवगन्तव्यं यं प्रति य आदिः योऽन्त्य इति भवति तस्य ग्रहणम्' इति।अयमाशयः – सत्यन्यस्मिन् यस्मात्पूर्वो नासि स आदिः, सत्यन्यस्मिन् यस्मात्परो नास्ति सोऽन्त्यः।ईदृशयोः आद्यन्तशब्दयोः सूत्रे उपादानात् मध्यगा गम्यन्ते तेषां संज्ञित्वम्। ततश्च अन्त्येनेता सहोच्चार्यमाणो मध्यगानां संज्ञा स्यादिति सूत्रार्थो लभ्यते। नन्वेवमपि आदिवर्णस्य प्रत्याहारे ग्रहणं दुर्लभम्, आद्यन्तयोर्वर्णयोः संज्ञास्वरूपबोधकतया शक्तिग्रहकाल एव पारार्थ्यनिर्णयात्। यद्यप्यत्र भाष्ये मध्यगानां स्वस्य च संज्ञित्वमुक्तम् तथापि स्वस्य इत्यर्थलाभोपयः क इति जायते विचारणा। स्वं रूपं शब्दस्य[३] इति सूत्रात् स्वमिति पदमनुवर्त्य स्वस्य इति षष्ठ्यन्ततया विपरिणामात् आदेरपि संज्ञित्वमिति लभ्यते। ततश्च अन्त्येनेता सहितः वर्णात्मकः तत्सङ्घातात्मको वा आदिः मध्यवर्तिनां संज्ञा । वर्णात्मको यथा - अल् अण् अक् अच् । वर्णसङ्घातात्मको यथा सुप् तिङ् कृञिति। संज्ञाधिकारात् अस्य संज्ञासूत्रत्वे सति संज्ञिमात्रं संज्ञयैवाक्षिप्यते । संज्ञिविशेषस्तु आद्यन्तशब्दाभ्यामिति विवेकः । तथा च

---

[१] म.भा.१ पृ.२४३

[२] म.भा.१.१.७१ पृ.५६६

[३] पा.सू.१.१.६९

कैयटः[१] 'संज्ञयैवाक्षिप्तः संज्ञी, आद्यन्तौ मध्यापेक्षाविति मध्यगानामेव संज्ञित्वं स्वं रूपमित्यनुवर्तनात् स्वरूपस्य चे'ति । हरदत्तेन[२] तु यद्यपि आद्यन्तावयवौ समुदायरूपस्यावयविनः सम्बन्धिनौ तथापि तस्य युगपल्लक्ष्ये प्रयोगाभावात् समुदायिन इयं संज्ञेत्युक्तम् । तत्रानर्थक्यात् तदङ्गेषु इति न्यायेनावयवेष्ववतरन्ती संज्ञा मध्यगेष्वेव विश्राम्यति नत्वाद्यन्तयोः संज्ञा स्वरूपान्तर्भावेन पारार्थ्यात् । अतः आदेरपि संज्ञित्वलाभाय स्वंरूपमित्यनुवर्तितम् । स्वं रूपञ्चादेरेव गृह्यते प्रथमान्तपदोपस्थाप्यस्य प्राधान्यात्। कैयटस्त्वाह[३] स्वं रूपञ्चादेरेव गृह्यते नान्त्यस्य तस्याप्राधान्यात्। अन्त्येनेति ह्यप्रधाने तृतीया, तेन दध्यत्रेत्यादौ केवल एव यकारः प्रवर्तते न णकारसहित इति । 'प्रत्याहारेषु आद्यवर्णो वाचकः तत्र ग्रहणकशास्त्रं सावकाशम् । ग्रहणकसूत्रस्थभाष्यादिपर्यालोचनया वाचकत्वं तावदाद्यवर्णे विश्रान्तम् अन्त्यस्तु तात्पर्यग्राहकः । सहग्रहणात्तु विशिष्टाद्विभक्त्युत्पत्तिरिति स्थितम् इति कौस्तुभकृत्[४]। ननु अन्त्येन सहितः आदिस्संज्ञेत्यत्र आद्यन्तयोस्साहित्यं प्रतीयते। ततश्च पाणिपादं वादयेति परस्परसाहित्यावच्छिन्ने समुदाये वादनवत् आद्यन्तवर्णसमुदाये संज्ञात्वस्य युक्तत्वात् कथमत्र आदेरेव स्वरूपमिति पदेन उपस्थितिरिति चेदुच्यते। अप्राधान्यादन्त्यस्य णकारादेः न संज्ञाकोटौ निवेशः । पाणिपादं वादयेत्यत्र समासार्थत्वेन तदवच्छिन्नपदार्थे वादनान्वयः पर्यवस्यति । इहत्वस्य साहित्यावच्छिन्ना आदिस्संज्ञेति आदेरेव संज्ञात्वान्वयः । ननु पुत्रेण सहागतः पितेत्यादौ आगमनक्रिया पितापुत्रयोः प्रधानाप्रधानयोः उभयोरपि भवति तथा इहाप्युभयोरपि संज्ञात्वं स्यात् इति चेत् सत्यम्, पुत्रेण सहागतः पितेत्यत्र आगमनक्रिया पुत्रेऽपि प्रतीयते परं न शब्दतः । तथात्वे तिलैः सह माषान्वपतीत्यादौ कारकविभक्तिप्रसङ्गात् । अन्त्येन सहितः आदिः संज्ञेत्युक्तौ तु पुत्रैः सह भारं वहति गर्दभीतिवदर्थसामर्थ्यमपि नास्तीति न अन्त्यविशिष्टे संज्ञा । नच स्वंरूपमित्यनुवृत्त्यैव संज्ञाकाङ्क्षाशान्तेः मध्यगानामाक्षेपो न स्यादिति वाच्यम् ; तथा सति

---

[१] म. भा १.१.७१ पृ. ५६६

[२] काशिका १.१.७१ पृ . ७६

[३] म भा.१. पृ.५६६

[४] शब्दकौस्तुभः १ पृ.२८४

अण् अट् इत्यादिभिन्नभिन्नसंज्ञाकरणस्य एतत्सूत्रस्य च वैयर्थ्यं स्यात् । नागेशस्तु[1] आद्यन्तशब्दाभ्याम् अवयवत्वेन बोधकाभ्यां स्वघटितसमुदाय आक्षिप्तः संज्ञी। तस्य चैकत्र लक्ष्ये प्रयोगाभावात् प्रत्येकं संज्ञित्वम्। अन्त्यस्य तु न तत्संज्ञा तस्य इत्संज्ञलोपाभ्यामपहारात्। एतत्पलितार्थकथनमेवभाष्ये स्वस्य च रूपस्य इत्युक्तम्। स्वमित्यनुवृत्तिपरत्वेन व्याख्यनम् तु हेयमेव, अनुवृत्तौ फलाभावात् इत्यवोचत्।

प्रमाणग्रन्थाः-

१. महाभाष्यम्, चौखाम्बासंस्कृतप्रतिष्ठानम्,देहली, १९८७
२. लघुशब्देन्दुशेखरः, वाणीविलासप्रकाशन,वाराणसी, १९९१
३. शब्दकौस्तुभः, चौखाम्बा संस्कृत सिरीज आफीस,वाराणसी,१९९१
४. काशिका ,सुधीप्रकाशन, वाराणसी १९८५
५. वैयाकरणसिद्धान्तकौमुदी,मोतीलाल बनारसीदास,दिल्ली,१९८९

[1] लघुशब्देन्दुशेखरः पृ.५३

# साध्यत्वम्

**डा. चिर्रावूरि कृष्णानन्तपद्मनाभम्**

सहायकाचार्यः, व्याकरणविभागः

साध्यत्वं नाम किमित्यत्र प्राचीनार्वाचीनयोर्मतयोर्वैलक्षण्यं वर्तते। किं नाम साध्यत्वं तस्य लक्षणं किम्, तद्विषये प्राचीनार्वाचीनयोर्मते अनुसृत्यात्र विवेचनं क्रियते। तदादौ क्रियायाः स्वरूपं किमिति विविच्यते।

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥
गुणभूतैरवयवैस्सम्मूहः क्रमजन्मनां
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥

इति कारिकाभ्यां क्रियासमुद्देशे तस्याः स्वरूपं भर्तृहरिणा प्रतिपादितम्। सपरिस्पन्दसाधनसाध्यार्थस्य क्रियात्वेन व्यवहारो दृश्यते, सपरिस्पन्दापरिस्पन्दान्यतरसाधनसाध्यार्थस्य भावत्वेन च। प्रकृते तु यः कोऽपि पदार्थः साध्यत्वेन यदि विवक्ष्यते तमर्थं क्रिया इति व्यपदिशन्ति शास्त्रकृतः। न चैवं घटं करोतीत्यादौ घटस्यापि साध्यत्वेन भानात् तस्यापि क्रियात्वापत्तिरिति वाच्यम्, असिद्धे कथञ्चित् तथा भानेऽपि सिद्धे अर्थात् भूते स साध्यत्वेन न भासत इति न तस्य क्रियात्वापत्तिः।

चैत्र ओदनमपाक्षीत्, चैत्र ओदनं पक्ष्यति, चैत्र ओदनं पचतीत्यादौ सिद्धे भूते उतासिद्धे भविष्यद्वर्तमानयोर्वा साध्यत्वेनाभिधीयते चेत् सा क्रिया इत्यभिधीयते इति। साध्यत्वेन भानं च क्रमजन्मभिः गुणभूतैरवयवैः बुद्ध्याप्रकल्पिताभेदसमुदायवत्त्वेन। पचतीत्यत्र पचधातोर्विक्लित्त्यनुकूलव्यापारो धात्वर्थः। स च व्यापारः नैकक्षणसाध्यः। तण्डुलग्रहणक्षालनोदकासेचनाधिश्रयणदर्व्यालोडनफूत्काराधश्श्रयणान्तो बहुकालसाध्यः। स च व्यापारसमूहः न ह्यकक्षणसाध्यो नापि प्रत्यक्षः।अतः क्रमजन्मनामेषां समूहः बुद्ध्या कल्पनीयः। प्रकल्पितश्च स समूहः प्रत्येकस्मिन् क्षणे तण्डुलग्रहणादावेकैकत्राभिन्नरूपेणापि कल्पनीयः।

अत एव तण्डुलग्रहणसमयेऽपि चैत्रः किं करोतीति प्रश्ने पचतीति, एवमेवाधश्श्रयणसमयेऽपि चैत्रः किं करोतीति प्रश्ने च पचतीत्युत्तरं संगच्छते। वर्तमानकालेऽपि कतिपयक्रियावयवानाम् अतीतत्वेऽपि कतिपयक्रियावयवानां भावित्वेन

तदादय साध्यत्वेन भानं संगच्छते। भविष्यत्काले च सर्वांशेनावयवक्रियाणां भावित्वेन तत्रापि साध्यत्वेन भानमविरुद्धम्। भूते सर्वासामवयवक्रियाणाम् अतीतत्वेन तत्र साध्यत्वं कथमिति प्रश्नस्त्ववतिष्ठते। तत्रेदं समाधानं सर्वासामवयवक्रियाणामधिश्रयणादीनामतीतत्वेऽपि तद्भानं तु साध्यतयैवेति। बुद्ध्या प्रकल्पिताभेदवत्त्वस्य सत्त्वेन तथैव भानाभ्युपगमात्।

यथा वा घटं करोतीत्यत्र घटस्य असत्त्वेऽपि कथञ्चित् तस्य सिद्धत्वमादाय प्रातिपदिकत्वम्, घटं करिष्यतीत्यत्र च अत्यन्तमसन्नपि घटः सिद्धतयैव भासते। अन्यथा तत्र तस्य प्रातिपदिकत्वाभावेन सुबनापत्तेः। सिद्धरूपेण भासमाने तस्मिन् कर्मप्रत्ययेन साध्यत्वभानमपीत्यन्यदेतत्। प्रातिपदिकत्वसंपादनार्थं तु तत्र तस्य सिद्धतयैव भानावश्यकत्वात्। भासमानश्च स घटपदार्थो बाह्य उत बौद्धो वेत्यत्र च नाग्रहः। वैयाकरणैर्बौद्धस्यापि पदार्थस्याभ्युपगमात्। एवमेव भविष्यत्कालिकी हि या कापि अनिष्पन्नापि एव भवति क्रिया, बुद्धौ भासमाना च साध्यात्मना। अतीता या काचिदपि क्रिया भूतकालिकी चेदपि तस्या बोधे भानं तु साध्यात्मनैव, भविष्यत्कालिकः एतावता नारब्ध इति असिद्धोऽपि तादृशः स घटः सिद्धतयैव भासते प्रातिपदिकत्वार्थं तद्वत्।

न चैतावता क्रियाया गौणत्वापत्तिरि शङ्क्यम्, क्रिया सर्वापि ईदृशी लभ्यते या सर्वावयवेषु आरोपितक्रमवती। सर्वस्मिन्नपि क्रियावयवे आरोपं विना निर्वाहासंभवात्। वाक्यपदीये भर्तृहरिणोक्तं व्यवहारस्य मुख्यत्वान्न चेयं गुणकल्पना।

उपचारो हि मुख्यस्य सम्भवादवतिष्ठते॥ इति।

सर्वावयवैस्सह उपलब्धिमान् घटः घटपदेन शक्यः। प्रयोजकप्रयोज्यव्यवहारेण शक्तिग्रहकाले तथैवानुभवात्। क्रिया तु सर्वावयवसहिता नैकदा लभ्यते। मुख्या क्रिया इति कदाचिदपि अस्मदादिभिः ग्रहीतुं शक्या। योगिप्रत्यक्षादौ कथा त्वन्या। शास्त्रं त्वस्मदाद्युद्धरणेच्छयैव प्रणीतम्। न योगिमुन्यादीनुद्धर्तुम्। तथाच क्रिया सर्वावयवसंयुक्ता न युगपदुपलभ्यते। एवं चारोपं विना क्रियाया अनुपलभ्यमानत्वेन सर्वत्रारोपाविशेषाद् इयं गुणकल्पना न।

फलस्यापि व्यापारगतपौर्वापर्यारोपेण तथैव भानम्। वस्तुतस्तु फलमपि नैकक्षणसाध्यमिति तस्मिन्नपि आरोपस्य आवश्यकतास्त्येव। व्यापारगतपौर्वापर्यारोपेणैव फलं क्रमवदित्यत्र मानाभावात्। तथा च फलमपि साध्यतयैव भासते।क्रियतेऽनयेति क्रिया। भावे कृञश्श च इति शः। क्रियतेऽसाविति क्रिया। श एव कर्मणि बाहुलकात्। साध्यत्वं नाम

क्रियान्तराकाङ्क्षानुत्थापकतावच्छेकधर्मवत्त्वमिति प्राचीनाः। सार्वधातुके यगिति सूत्रे भाष्ये "अस्ति खल्वपि विशेषः तिङभिहितभावस्य कृदभिहितभावस्य च। कृदभिहितो भावो द्रव्यवत्प्रकाशते। द्रव्यं क्रियाभिनिर्वृत्तौ साधनत्वमुपैति। तद्वच्चास्य कृदभिहितस्य भवति। पाको वर्तत इति। तिङि क्रिया क्रियया समवायं न गच्छति पचति पठति इति" इति। तिङभिहितस्य भावस्य इत्यस्य तिङन्तप्रकृतिभूतधातुवाच्यस्य भावस्य इत्यत्र तात्पर्यम्। भावे तिङ्प्रत्यये धात्वर्थस्यैवानुवादात्। कृदभितहित इत्यत्र च भावकृदन्ताभिहितस्येत्यर्थः। पदान्तरसमभिव्याहारे सतीत्यध्याहारो द्रष्टव्यः। पाको वर्तत इत्युदाहरणबलात्।

एवं च तिङन्तप्रयोगे क्रियान्तराकाङ्क्षा नोदेति कृदन्तप्रयोगे तूदेतीति प्रथमवाक्येतिङ्न्तात् क्रियान्तराकाङ्क्षा नास्तीति तत्र साध्यत्वेन भानम्, पाक इत्यादौ तु क्रियान्तराकाङ्क्षाया उदयेन सिद्धत्वेन भानम्। तिङि क्रिया क्रियया समवायं न गच्छति पचति पठति इति भाष्यात् तिङन्ते तिङ्प्रकृतिधातुवाच्यक्रिया क्रियान्तरं नाकाङ्क्षतीति क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वमिति लक्षणं भाष्यकृन्मतमिति दीक्षितादीनामाशयः। इदं भाष्यमेकदेशिभाष्यमिति नागेशाशयः। पचति पठतीति विजातीयक्रिययोर्मध्ये पचधातुवाच्यक्रिया पठधातुवाच्यक्रियायां कर्त्रीत्वेन नान्वेतीत्येव भाष्याशयः। क्रियाविशेषाभिप्रायकमिदं भाष्यम्। नैतावता क्रियासामान्यविषयकमिदमिति चिन्तनीयम्। भूवादयो धातव इत्यत्र पचति भवति इत्यादौ पच्यादयः क्रियाः भवतिक्रियायां कर्त्र्यो भवन्तीति भाष्यकारैरेवोक्तत्वात्। तथा च तिङन्तस्थलेऽपि क्वचित् क्रियान्तराकाङ्क्षाया दर्शनेन क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वं साध्यत्वमिति वक्तुमशक्यम्।

अत एव नव्यानां मते कर्तृकर्मेतरकारकाभाववत्त्वस्यैवासत्त्वरूपत्वं साध्यत्वं परिष्कृतम्। तत्र च प्रमाणम् एओङ्सूत्रे भाष्ये "इदं विचार्यते – इमानि सन्ध्यक्षराणि तपराणि वोपदिश्येरन् 'एत्-ओत्-ङ् ऐत्-औच्-ङ् इति, अतपराणि वा यथान्यासम' इति" इत्यत्र वाक्ये कस्य पदर्थस्य किंकारकत्वेन कस्यां क्रियायाम् अन्वय इति विचारावसरे इदं पदार्थः तपरातपरसन्ध्यक्षरोपदेशो गृह्यते। स चोपदेशो विचारक्रियायां कर्मतयान्वेति। यद्यपि "विचार्यते" इत्यनेन पदेनोपस्थापिता सा क्रिया साध्यत्वेन भासते। साध्यत्वेन भासमानस्यास्य क्रियारूपस्यार्थस्य क्रियान्तरे कर्मतयान्वयः कथमिति प्रश्नो जागर्ति तथापि इदंशब्देन परामृष्टा सा क्रिया सत्त्वरूपतां प्राप्नोति। अर्थाद्द्रव्यरूपतामाप्नोति। उपदिश्यत इति तिङन्तेन पदेनोपस्थापिता उपदेशनक्रिया वस्तुत साध्यस्वभावा न द्रव्यायमाणा सा तथापि

बुद्ध्या परामृष्टत्वात् सत्त्वरूपतां प्राप्तेति विचार्यत इति तिङन्तान्तरेणोपस्थितायां विचारणक्रियायां कर्मतयान्वयः भवतीति न किञ्चिदनुपपन्नमिति।

यद्यपि एओङ् इत्यादीनाम् उपदेशस्य कृतत्वेन पुनर्विचारेण न किञ्चित् फलं तथापि कृत्वाचिन्तान्यायानुरोधेनेदं द्रष्टव्यम्। किञ्च प्रत्यक्षविषयेणेदमैवं परामर्शोऽनुपपन्नः। इदमा सत्त्वरूपस्यैव परामर्शकजनकताया बहुशो दृष्टत्वेन प्रकृते असत्त्वरूपोपदेशक्रिया तेन कथं परमृश्यते इति न चिन्तनीयम्। इदंशब्देन परामर्शो हि द्रव्यस्यैवेति प्रकृते चास्यां क्रियायां साध्यरूपायां सिद्धत्वारोपात् तस्य तत् कर्मत्वमनुभवितुमर्हति। अयं च कैयटदीक्षितादिप्राचीनानामाशयः।

तेषां मते क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वस्यैवासत्त्वरूपत्वेन तस्यात्राभावेनानुपपन्नमिदम्। क्रिया हि स्वजनकं कारकमाकाङ्क्षति, कारकं स्वान्वयवतीं क्रियामाकाङ्क्षति। क्रियाकारकयोः परस्पराकाङ्क्षायाः सत्त्वेन प्रकृते उपदेशक्रियायाः कर्मकारकत्वेन तस्य विचारणक्रियया सहाकाङ्क्षायाः सत्त्वेन क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वस्याभावेन साध्यत्वस्य तैर्वक्तुमशक्यत्वात्। उपदेशक्रियायाः साध्यत्वेन भानाभावे तु इदंपदार्थस्य तत्र कर्मतया चान्वयो न स्यात्। उपदेशक्रियायाः विचारणक्रियायां कर्मत्वरूपं कारकत्वमप्यपेक्ष्यते, इदंपदार्थस्य अन्वयार्थं साध्यक्रियात्वमपेक्ष्यते। साध्यत्वकारकत्वे हि परस्परविरुद्धधर्मौ इति तु न मन्तव्यम्। साध्यावस्थायां विद्यमानाया उपदेशक्रियायाः साध्यावस्थायामेव विद्यमानविचारक्रियायाम् अन्वये बाधकाभावात्। पचति भवतीतिवत् पचति पठतीति कुतो न स्यादिति चेत् तत्र योग्यताया अभावात्। सामान्यविशेषभावापन्नयोरेव तिङन्तप्रकृतिभूतधातु-वाच्यक्रिययोरेवमन्वयः पचति भवतीति भाष्योदहरणादिति चेन्न। मृगो धावति पश्य, इदं विचार्यते – उपदिश्येरन् इत्यादिबहुलप्रयोगात्। तत्र च विजातीययोरपि तिङन्तप्रकृतिभूतधातुवाच्ययोः अन्वयदर्शनात्।

ईदृशस्थले पचति भवतीत्यादौ पचधातुवाच्यक्रियायाः भवतिक्रियायां कर्तृत्वं, मृगो धावति पश्य इत्यादौ धावनक्रियायाः दर्शनक्रियायां कर्मत्वं वा संसर्गमर्यादयैव लभ्यते। नैतावता तस्य सिद्धत्वेन भानमावश्यकम्। तथाच देवदत्तः पचति भवति इत्यादौ देवदत्तः पाकक्रियायां कर्ता। पचधातुवाच्यक्रिया साध्यक्रिया इत्येव, ईदृशी साध्यक्रिया पाकः भवनक्रियायां कर्त्री। पचधातुक्रिया भवनक्रियायां कर्त्रीत्वेनान्वेति चेदपि तदितरकारकत्वेन

नान्वेतीति कर्तृकर्मेतरकारकाभाववत्त्वरूपस्य साध्यत्वस्य समन्वयः। एवमेव मृगो धावति पश्य इत्यादौ मृगस्य धावनक्रियायां कर्तृत्वम्। धावनक्रिया साध्यक्रियैवात्र। ईदृशधावनक्रिया दृशिक्रियायां कर्मतया अन्वेति। अतः दृशिक्रिया साध्यक्रिया इत्येव ग्राह्यम्।

ततश्च धावनक्रिया दृशिक्रियायां कर्मतया अन्वेति चेदपि तदितरकारकत्वेन नान्वेतीति लक्षणसमन्वयः भवति। एतद्भिन्नस्थले देवदत्तः अस्तीत्यादौ असधातुवाच्या क्रिया कर्तृत्वेन कर्मत्वेन वा इतरत्र नान्वेति। कर्तृकर्मेतरकारकाभाववत्त्वमस्तीति इदमेव साध्यत्वं भाष्यकृत्संमतं मतमिति नागेशाशयः।

एतादृशस्थले एकस्याः क्रियायाः अन्यस्यां क्रियायां कर्तृत्वेन कर्मत्वेन वा अन्वयार्थम् सिद्धत्वमाश्रयणीयमिति कैयटेनोक्तं तदनेन प्रत्युक्तं भवति। कारकत्वेनान्वयार्थं सिद्धत्वस्यैवावश्यकत्वमित्यत्र प्रमाणाभावात्। साध्यावस्थापन्नापि क्रिया कर्तृत्वेन कर्मत्वेन वा इतरक्रियायाम् अन्वेतीत्युक्तेऽपि बाधकाभावात्। एतादृशप्रयोगाणां निर्वाहार्थं सिद्धत्वमाश्रितं दीक्षितादिभिरपि। साध्यावस्थापन्नायाः सिद्धत्वं कथमिति चेत् क्रियायाः प्रत्यक्षतः गृह्यमाणत्वेन इति तेषामाशयः। क्रिया नामेयमत्यन्तापरदृष्टा पिण्डीभूता निदर्शयितुमिति भाष्येण किया न प्रत्यक्षा इति लभ्यते किन्तु सर्वावयवविशिष्टा पिण्डीभूता न प्रत्यक्षा किन्तु अवयवशः प्रत्यक्षा एव भवतीति। अतस्सिद्धतया भानम्। तेन च कारकत्वमपि सिध्यतीति। अत्रेदं चिन्तनीयम् – अवयवशः क्रियायाः प्रत्यक्षत्वे भाष्ये अत्यन्तपदस्वारस्यं भज्यते। तत्सामर्थ्यात् समूहरूपेण अवयवरूपेण च क्रिया अप्रत्यक्षा इत्येव भाष्यकाराणामाशयः। अवयवक्रिया अपि सावयवा इति तत्रापि अवयवक्रिया सावयवा इत्येव ग्राह्यम्। अवयवक्रियाया अपि एकक्षणसाध्यत्वाभावात्। यश्च निरवयवः सः शब्दशक्तिस्वभावात् धातुवाच्या नैव भवति। न च स प्रत्यक्षः। एवं च क्रियाया अवयवशः प्रत्यक्षत्वकथनमपि भाष्यविरुद्धम्। नन्वेवं पश्य मृगो धावतीति प्रयोगः कथम्। क्रियाया अप्रत्यक्षत्वे तस्या दृशिकर्मत्वकथनासंगतेरिति चेन्न तत्र दृशधातोः ज्ञानसामान्यार्थकत्वात्। अथवा धावुधातोः फलमात्रवाचित्वाद्वा इति स्पष्टं मञ्जूषायाम् इति शम्।

# ध्रुवमपायेऽपादानम्

**डा. प्रमोद भट्टः**
सहायकाचार्यः, व्याकरणविभागः

ध्रुवमपायेऽपादानम् इति इदं सूत्रम् अष्टाध्याय्यां प्रथमाध्याये चतुर्थपादे चत्वारिंशत्तमं सूत्रम्। अपादानसंज्ञा सूत्रेणानेन विधीयते। ध्रुवम् अपाये अपादानम् इति पदच्छेदः, त्रिपादं सूत्रम्। ध्रुवम् इति "ध्रु गतिस्थैर्ययोः" इत्यस्मात् धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (३/१/१३४)" इति पचाद्यचि "गाङ्कुटादिभ्योऽञ्णिन्ङित् (१/२/१)" इति कुटादित्वात् ङित्वे "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६/४/७७)" इति उवङि रूपम्। अथवा "ध्रुव् स्थैर्ये" इति धातोः "इगुपधज्ञाप्रीकिरः कः (३/१/१३५)" इति क प्रत्यये रूपम्। ध्रुवम् इति प्रथमाविभक्ति-एकवचनम्। अपाये इति अपाय इति शब्दस्य सप्तमीविभक्ति- एकवचनम्। अपादानम् इति प्रथमाविभक्ति-एकवचनम्, विधीयमानम्। "कारके" इति अधिक्रियते। अपायः विश्लेषः, तस्मिन् साध्ये ध्रुवमवधिभूतं कारकमपादानसंज्ञं स्यात् इति सूत्रार्थः। अपादानसंज्ञायां प्रयोजनम् "अपादाने पञ्चमी (२/३/२८)" इति पञ्चमीविभक्तिः। पञ्चम्यर्थः कः इति जिज्ञासायाम् अवधिः पञ्चम्यर्थः इत्युच्यते। तथा च "ध्रुवमपायेऽपादानम् (१/४/२४)" इत्यत्र विश्लेषवाचकेन अपायशब्देन विश्लेषजनकक्रिया विवक्षिता वर्तते। एवं च विश्लेषजनकक्रियायां ध्रुवम् अवधिभूतं यत् कारकं तदपादानसंज्ञकं भवतीति सूत्रार्थः फलति। वाक्यपदीये कारिकाचतुष्टयम् एवं वर्तते –

अपाये यदुदासीनं चलं वा यदि वा अचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते।। इति

अस्याः अयमर्थः "चैत्रः अश्वात् पतति" इत्यत्र उदाहरणे चलभूतम् अश्वादिर्वा भवतु, "कुड्यात्पततः अश्वात् पतति" इति उदाहरणे कुड्यादिर्वा भवतु, यदि विभागहेतुक्रियायाः अनाश्रयः स्यात्, विश्लेषस्य च आश्रयः स्यात् तदा ध्रुवमेव भवति। तदा तस्य अपादानमिति संज्ञा भवति। तथा च विश्लेषजनकक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वम् "अपादानत्वम्" इति। यथा वृक्षात् पर्णं पतति इति उदाहरणम्। अत्र विभागहेतुक्रियायाः आश्रयः पर्णम्, अनाश्रयः वृक्षः, यतो हि अत्र वृक्षः न पतति केवलं पर्णं पतति। प्रकृते विभागाश्रयौ वृक्षपर्णे उभे स्तः। तथापि विभागहेतुक्रियानाश्रयः सन् विभागाश्रयस्तु वृक्ष एव।

अतः वृक्षस्य पतनक्रियानिरूपिता अपादानसंज्ञा भवति। यदि विश्लेषजनकक्रियानाश्रयत्वे सति इति विशेषणं न उच्यते तदा विष्लेशाश्रयत्वम् अपादानत्वम् इति लक्षणं भवति। तदा अत्र पर्णस्यापि अपादानत्वापत्तिः स्यात्। यतो हि विभागः द्विष्ठः सर्वदा, अतः विश्लेषहेतुक्रियानाश्रयत्वे सति इति दलम्। पुनः इयं शङ्का विश्लेषजनक इति किमर्थम् इति चेत् "धावतोऽश्वात् पतति चैत्रः" इत्यत्र अश्वस्य अपादानसंज्ञार्थं विश्लेषजनक इति पदम्। नो चेत् प्रकृते धावनक्रियाश्रयत्वात् अश्वस्य अपादानसंज्ञा न स्यात्। यद्यपि अश्वः धावनक्रियायाः आश्रयः अस्ति, तथापि विभागजनिका या पतनक्रिया तस्याः अनाश्रयः एव वर्तते अतः प्रकृते अपादानसंज्ञा सिद्धा।

एवम् उक्तलक्षणानुसारेण "वृक्षात् पर्णं पतति" "धावतो अश्वात् पतति" इत्यादि स्थले अपादानसंज्ञा सिध्यति। किन्तु "कुड्यात्पततो अश्वात् पतति चैत्रः" इत्यत्र अश्वस्य कथम् अपादानसंज्ञा इति प्रश्नो जायते। प्रकृते पतनक्रीया अश्वेऽपि वर्तते चैत्रेऽपि च। विभागजनिका या पतनक्रिया तस्याः अनाश्रयः नास्ति अश्वः अपि तु आश्रयः एव वर्तते। अतः पूर्वोक्तलक्षणे तत् इति पदं योजयित्वा "तद्विश्लेषजनकक्रियानाश्रयत्वे विश्लेषाश्रयत्वम् अपादानत्वम्" इत्युच्यते । "कुड्यात्पततः अश्वात् पतति चैत्रः" इत्यत्र विश्लेषद्वयम् वर्तते। तत्र प्रथमः विश्लेषः कुड्याश्वयोः मध्ये, द्वितीयः विश्लेषः अश्वचैत्रयोः मध्ये वर्तते। तत्र अश्वचैत्रयोः मध्ये यः विभागः वर्तते तद्विभागजनिका पतनक्रिया चैत्रे एव विद्यते न तु अश्वे, तथैव अश्वकुड्ययोः मध्ये यः विभागः अस्ति तद्विभागजनिका पतनक्रिया अश्वे एव वर्तते न तु कुड्ये नापि चैत्रे। तथा च अत्र चैत्रनिष्ठपतनक्रीयां प्रति अश्वः विभागाश्रः सन् पतनक्रियायाः अनाश्रायः वर्तते, अतः अश्वस्य ध्रुवत्वात् अपादानसंज्ञा। तथैव अश्वनिष्ठपतनक्रियानिरूपितविभागाश्रयः कुड्यादिकं सत् पतनक्रियायाः अनाश्रयः वर्तते, अतः कुड्यस्य ध्रुवत्वात् अपादानसञ्ज्ञा। तदेव उक्तं वाक्यपदीये –

पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादिर्ध्रुवमुच्यते।। इति।।

"कुड्यात्पततः अश्वात् चैत्रः पतति" अत्र कुड्यात् अश्वः पतति इत्यत्र कुड्यम् अश्वकर्तृकपतनं प्रति ध्रुवं वर्तते। एवमेव "अश्वात् चैत्रः पतति" इत्यत्र चैत्रकर्तृकपतनं प्रति अश्वः ध्रुवं वर्तते इति कृत्वा अत्र अव्याप्तिः नास्ति।

"परस्परस्मात् मेषौ अपसरतः" इत्यादौ अन्योन्यस्य अपादानत्वं कथमिति शङ्का। अत्र विभागः एकः एव परन्तु विभागजनकक्रियाश्रयत्वम् उभयोः विद्यते, विभागजनकक्रियानाश्रयत्वाभावात् कथम् अपादानसंज्ञा इति प्रश्नः। अत्र समाधीयते –

उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते।।
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोस्सक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्।।

अत्र "परस्परस्मात् मेषावपसरतः" इत्यत्र ध्रुवत्वानुपपत्तिरूपदोषस्य वारणम् एवं क्रियते। प्रकृते मेषद्वयक्रियाजन्यविभागे उभौ अपि मेषौ विभागजनकक्रियाश्रयत्वात् अध्रुवौ वर्तेते। तथापि तत्र एकस्मिन् विभागः पृथक् भवति। उभयोः मेषयोः मिथः अवधित्वं कर्तृत्वं च पृथक् पृथक् भवतः। अत्र अपसरणं नाम विभागपूर्वकपृष्ठतो गमनम्। द्वौ मेषौ अपसरतः इत्यत्र यदा प्रथममेषः पृष्ठतः गमनं करोति, तदा द्वितीयः मेषः अवधिः भवति। यदा द्वितीयः मेषः पृष्ठतो गमनं करोति तदा प्रथमः स्थिरः भवति। अत्र द्वितीयस्य मेषस्य पृष्ठतो गमनदशायाम् अपसारणक्रियायाः आश्रयः द्वितीयः मेषः, अनाश्रयः च प्रथमः मेषः स्यात्। अत्र द्वितीयमेषस्य अपसरणक्रियां प्रति क्रियाश्रयत्वात् द्वितीयस्य कर्तृत्वम्, क्रीयानाश्रयत्वात् प्रथमस्य ध्रुवत्वं च सिध्यति। एवमेव प्रथमस्यापि क्रियाश्रयत्वदशायां कर्तृत्वम्, क्रीयानाश्रयत्वविवक्षादशायां ध्रुवत्वं च सिध्यति। एवं विभागैक्येऽपि अन्योन्यक्रियाभेदम् आश्रित्य द्वयोः अपि मेषयोः कर्तृत्वम् अपादानात्वं च सिध्यति। मेषपदोपात्तयोः तयोः कर्तृत्वम्, परस्परपदोपात्तयोस्तु तयोः अपादानत्वं नियततया विवक्षणीयं तदैव अयं प्रयोगः इति ध्येयम्। अत्र इयं चिन्ता वाक्यपदीयकारेण भर्तृहरिणैव हि "सार्वधातुके यक्" इति सूत्रस्थं भाष्यम् "एका क्रिया" इति स्थलं व्याख्यात्रा तिङन्तोपात्तक्रिया निवृत्तभेदा अतः एका इत्युक्तम्। एवं च अपसरतः इत्यत्र द्विवचनम् अस्ति चेदपि तद्द्वित्वं कर्त्रोः न तु क्रिययोः, तथा च मेषान्तरक्रियापेक्षम् इत्यत्र क्रिया द्वयं तेनैव भर्तृहरिणा कथं प्रतिपाद्यते? एतदाशयेनैव अस्य प्रयोगस्य साधुत्वं चिन्त्यमिति नव्यैः उक्तम्। वाक्यपदीयकाराणां मते अपादानमिदं त्रिधा विभक्तम्। तथा हि –

निर्दिष्टविषयं किञ्चिदुपात्तविषयन्तथा।
अपेक्षितक्रियञ्चेति त्रिधापादानमुच्यते।। इति

निर्दिष्टविषयम्, उपात्तविषयम्, अपेक्षितक्रियम् इति अपादानं त्रिविधम्। निर्दिष्टविषयं नाम यत्र धातुना साक्षात् विभागः निर्दिश्यते तन्निर्दिष्टविषयम् अपादानं भवति। यथा "अश्वात् पतति" इति। अत्र विभागजनकक्रिया साक्षात् धातुना बोध्यते अतः इदं निर्दिष्टविषयम्।

उपात्तविषयमपादानं यथा "बलाहकात् विद्योतते विद्युत्" इति अत्र निस्सरणाङ्गे विद्योतने द्युत् धातुः वर्तते, तथा च निःसृत्य इति क्रियाम् अध्याहृत्य निःसरणजन्यविभागाश्रयत्वात् अपादानसंज्ञा क्रियते। एवमेव यत्र धातुः "धात्वन्तरार्थविशिष्टं स्वार्थं बोधयति तदुपात्तविषयम् अपादानं भवति।

अपेक्षितक्रियम् अपादानं नाम यत्र विभागजनिका या क्रिया गम्यमाना चेदपि अप्रयुक्ता वर्तते तदपेक्षितक्रियं भवति। यथा "कुतो भवान् "? पाटलिपुत्रात् इति। अत्र आगतः इति क्रियायाः अपेक्षा वर्तते, इत्थम् अपेक्षिताम् क्रियाम् आश्रित्य अपादानत्वं जातं वर्तते इति कृत्वा तत् अपेक्षितक्रियम् अपादानं भवति।

# इको गुणवृद्धी इति सूत्रस्य किं फलम् ?

**डा. अरुणभट्टः**

अतिथ्यध्यापकः, व्याकरणविभागः

सर्वेऽपि शास्त्रकाराः यथावच्छास्त्रार्थावगतये परिभाषामकुर्वन् । पदशास्त्रेऽस्मिन् विध्यनुकूलानि परिभाषासूत्राणि प्रणीतानि महर्षिणा । तेषु इको गुणवृद्धी इति परिभाषासूत्रमन्यतम् । शास्त्रेऽस्मिन् पदोपस्थापिका अर्थोपस्थापिकाश्चेति द्विविधाः परिभाषाः विद्यन्ते । 'स्थानेऽन्तरतमः [1] ' 'तस्मादित्युत्तरस्य' इत्यादयो विधिसूत्रेषु अर्थम् उपस्थापयन्ति । 'इको गुणवृद्धी'"अचश्च' इत्यादयः विधिशास्त्रेषु पदोपस्थापकाः भवन्तीति स्थितिः। अत एव "गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठते" इति पदोपस्थपकत्वेनास्य सूत्रार्थस्तूपवर्णितः कौमुदीकारेण । ज्ञापकेनैवात्र अस्यार्थबोधे 'इको गुणवृद्धी' इति परिभाषा आरम्भणीया न वा, सूत्ररम्भे तु किं फलमिति विचारः प्रस्तुतः" इग्ग्रहणं किमर्थम् [2]? इति सूत्रारम्भप्रयोजनाधिकरणे भाष्ये ।

परिभाषयानया सर्वत्र गुणवृद्ध्योः विधाने इकः स्थाने गुणवृद्धी भवतः इत्यर्थः उपतिष्ठते ।अर्थममुं ज्ञापकेनापि साधयितुं शक्यत इत्यतः परिभाषायाः किं प्रयोजनम् इति प्रश्नस्य आशयः। यदि इयं परिभाषा न स्यात्तर्हि गुणवृद्धी कुत्र भवेतामिति शङ्कायां आकारस्य, सन्ध्यक्षराणां, व्यञ्जनानां स्थाने स्याताम् । अकारस्य, सन्ध्यक्षरेषु एकारस्य च विशेषाभावात् आकारौकारोकारस्य च प्रसङ्गे दोषः प्रदश्यर्ते।

याता वाता इत्यादौ या-वाधात्वोः आकारस्य आर्धधातुकगुणः प्राप्नोति । अनया परिभाषया इकः उपस्थित्यात्र गुणो वार्यते । ग्लायति म्लायति इत्यादौ ग्लै म्लै इत्यादिधातोः गुणः स्यात् । अत्र हि तिपि शपि ग्लै अ ति इति स्थिते ऐकारस्य गुणादेश एकारः स्यात् । परिभाषासत्वे इकः इत्युपस्थित्या सन्ध्यक्षरस्यैकारस्य गुणो न भवति । उम्भिता उम्भितुमित्यादौ पूरणार्थक-उम्भ धातोः तृजादिप्रत्ययेषु भकारस्य उपधागुणः ओकारः

[1] अष्टाध्यायी – १.१.५०

[2] अत्र अवयवद्वारा समुदायस्य प्रश्नः । इक्पदाभावे गुणवृद्धिग्रहणमपि नावश्यकमित्याशयेन इग्ग्रहणं किमर्थमिति प्रश्नः ।

स्यात् । भकारस्य औष्ठ्यत्वात् । गुणवृद्धिविधाने इकः इत्युपस्थित्या गुणो वरितः । एवं इको गुणवृद्धी इति परिभाषाभावे आकारस्य, सन्ध्यक्षराणां, व्यञ्जनानां गुणः प्रसज्यते इति दोषः इति चेत् , अत्रोच्यते -

आकारस्य गुणस्थानित्वं तु नास्ति । 'आतोऽनुपसर्गे कः' इति कप्रत्ययस्य कित्करणात्[१] ज्ञापकात् वार्यते । तथा हि 'आतोऽनुपसर्गे कः' इत्यत्र ककारस्य इत्संज्ञा विहिता । कित्त्वस्य प्रयोजनं तु "आतो लोप इटि च"[२] इत्यनेन गोद इत्यादौ धातोराकारस्य लोपविधानम् । अत्र अकाररूपप्रत्ययविधानेऽपि गोदः इति सिध्यति । दा-धातोः अप्रत्यये आकरस्य गुणे च कृते धातोराकारस्थानिकगुणसंज्ञकस्य अकारस्य, अप्रत्ययाकारस्य च पररूपेण गोदः इति सिद्ध्यति । सूत्रेऽस्मिन् कृतं कित्त्वं व्यर्थं सत् ज्ञापयति आकारस्य गुणस्थानित्वं नास्तीति ।

सन्ध्यक्षराणामपि[३] गुणस्थानित्वं न । ग्लै म्लै[४] इत्यादिधातोः ऐकारोच्चारणसामर्थ्येन व्यावर्त्यते । तथा हि ग्लै म्लै इत्यादौ सन्ध्यक्षराणां गुणस्थानित्वे गुणेन तेषु 'ए'कारः आदेशः स्यात् । अत्र प्रक्रियालाघवाय धातुपाठे एव सूत्रकार एकारस्योच्चरणं कुर्यात् । अतः सन्ध्यक्षराणामपि नास्ति गुणस्थानित्वम् ।

व्यञ्जनानां गुणस्थानित्वं 'सप्तम्यां जनेर्डः' इति विहितस्य उप्रत्ययस्य डित्वसामर्थ्येन व्यावर्त्यते। तथा हि उपसरे जातः इत्यर्थे उपसरपूर्वकात् जन् धातोः डप्रत्यये, डित्वेन अभस्यापि टेर्लोपे उपसरजः इति सिद्ध्यति। अत्र अप्रत्ययविधाने अपि जन् धातोः व्यञ्जनस्य नकारस्य गुणादेशे उपसर ज अ अ इति जाते त्रयाणामकाराणां पररूपेण रूपसिद्धौ डित्करणं व्यर्थम् । अनेन व्यञ्जनानां गुणस्थानित्वं न इति विज्ञायते ।

एवं ज्ञापकत्वमाश्रित्य सूत्रारम्भप्रयोजने निराकृते, ज्ञापकत्वं विवेचयति भाष्यकारः । 'आतोऽनुपसर्गे कः' इति विहितस्य कप्रत्ययस्य कित्त्वमुत्तरसूत्रेण साधनीयस्य

---

[१] कस्य लशक्वतद्धिते इत्यनेन इत्त्वात् ।

[२] अष्टाध्यायी – ६.४.६४

[३] सन्ध्यक्षरत्वेन द्विमात्रिकाणाम् एचां ग्रहणम् ।

[४] ग्लै म्लै हर्षक्षये इति धातुः । १.१०५१

'तुन्दपरिमृज' इत्यस्य सिद्धये अपेक्षितम् । न तत्र पररूपेणेष्टसिद्धिः भविष्यति । तथा सति 'गापोष्टक्' इति सूत्रविहितस्य टक्प्रत्ययस्य 'क'स्य कित्त्वमाल्लोपार्थमेव, तत्राकारस्य गुणे पररूपेणैवेष्टसिद्धौ आकारस्य गुणस्थानित्वव्यावृत्तिज्ञापकत्वमेवेत्युक्तम् । अतः आकारस्य गुणस्थानित्वव्यावृत्तिः सूत्रारम्भफलं न ।

"ग्लै, म्लै" इत्यादौ उच्चारणसामर्थ्यात् सन्ध्यक्षराणां गुणो न भवति । प्रतिपत्तिलघवाय उपदेशकाले एकारमेवोच्चारयेत् । तर्हि तत्रायादयोऽपि बाध्येरन्नित्यवान्तरशङ्कामुद्भाव्य, यं विधिं प्रत्युपदेशोऽनर्थकः स बाध्यते, यं प्रति निमित्तमेव नासौ बाध्यते इत्युक्तम् । प्रत्युपदेशस्यानर्थक्येन गुणो बाध्यते उच्चारणसामर्थ्येनेति, तेन सामर्थ्येन ततश्च गुणविधिं सन्ध्यक्षराणां गुणस्थानित्वे निवर्तिते, सन्ध्यक्षराणां गुणस्थानित्वव्यावृत्तिः न सूत्रारम्भफलम् ॥

'उपसरजः' 'मन्दुरजः' इत्यत्र जनेर्डित्वेन व्यर्थेन व्यञ्जनानां गुणस्थानित्वं निवर्तत इत्युक्तम् । यद्यपि नकारस्य गुणेऽनुनासिक अकारः प्रसजति । तथापि पररूपेण शुद्धस्य श्रवणं भविष्यति । अत्र भाष्ये 'अन्येष्वपि दृश्यते[१]' इत्यनेन विधीयमाने 'डप्रत्यये 'सप्तम्यां जनेर्डः' इति सूत्रादेवानुवर्तनीये 'अगः' 'नगः' इति रूपसिद्धिः डित्वमन्तरा न भवतीत्युक्तम् । तत्र मकारस्य व्यञ्जनस्य गुणे ओकारादेशप्रसङ्गात् । तस्मात् 'आकारसन्ध्यक्षरव्यञ्जनानां मध्ये व्यञ्जनानां गुणवृद्धिस्थानित्वनिवृत्तिः सूत्रारम्भफलम्' ।

[१] अष्टा – ३.२.१०१

# संशयसमुच्चयविवेकः

**आचार्यः नवीनहोळ्ळः**

नव्यन्यायविभाबाध्यक्षः

अथ क्वचिद् गिरौ नितम्बावच्छेदेन हुताशनं शिखरावच्छेदेन तदभावञ्च वीक्षमाणो लोकः समुच्चिनोति 'गिरिः अग्निमान् तदभाववांश्च' इति । क्वचिच्च गिरौ अग्निमनुपलभमानोपि धूमरेखामवलोक्य संशेते 'गिरिः अग्निमान् न वा' इति । अनयोः संशयसमुच्चययोः धर्मिणि तत्तभावावगाहितया अविशेषेपि विशेषान् नैकान् ईक्षन्ते अन्वीक्षानयविचक्षणाः ।

**संशयसमुच्चययोः एकविषमकारणसहकृताऽनेकसमानसामग्रीसंवलनाधीनत्वम्**

धर्मिणि प्रत्येकं तत्तदभावभासकयोः सामग्र्योः संवलनात् अव्याप्यवृत्तिताज्ञानविरहसहकृतात् जायमानं ज्ञानं संशयः। यथा धर्मीन्द्रियसन्निकर्षपुरुषत्वस्मृतिघटितसामग्र्याः निरुक्तसन्निकर्षपुरुषत्वाभावस्मृत्यादिघटित-सामग्र्या संवलनेन 'अयं पुरुषो न वा'इति संशयो जायते। एवं 'गिरि अग्निमान् न वा', 'वृक्षः पक्षिसंयोगी न वा' इत्याद्याकारकोऽपि। तत्तत्कोट्यव्याप्यवृत्तिताज्ञानेन सहकृतयोः तत्तदभावभासकसामग्र्योः द्वयोः संवलने सति उत्पद्यमानं ज्ञानं समुच्चयो भवति। यथा 'पक्षिसंयोगः अव्याप्यवृत्तिः' इति ज्ञाने सति वृक्षे पक्षिसंयोगतदभाव-भासकसन्निकर्षादिघटितसामग्र्योश्च सत्योः 'वृक्षः पक्षिसंयोगी तदभाववांश्च'इति समुच्चयो जायते। एवं 'गिरिः अग्निमान् तदभाववांश्च' इति ।

यत्र साधारण्यादिसम्बन्धज्ञानेन सहकृतात् सम्बन्धिज्ञानात् कोटिद्वयस्मरणमुत्पद्यते तत्र तस्य स्मरणस्य विशेषणज्ञानविधया समुच्चयेऽपि कारणत्वमस्ति तथापि तत्र समुच्चयानुत्पादस्तु अव्याप्यवृत्तिताज्ञानविरहेण तद्घटितसामग्रीविरहात्। यत्र तु 'पक्षिसंयोगतदभावसहचरितं वृक्षत्वम्' इति ज्ञानोत्तरं 'वृक्षत्ववान् अयम्' इति ज्ञानम् अव्याप्यवृत्तित्वज्ञानसहकृतं वर्तते तत्र कोटिद्वयस्मरणोत्तरं समुच्चयः जायत एव।

एकस्मिन् धर्मिणि तत्तदभावावगाहित्वं संशयसमुच्चयोभयसाधारणम्। तच्च संवलितसामग्रीद्वयप्रयोज्यम्। कोट्योः अव्याप्यवृत्तिताज्ञानञ्च विरोधभानप्रतिबन्धकम्। अतः संशयस्य विरोधावगाहित्वं समुच्चयाद् व्यावृत्तम् अव्याप्यवृत्तिताज्ञानविरहप्रयोज्यम्।

पुरुषत्वतदभावाद्योः कोट्योः विरोधभानप्रतिबन्धकाभावबलात् संशये धर्मिणि प्रत्येककोटिसम्बन्धनिष्ठसंसर्गतायाम् अवच्छेदकतया तत्तद्विरोधो भासते[१]। समुच्चयस्तु विरोधं नैवाऽवगाहते। समुच्चयस्य विरोधानवगाहित्वं संशयव्यावृत्तम् अव्याप्यवृत्तिताज्ञानप्रयोज्यम्। अव्याप्यवृत्तित्वं हि कोटेः तदभावकोट्या सामानाधिकरण्यम् अविरोध एव। तज्ज्ञानं विरोधावगाहिज्ञानं प्रतिबध्नाति।

इत्थञ्च 'पर्वतो वह्निमान् न वा' इति संशये विद्यमाना वह्निविषयित्वावच्छिन्नपर्वतविषयिता 'पर्वतो वह्निमान्' इत्याद्याकारकप्रत्येककोटिनिश्चय-विषयितातो भिन्नैव। प्रत्येककोटिनिश्चयस्य विरोधानवगाहितया संशयतः असमानाकारकत्वात्[२]। सा च संशयीयविषयिता ग्राह्यबुद्धिप्रतिबन्धकतानवच्छेदिकैव। 'पर्वतो वह्निमान् वह्न्यभाववांश्च' इत्यादिसमुच्चये तु तत्तदभावकोटिविषयितावच्छिन्न-धर्मिविषयिते उभे अपि ग्राह्यबुद्धिप्रतिबन्धकतावच्छेदिके भवतः। प्रत्येककोटिमात्रावगाहिनिश्चयीययोरेव वह्निविषयित्वावच्छिन्नपर्वतविषयिता-वह्न्यभावविषयित्वावच्छिन्नपर्वतविषयितयोः समुच्चये समावेशः। तथा च **एकधर्मिनिष्ठविशेष्यतानिरूपितविरुद्धानेकधर्मनिष्ठप्रकारताकज्ञानत्वं संशयलक्षणम्**[३]।

**विरोधानवगाहित्वे सति एकधर्मावच्छिन्नविशेष्यताद्वयनिरूपिततत्तदभाव-प्रकारताकज्ञानत्वं समुच्चयलक्षणम्**[४]। एतच्च[५] ग्राह्याभावनिश्चयनिष्ठप्रतिबन्धकतायां अव्याप्यवृत्तिताज्ञानस्योत्तेजकतापक्षमवलम्ब्य।

---

[१] यथा 'पर्वतो वह्निमान् न वा' इति संशये वह्न्यभावविरुद्धवह्निप्रतियोगिकसंयोगः वह्नेः संसर्गतया भासते। वह्निविरुद्धवह्न्यभावप्रतियोगिकस्वरूपसम्बन्धः वह्न्यभावस्य संसर्गतया भासते।

[२] समानाकारकज्ञानेषु एव विषयिताभेदविरहात्।

[३] प्रकारिताविशिष्टप्रकारित्वं वा संशयलक्षणम्। अत्र प्रकारितावैशिष्ट्यञ्च स्वविशिष्टप्रकारिताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकप्रकारिताविशिष्टत्वस्वनिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपितविरोधविषयतानिरूपितविषयतावच्छेदकधर्मावच्छिन्ननिरूपकताकत्वस्वसमानाधिकरण्यैतत्त्रितयसम्बन्धेन। स्वं प्रकारिता, तद्वैशिष्ट्यम् प्रकारितायां स्वनिरूपकतावच्छेदकधर्मपर्याप्तनिरूपकतावच्छेदककत्वसम्बन्धेन। सा च प्रकारिता 'पर्वतो वह्निमान्' 'पर्वतो वह्न्यभाववान्' इत्याद्याकारकप्रत्येकज्ञानीयैव प्रतिबन्धकतावच्छेदिका प्रसिध्यति।

[४] स्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालित्वमिति लक्षणं तु समुच्चयस्य न सम्भवति। सामानाधिकरण्यमात्रेण कोटिद्वयावगाहिसमुच्चयेऽव्याप्तेः इति।

[५] एतत्-संशयीयविषयितायां प्रतिबन्धकतानवच्छेदकत्वस्य, समुच्चयीयविषयितायां प्रतिबन्धकतावच्छेदकत्वस्य च व्यवस्थापनम्।

अथ अव्याप्यवृत्तिताज्ञानस्य अनुत्तेजकतापक्षः - अव्याप्यवृत्तिताज्ञानविरहदशायां ग्राह्याभावनिश्चयस्य ग्राह्यबुद्धिप्रतिबन्धकत्वेऽपि तज्ज्ञानदशायां ग्राह्यबुध्यप्रतिबन्धकत्वं तावत् निर्विवादम्। तदुपपादनाय अव्याप्यवृत्तिताज्ञानानाम् उत्तेजकतोपगमापेक्षया, लाघवात् तदभाववत्तानिश्चयानां निरवच्छिन्नाधारताकत्वविशेषितदैशिकविशेषणतादिसम्बन्धावच्छिन्न- प्रकारताकत्वेन प्रतिबन्धकत्वमुपगम्यते। निरवच्छिन्नाधारताकत्वरूपस्य विरोधस्य भानं सर्वत्र अव्याप्यवृत्तिताज्ञानविरहकालिकज्ञानेषु संशयेषु प्रत्येककोटिनिश्चयेषु च सम्भवति। तादृशाधारतायाः संसर्गतयैव भानमुपेयते। तथा च 'पर्वतो वह्निमान्' इत्यादिनिश्चयीयनिरवच्छिन्नाधारताकसंयोगविषयितैव ग्राह्यबुद्धिप्रतिबन्धकतावच्छेदिका। सा च संशयेऽपि अक्षतैव। समुच्चयस्य तु अव्याप्यवृत्तिताज्ञानोत्तरभावितया निरवच्छिन्नाधारताकत्वावगाहितद्वत्ताबुद्धौ तदव्याप्यवृत्तिताज्ञानस्य विरोधितया, न समुच्चये निरवच्छिन्नाधारताकत्वभानं सम्भवति। अतो न समुच्चयीयविषयिता प्रतिबन्धकतावच्छेदिका भवति। एवञ्च संशयस्य निरवच्छिन्नाधारताकत्वावगाहित्वेन समुच्चयात् वैलक्षण्यमुपपद्यते। प्रत्येककोटिनिश्चयस्य तथात्वे सत्यपि एकधर्मिणि उभयकोट्यनवगाहित्वेन तद्वैलक्षण्यमुपपद्यते।

तथा च **स्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालित्वं संशयलक्षणम्।** संशयसमुच्चययोः निरवच्छिन्नाधारतावगाहित्वानवगाहित्वाभ्यां विषयवैलक्षण्येन असमानाकारकत्वात् समुच्चये प्रतिबन्धकतावच्छेदकविषयिताविरहात् नातिव्याप्तिः[१]। **निरवच्छिन्नाधारताकत्वानवगाहित्वे सति एकधर्मिकतत्तदभावप्रकारकज्ञानत्वं समुच्चयलक्षणम्।**

परे तु वदन्ति – 'पर्वतो वह्निमान् न वा' इत्याद्याकारके संशये कोटिद्वयप्रकारतानिरूपिता एका विशेष्यता, 'वृक्षः पक्षिसंयोगी पक्षिसंयोगाभाववांश्च' इत्याद्याकारके समुच्चये तु विशेष्यताभेदः इत्युभयोः वैलक्षण्यम्। **तदवच्छिन्नप्रकारतातदवच्छिन्नविषयतानिरूपिताभावत्वावच्छिन्न-**

[१] अवच्छेदकावच्छेदेन कोटिमवगाहमानोऽपि समुच्चयः अव्याप्यवृत्तिताज्ञानोत्तर एवेति न तदीयविषयिता निरवच्छिन्नाधारताकत्वनिरूपिता। अतो न सा प्रतिबन्धकतावच्छेदिकेति तत्रापि नातिव्याप्तिः।

**प्रकारतोभयनिरूपितविशेष्यताशालिज्ञानत्वं संशयत्वम्।** अतो न 'पर्वतो वह्निमान् धूमाभाववान्' इति निश्चये अतिव्याप्तिः। 'अयं स्थाणुः पुरुषो वा' इति भावद्वयकोटिकसंशयस्य अनुभवसिद्धत्वे तु अभावत्वांशपरित्यागेन विरुद्धकोटिद्वयविषयताद्वयनिरूपित-विषयताकज्ञानत्वमेव संशयत्वं वाच्यम् । यत्र स्थाणुत्वपुरुषत्वभासकसामग्रीसंवलनदशायां तत्तदभावभासकसामग्रीविरहः तत्र भावद्वयकोटिकसंशयः उत्पत्तुमर्हति। न च सति दोषविशेषे लौकिकसन्निकर्षे च 'अयं शङ्खः पीत' इति निश्चये अतिव्याप्तिः दुर्वारा इति वाच्यम्। कोट्यंशे साक्षात्त्वव्यञ्जकविषयताविरहस्य संशयत्वप्रयोजकतोपगमात्। निरुक्तज्ञानस्य शङ्खत्वकोट्यंशे पीतत्वकोट्यंशे च साक्षात्त्वव्यञ्जकविषयताशालित्वेन संशयत्वप्रयोजकस्य विरहात्। न च पीतत्वांशे लौकिकविषयताविरहेण कथं तत्र साक्षात्त्वव्यञ्जकविषयतेति वाच्यम्। यतः लौकिकसन्निकर्षाधीनायामिव साक्षात्त्वव्यञ्जकता दोषविशेषाधीनायामपि विषयतायामस्ति। 'शङ्खः पीतः' इत्यादिभ्रमानन्तरं 'पीतिमानं साक्षात्करोमि'इत्यनुव्यवसायोदयात्। इत्थञ्च साक्षात्त्वव्यञ्जकविषयताशून्यविरुद्धकोटि-द्वयनिष्ठविषयताद्वयनिरूपितैकविषयताकज्ञानं संशयः इति फलितम् । **विरुद्धकोटिद्वयविषयतानिरूपितैकधर्मावच्छिन्नविषयताकज्ञानं समुच्चयः** इति ।

अर्वाचीनास्तु - **संशयत्वं कोटिताख्यविलक्षणविषयतानिरूपकत्वं** विरोधानवगाहिज्ञानसाधारणम्। यथा लौकिकसन्निकर्षजन्ये ज्ञाने 'साक्षात्करोमि' इति प्रतीतिबलात् विषयिताविशेषः तथा 'सन्देह्मि' इति अनुव्यवसायबलात् सन्देहे कोट्यंशे विषयिताविशेषः निष्प्रत्यूहः एव सिद्ध्यति। कोटिता च न प्रकारताविशेषः, 'ह्रदे वह्निर्न वा' इति कोटिविशेष्यकसंशयस्यापि सत्त्वात्। तत्र वह्निप्रकारकत्वाभावेऽपि वह्निकोटिकत्वस्य सत्त्वात्। अपि तु ततः अतिरिक्तैव विलक्षणविषयता। संशये कोटिविषयितयोः अवच्छेद्यावच्छेदकभावोपगमात् कोटिविषयतायाः कोट्यन्तरविषयित्वावच्छिन्न-विषयित्वनिरूपितत्वरूपं वैलक्षण्यं सुघटम्। समुच्चये तु कोटिविषयितयोः अवच्छेद्यावच्छेदकभावविरहात् कोटिविषयतायाः न तथात्वम्। न चैवं संशयस्य विरोधानवगाहित्वे कोटिद्वयभासकसामग्रीदशायां कोट्योः अव्याप्यवृत्तिताज्ञाने च सति संशयस्य आपत्तिः। समुच्चयस्येव संशयस्यापि विरोधानवगाहितया अव्याप्यवृत्तितारूपाऽविरोधज्ञानाप्रतिबध्यत्वादिति वाच्यम्। विरोधानवगाहिसंशयं प्रति

अव्याप्यवृत्तिताज्ञानस्य मणिमन्त्रादिन्यायेनैव प्रतिबन्धकत्वोपगमात्। तथा च **कोटिताऽनिरूपकत्वे सति तत्तदभावप्रकारसमानविशेष्यकज्ञानत्वं समुच्चयत्वम्** इत्याहुः ।

अपरे तु संशयत्वं **जातिविशेषः**। 'महानसं वह्निमत् पर्वतो वह्निमान्न वा' इत्याद्यांशिकसंशयानुरोधेन संशयत्वजातेः अव्याप्यवृत्तित्वमुपगम्यते। अवच्छेदकञ्च पर्वतादितत्तद्धर्मिविषयकत्वावच्छिन्नवह्न्यादितत्तत्कोटिविषयकत्वमेव। जातेरव्याप्यवृत्तिता च मिश्रादिभिरपि स्वीकृतेति नापसिद्धान्तभीतिः। स च जातिविशेषः 'सन्देह्मि' इति प्रतीतिसिद्धः मानसत्वव्याप्यः। सर्वत्र संशयस्य मानसतायाः एवोपगमात्। न च 'पर्वतो वह्निमान्न वा' इत्याद्याकारकचक्षुस्सन्निकृष्टपर्वतधर्मिकसंशयदशायां 'पर्वतं पश्यामि' इत्यनुव्यवसायात् तत्र संशयस्य चाक्षुषत्वमावश्यकमिति वाच्यम्। तत्र संशयात् पूर्वं परतो वा जायमानस्य पर्वतचाक्षुषनिश्चयस्यैव निरुक्तानुव्यवसायविषयत्वसम्भवेन संशयस्य मानसत्वे क्षतिविरहात्। एवञ्च **संशयत्वशून्यत्वे सति एकधर्मिकतत्तदभावप्रकारकज्ञानत्वं समुच्चयत्वम्** इत्याहुः[1]।

[1] परोक्षज्ञानम् असन्दिग्धम् अनाहार्यमित्युसर्गः।

सति तु सामग्रीविशेषसमवधाने परोक्षसंशयोत्पादं केचिदभ्युपगच्छन्ति। तथाहि - विरोधिपरामर्शयोः द्वयोः संवलनदशायाम् अव्याप्यवृत्तिताज्ञाने च सति संशयानुमितिः जायते। यथा स्थाणुत्वतदभावोपस्थितिघटितयोः कोटिद्वयभासकयोः प्रत्यक्षसामग्र्योः समवधाने 'अयं स्थाणुः न वा' इत्याकारकः प्रत्यक्षसंशयः उदेति, तथा 'वृक्षः पक्षिसंयोगव्याप्यवान्' 'वृक्षः पक्षिसंयोगाभावव्याप्यवान्' इति परामर्शघटितयोः कोटिद्वयभासकयोः अनुमितिसामग्र्योः 'पक्षिसंयोगतदभावौ अव्याप्यवृत्ती' इत्याकारकाव्याप्यवृत्तिताज्ञानेन सहकृतयोः समवधाने सति 'वृक्षः पक्षिसंयोगी न वा' इत्याकारिका संशयानुमितिः जायते। तद्वत्तानुमितौ अव्याप्यवृत्तिताज्ञानविरहविशिष्टस्यैव तदभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकतया उपदर्शितपरामर्शयोः तदभावव्याप्यवत्ताऽवगाहित्वेऽपि अकिञ्चित्करत्वात्। न च अव्याप्यवृत्तिताग्रहकाले कोटिद्वयज्ञानं जायमानं समुच्चयो भवितुमर्हति, न तु संशयः। तत्प्रतिबन्धकत्वात् अव्याप्यवृत्तिताग्रहस्येति वाच्यम्। अव्याप्यवृत्तिताज्ञानस्य विरोधावगाहिसंशयं प्रति प्रतिबन्धकत्वेऽपि तदनवगाहिनं 'मूलावच्छिन्नो वृक्षः पक्षिसंयोगी न वा' इत्याकारकसंशयं प्रति अप्रतिबन्धकत्वात्। न च अव्याप्यवृत्तिताज्ञानेन तत्तभावयोः विरोधे परिहृते जायमानं कोट्योः विरोधानवगाहिज्ञानं निश्चय एव स्यात्, न तु संशय इति वाच्यम्। प्रतियोग्यभावयोः अव्याप्यवृत्तित्वेऽपि एकदेशावच्छेदेन एककालावच्छेदेन च वृत्तेरसम्भवेन, समानदेशावच्छेदेन समानकालावच्छेदेन वा तत्तदभावनिश्चययोः अव्याप्यवृत्तित्वग्रहकालिकयोरपि मिथः प्रतिबन्धकतया मूलावच्छिन्नवृक्षे पक्षिसंयोगतदभावावगाहिज्ञानस्य निश्चयत्वासम्भवात्।

आकरग्रन्थः - गादाधरी अनुमितिप्रकरणम्

# शाब्दतात्पर्यग्रहयोः कार्यकारणभावः

**डा. श्यामसुन्दरः ए,**

संविदाध्यापकः, नव्यन्यायविभागः

इह जगति सर्वेऽपि बोद्धारो बुभुत्सितमर्थं बोधयितुं, प्रेक्षावन्तश्च प्रतिपिप्सितं प्रमेयं प्रष्टुं च शब्दान् प्रयुञ्जते । एवं सर्वविधलोकव्यवहारनिर्वर्तकं सर्वार्थप्रकाशकं भवति इदं शब्दज्योतिः। अत एवोक्तं- "**इदम् अन्धं तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यत**" ॥ इति। अयमेव हि शब्दः आप्तोच्चरितवाक्यरूपः शब्दप्रमाणम् इत्यभिधीयते। तदुक्तं –**आप्तवाक्यंशब्दः(त.सं), आप्तोपदेशः शब्दः** इति (न्या.सू.-१-१-७) नव्यन्यायप्रवर्तकेन गङ्गेशोपाध्यायेनाप्यभिहितम् - **प्रयोगहेतुभूतार्थतत्वज्ञानजन्यः शब्दः प्रमाणम्** इति (तत्व.चिं, पृ -१)

वृत्तिज्ञानसहकृतेन पदज्ञानेनोपस्थितानामर्थानां परस्परं संसर्गावगाहिबोधः एव शाब्दबोध इत्युच्यते। स एव वाक्यार्थबोधः संसर्गबोधः इत्यादिशब्दैर्व्यपदिश्यते । शाब्दबोधीयसंसर्गः वृत्तिभास्यः आकाङ्क्षाभास्यश्चेति द्विविधः। तत्र पदार्थतत्वावच्छेदकयोः संसर्ग एव वृत्तिभास्यः, पदार्थद्वयसंसर्गस्तु आकाङ्क्षाभास्यः । पदार्थद्वयसंसर्गस्याकाङ्क्षाभास्यत्वमुक्तं भट्टाचार्यैः-**शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते** इति [व्यु.वा-पृ-१] विना आकाङ्क्षादिज्ञानैः शाब्दबुद्धेरनुदयात् तत्सत्वे च तदुदयाच्च, अन्वयव्यतिरेकाभ्यां शाब्दबोधं प्रति आकाङ्क्षादिज्ञानानां हेतुत्वं सिद्ध्यति । एवं नानार्थकपदस्थले सैन्धवमानय इत्यादिवाक्यात् कदाचिदेव अश्वकर्मकानयनस्य, कदाचित् लवणकर्मकानयनस्य, कदाचिच्च तदुभयकर्मकानयनस्य वा बोधः इति, 'श्वेतो धावति' इत्यस्मात् क्वचिदेव श्वेतवर्णविशिष्टस्य प्राणिनः, क्वचित् कुक्कुरस्य वा बोधः इति च नियमोपपादनाय, तात्पर्यसंशये तात्पर्यव्यतिरेकनिश्चये वा सति शाब्दानुभवानुदयात् तात्पर्यनिश्चये च सति तदुदयात् **यत्संशययद्व्यतिरेकनिश्चयौ यदुत्पत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुः** इति व्याप्त्युपपादनाय च तात्पर्यनिश्चयस्यापि शाब्दधीहेतुत्वमुररीकरणीयम्।

तात्पर्यं च वक्तुरभिप्रायविशेषः। यथा गामानयेत्यादौ आधेयत्वसंसर्गकगोप्रकारक-कर्मत्वविशेष्यकबोधो भवतु इति वक्तृसमवेतेच्छैव तात्पर्यम् । तादृशबोधेच्छयोच्चरितमिदं वाक्यम् इत्याकारकं श्रोतृसमवेतं तात्पर्यज्ञानं श्रोतुः शाब्दबोधे कारणम् । वाक्योच्चारणस्य च इच्छाप्रयोज्यतया स्वप्रयोज्योच्चरितत्वसम्बन्धेन तादृशेच्छाप्रकारकं तद्वाक्यविशेष्यकं तात्पर्यज्ञानं तद्वाक्यार्थविषयकशाब्दबोधे कारणम् इति कार्यकारणभावः सिद्ध्यति।

ननु सैन्धवादिनानार्थकपदघटितवाक्यजन्यशाब्दबोधे तत्पदोपस्थापितानाम् अश्वलवणाद्यनेकार्थानां युगपद्भानापत्तिवारणाय तात्पर्यनिर्णयस्य हेतुत्वमभ्युपेत्य तात्पर्यविषयस्यैव शाब्दे भानं, न तु उपस्थितानां सर्वेषामर्थानाम् इति नियमोपपादनेऽपि नानार्थवृत्तिकपदजन्यशाब्दत्वावच्छिन्नं प्रत्येव तात्पर्यनिश्चयस्य हेतुत्वं सिद्ध्यतीति शाब्दसामान्यं प्रति तस्य हेतुत्वमप्रामाणिकमेव इति चेन्न, उक्तरीत्या शाब्दत्वापेक्षया नानार्थवृत्तिकपदजन्यशाब्दत्वस्य गुरुधर्मतया **सम्भवति लघौ गुरौ तदभावात्** इति न्यायेन कार्यतावच्छेदकत्वं दुर्घटमिति शाब्दत्वतात्पर्यज्ञानत्वाभ्यामेव कार्यकारणभावः उचितः। एवं यत्र सैन्धवपदेन शक्तिभ्रमेण घटादीनामुपस्थितिः तत्र सैन्धवपदजन्यघटविषयकशाब्धबोधे सैन्धवपदस्य घटे तात्पर्यज्ञानं कारणम्। लक्षणास्थले च शक्तिलक्षणाभ्यामुपस्थितयोरर्थयोः लक्ष्यार्थस्यैव शाब्दबोधः इति नियमनिर्वहाय, लक्षणयैव यत्र नानार्थानामुपस्थितिः तत्र एकार्थस्यैव शाब्दे भानमिति नियमनिर्वहाय च तात्पर्यज्ञानस्य शाब्दधीसामान्यहेतुत्वं आवश्यकम् । अत एव तात्पर्यानुपपत्तिः लक्षणाबीजम् इति प्रवादोऽप्युपपद्यते।

नन्वेवं तात्पर्यज्ञानस्य शाब्दधीहेतुत्वेऽपि यत्र घटदर्शन-लवणानयनतात्पर्येण घटं पश्य सैन्धवमानय इति वाक्यं प्रयुक्तं तत्र लवणविषयकदर्शन-घटकर्मकानयनविषयकशाब्दबोधापत्तिः। तत्र तेषामर्थानां तत्तत्पदानाञ्च तात्पर्यविषयत्वात्। तत्र च लवणपदार्थदर्शनपदार्थयोः परस्परमन्वयबोधे तदर्थकपदयोः एकवाक्यताभिप्रायविषयत्वरूपसमभिव्याहारज्ञानस्य हेतुत्वमभ्युपेत्य तद्दोषवारणेऽपि, सैन्धवं कलयति इत्यादितः अश्वभक्षण-लवणानयनविषयकबोधापत्तिः, तदर्थकपदयोः उक्तसमभिव्याहारस्य सत्वात् । तत्र च तत्तदर्थान्वित-तत्तदर्थविषयकबोधे तत्तदर्थान्वित-

तत्तदर्थविषयकतात्पर्यनिर्णयः कारणं, पूर्वोक्तवाक्यञ्च अश्वान्वितानयनतात्पर्यकं, लवणान्विताभक्षणतात्पर्यकं वा, न तु तद्विपरीतार्थतात्पर्यकम् इति न दोषः, इति तु न शङ्कनीयम् । एकपदार्थान्वितापरपदार्थस्य वाक्यार्थस्वरूपत्वेन शाब्दबुद्धेः पूर्वं तादृशतात्पर्यनिश्चयस्य असम्भवात् । अत्र सैन्धवपदं पदार्थान्तरान्विततुरगपरं, इत्याकारकस्य, कलयपदं अपरपदार्थान्वितभक्षणपरं इत्याकारकस्य वा सामान्यतः एकपदार्थं, विशेषतश्च अपरपदार्थमवगाहमानस्य तात्पर्यनिश्चयस्य शाब्दधीहेतुत्वमभ्युपेत्यापि वारणं न सम्भवति । तस्य निर्णयस्य च तादृश वाक्याधीने तुरगानयनबोधे लवणभक्षणान्वयबोधे वा आवश्यकत्वेन पूर्वोक्तापत्तिवारणासम्भवादिति चेन्न, कर्मत्वादिनिष्ठविशेष्यतानिरूपिताधेयत्वादिनिष्ठसंसर्गतानिरूपितलवणादिनिष्ठप्रकारताशालि शाब्दबुद्धिं प्रति तादृशप्रकारताशालितात्पर्यनिश्चयस्य कारणत्वोपगमान्न दोषः। तस्य च निश्चयस्य विशिष्य पदार्थद्वयावगाहित्वेऽपि तत्तत्पदार्थस्य लवणादेः विषयतांशे एव प्रकारत्वेन एकपदार्थे अपरपदार्थस्य अप्रकारकत्वेन वाक्यार्थाविषयकतया शाब्दबुद्धेः प्रागपि तत्सम्भवात् ।

अत्र तात्पर्यज्ञानं च न शाब्दधीकारणं, किन्तु सैन्धवादिनानार्थकपदस्थले एकतत्पदार्थविषयकशाब्दबोधं प्रति अपरतत्पदार्थवषयकतात्पर्यज्ञानं प्रतिबन्धकम् , अतः नैकदा एकस्मात्पदात् अनेकार्थविषयकबोधापत्तिः। लक्ष्यार्थे तात्पर्यज्ञानदशायां तत्पदजन्यमुख्यार्थविषयकशाब्दबोधं प्रति तत्पदलक्ष्यार्थविषयकतात्पर्यज्ञानस्य प्रतिबन्धकत्वात् न मुख्यार्थस्य शाब्दे भानम् । तात्पर्यज्ञानस्य शाब्दबोधं प्रत्यहेतुत्वादेव तात्पर्यज्ञानविरहदशायामपि शाब्दबोधोदयः इति कैश्चिदभ्युपेयते, तन्न समीचीनम्, तात्पर्यज्ञानस्य शाब्दधीप्रतिबन्धकत्वे, नानार्थकपदस्य उभयाद्यार्थे तात्पर्यसत्त्वे उभयाद्यर्थविषयकशाब्दबोधस्य सर्वानुभवसिद्धस्यानुपपत्तिप्रसङ्गः। अपरार्थविषयकतात्पर्यज्ञानस्य तदर्थतात्पर्यज्ञाननिष्ठप्रतिबन्धकतायां उत्तेजकत्वं स्वीकृत्य अपरार्थविषयकतात्पर्यज्ञानाभावविशिष्टतदर्थतात्पर्यज्ञानं अपरार्थविषयकशाब्दबोधे प्रतिबन्धकमिति प्रतिबध्यप्रतिबन्धकभावकल्पने च महागौरवम् ।

अपरे च एकार्थविषयकतात्पर्यज्ञानं अपरपदार्थोपस्थितिं प्रत्येव प्रतिबन्धकं न तु शाब्धबोधं प्रति , तथा च नानार्थकपदस्थले एकत्र तात्पर्यसत्वे तात्पर्याविषयकपदार्थस्योपस्थितिरेव न जायत इति न तदर्थकशाब्दबोधापत्तिसम्भवः। उभयत्र तात्पर्यग्रहसत्वेऽपि एकतात्पर्यग्रहनाशानन्तरमेव अपरपदार्थोपस्थित्युत्पत्त्या शाब्दबोधः इति वदन्ति, तदप्ययुक्तम्, यतो हि यत्र नानार्थकपदात् आदौ एकर्थोपस्थितिः ततः अपरार्थस्य तात्पर्यज्ञानं तत्र तज्ज्ञानस्य पूर्वोत्पन्नोपस्थितौ अप्रतिबन्धकत्वात्, तन्मते तात्पर्यज्ञानस्य शाब्दबुद्ध्यहेतुत्वात् तात्पर्याविषयस्यापि पदार्थस्य शाब्दबोधापत्तेः। अपि च यत्र लक्षणास्थले प्रथमतः लक्ष्यार्थतात्पर्यज्ञानमुत्पन्नं तस्य प्रतिबन्धकत्वेन तन्मते शक्यार्थस्यानुपस्थितौ शक्यार्थसम्बधात्मकलक्षणायाः असम्भवात् तत्र लक्ष्यार्थस्यापि शाब्दबोधानुत्पत्तिप्रसङ्गात् । अतः तात्पर्यज्ञानस्य शाब्धबोधं प्रति कारणत्वमवश्यमङ्गीकरणीयम् ।

अत्र प्रकरणादिकं, 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता' इत्यादि कारिकोक्ताः संयोगादयश्च तात्पर्यनिश्चायकाः। यथा- सैन्धवमानय इत्यत्र सैन्धवपदस्य लवणतात्पर्यग्राहकं भोजनप्रकरणम्, अश्वतात्पर्यग्राहकञ्च युद्ध-प्रयाणादिप्रकरणम् । 'शङ्खचक्रधरो हरिः' इत्यत्र यमानिलादिनानार्थकस्य हरिशब्दस्य शङ्खचक्रादिसंयोगो विष्णौ, अपिनाको भवः इत्यत्र संसाराद्यर्थकस्य भवशब्दस्य पिनाकविभागः शिवे, रामार्जुनौ इत्यत्र रामशब्दस्य कार्तिवीर्यार्जुनसाहचर्यं परशुरामे, रामरावणयोरिव इत्यादौ रामशब्दस्य रावणविरोधः दाशरथिरामे च तात्पर्यं ग्राहयति । एवं प्रकरणादिनोत्पन्नस्तात्पर्यनिर्णयः शाब्दबुद्धित्वावच्छिन्नं प्रति कारणं भवति ।

# विशेषपदार्थः

**डा. राघवेन्द्र पी आरोल्ली**

अतिथ्यध्यापकः, नव्यन्यायविभागः

इह खलु संसारपारावारे सन्ति बहवः पदार्थाः । तेषु सङ्क्रमितस्य आत्मनः पृथक्तया दर्शनार्थं पदार्थविवेचने तत्परतामासादयन् काणादाः । द्रव्यादिभेदेन ते पदार्थाः सप्तधा विभक्ताः । तेषु विशेष इति अन्यतमः पदार्थः । अत एवास्य वैशेषिकदर्शनमित्यप्यपरं नाम । विशेषतया प्रमाणपरिकलितेऽपि विशेषे सन्ति विप्रतिपत्तिः तत्त्वावधारणनिपुणानां निवहे । अतः विशेषोऽत्र विचार्यते ।

स च विशेषः 'अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः' [१] इति विश्वनाथन्यायपञ्चाननवचनानुसारमन्ते परमाण्वादिषु नित्यद्रव्येषु विद्यमानस्तेषु परस्परं भेदसाधकः स्वस्यापि विशेषान्तराद् व्यावर्तको धर्मः इति ज्ञायते । तथा हि – अवयवभेदेन हि अवयविषु भेदः सिद्ध्यति । परमाणूनामवयवाभावात् कथं तेषु भेदः सिध्यति? तत्र भेदासिद्धौ कथं द्व्यणुकादिक्रमेण घटपटादीनां सृष्टिः? इति प्राप्ते परमाणुषु भेदसाधकः कश्चनपदार्थः कल्प्यते । स एव भेदसाधकत्वात् विशेषः इत्युच्यते । सोऽपि स्वयमेव विशेषान्तरात् स्वस्य व्यावृत्तिं साधयति । अतः स्वतोव्यावर्तकत्वं तस्य लक्षणमिति प्रशस्तपादाचार्यादिभिः [२] वैशेषिकैः कथितम् ।

वैशेषिकसूत्रकारः कणादमहर्षिस्तु 'सामान्यं विशेष इति बुद्ध्यपेक्षं' [३], 'भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव' [४], 'द्रव्यत्वं गुणत्वं कर्मत्वमिति सामान्यानि विशेषाश्च' [५], 'अन्यत्रान्त्येभ्यो विशेषेभ्य' [६] इत्येतानि सामान्यविशेषयोः स्वरूपप्रतिपादकानि

---

१ भाषापरिच्छेदः ८०

२ 'अन्तेषु भवाः अन्त्याः, स्वाश्रयविषेशकत्वाद्विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमाना अत्यन्तव्यावृत्तिबुद्धिहेतव' इति प्रशस्तपादवचनम् ।

३ वैशेषिकसूत्रम् १.२.३

४ वैशेषिकसूत्रम् १.२.४

५ वैशेषिकसूत्रम् १.२.५

सूत्राणि प्रणिनाय। तत्र 'अस्ति', 'अस्ति' इत्याद्यनुगतप्रतीत्या भावत्वं षड्वपि पदार्थेषु सिद्ध्यति इत्यतस्तत्तेषां समानो धर्मः । अतः भावत्वं सामान्यम् । अत्र सामान्यपदस्य जात्यर्थकत्वे स्वीकृते जात्यादिषु जातित्वासम्भवात् भावत्वमित्यनेन सत्ताजातिर्ग्राह्या । सत्तायाः समवायेन जातिमत्पदार्थेषु द्रव्यगुणकर्मसु विद्यमानत्वात् व्यापकत्वात् सा केवलं सामान्यमेव । द्रव्यत्वगुणत्वादीनां सत्तापेक्षया न्यूनदेशवृत्तित्वात् वैशेष्यम् । घटत्वाद्यपेक्षया अधिकदेशवृत्तित्वात् सामान्यम् । एवं येषां कदाप्यधिकदेशवृत्तित्वं नैव सम्भवति तद्व्यक्तित्वादीनां तेषां वैशेष्यमेव इति । किञ्च अन्यस्मात् विशेष्यते इति व्युत्पत्त्या विशेषपदस्य व्यावर्तकत्वविशिष्टोऽर्थः लभ्यते । घटपटादिषु विद्यमानेन पृथिवीत्वादिना सामान्येन परस्परभेदः नैव साधयितुं शक्यते व्यभिचारात्[२] । घटत्वादिना विशेषेण तु भेदः सिद्ध्यति । तस्मात् पृथिवीत्वाद्यपेक्षया घटत्वादीनां वैशेष्यं युज्यते एव इति सूत्रकाराणामाशयः प्रतिभाति ।

अस्मिन् विषये वैशेषिकसूत्रोपस्कारकारास्तु एवमाहुः ।'भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव' इत्यस्मिन् सूत्रे अनुवृत्तिरित्यस्य अधिकदेशवृत्तित्वप्रकारकबुद्धिः इत्यर्थः । तथा च 'सत्ता द्रव्यत्वाद्यपेक्षया अधिकदेशवृत्तिः' इति प्रत्यक्षात्मिकां बुद्धिं प्रति सत्तायाः विषयविधया हेतुत्वात् सत्ता समान्यमेव । तथा च सत्तायाः अधिकदेशवृत्तित्वमेव इत्यर्थः । 'द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च' इत्यस्मिन् सूत्रे तावत् परस्परसापेक्षाणि सामान्यानि प्रतिपादितानि । तत्र पृथिवीत्वाद्यपेक्षया द्रव्यत्वादीनाम् अधिकदेशवृत्तित्वात् तादृशबुद्धिहेतुत्वात् च सामान्यत्वम् , सत्तापेक्षया न्यूनदेशवृत्तित्वात् वैशेष्यम् इति । अस्मिन् सूत्रव्याख्यानावसरे 'सामान्यानि विशेषाश्चेत्यत्र असमासः, सामान्यत्वे सति विशेषत्वं यथा ज्ञायेत तदर्थम् , अन्यथा सामान्यविशेषाः इति षष्ठीसमासभ्रमः स्यात्' इत्युक्तं ग्रन्थकारेण । तथा 'अन्यत्रान्त्येभ्यो विशेषेभ्यः' इत्यस्मिन् सूत्रे अन्त्यशब्दस्य व्युत्पत्तयः आचार्यादिमतानुगुणं प्रदर्शिताः सन्ति ।

---

१ वैशेषिकसूत्रम् १.२.६

२ 'पटभिन्नः पृथिवीत्वात्' इत्यत्र पटभेदाभावात्मकपटत्ववति पटे पृथिवीत्वस्य सत्त्वात् व्यभिचारः ।

अत्रैतत् चिन्त्यते – उपस्कारकृतां सामान्यसूत्रव्याख्यानानुसारेण सत्ता पराजातिः, द्रव्यत्वादयः अपराजातयः इत्यवगम्यते । किन्तु 'द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च' इति सूत्रव्याख्याने सामान्यानि विशेषाश्च इत्यत्र समासाभावः विशिष्य प्रदर्शितः । तत्रापि षष्ठीसमासे क्रियमाणे सामान्यस्य विशेषः इति द्रव्यत्वादिषु सामान्यत्वमेव प्रतीयेत, न तु विशेषः प्रतीयते इति अनुपपत्तिः प्रदर्शिता । यद्यत्र पराऽपराजातयः प्रतिपादिताः स्युः तदा षष्ठीसमासे कृतेऽपि अनुपपत्तिः न स्यात् । यतः द्रव्यत्वादयः अपराजातयः इत्यतः सामान्यविशेषाः भवन्त्येव । तस्मात् विशेषशब्देन अपराजातेः केवलायाः ग्रहणं न सम्भवति । अपि तु भेदसाधकस्यैव धर्मस्य ग्रहणं कर्तव्यमिति व्याख्यातुः अभिप्रायः प्रतिभाति ।

किञ्च सामान्यानामेव द्रव्यत्वादीनां भेदसाधकत्वात् वैशेष्यमिति स्वीकारे पञ्चैव पदार्थाः स्युः इति आशङ्क्य सूत्रान्तरम् आरब्धम् 'अन्यत्रान्त्येभ्यो नित्यद्रव्येभ्यः इति । तथा च नित्यद्रव्येषु परमाण्वादिषु विद्यमानाः सामान्यभिन्नाः तद्व्यक्तित्वादयः धर्माः भेदसाधकत्वात् विशेषाः एव भवन्ति । तस्मात् सामान्यत्वस्य विशेषत्वस्य च पदार्थविभाजकोपाधेः उपलम्भात् न पदार्थानां षड्वसङ्ख्यानुपपत्तिः । अत्र अवयवधारायाः अन्ते अवसाने भवन्ति इति परमाणुवृत्तित्वं विशेषाणाम् आचार्यमतानुसारेण प्रदर्शितम् । तथा उत्पत्तिविनाशयोः अन्ते नित्यद्रव्ये विद्यमानः इति वृत्तिकृन्मतं प्रदर्शितम् । किन्तु स्वस्य आशयः पृथक्तया न प्रदर्शितः । तस्मात् उभयमपि स्वसम्मतमेव इति प्रतिभाति । एवमपि भेदसाधकत्वं सामान्यरहितेषु नित्यद्रव्येषु विद्यमाने तद्व्यक्तित्वादौ अस्त्येव इत्यतः तेषां केवलं वैशेष्यं युज्यते एव । तथा च सूत्रप्रकरणस्य पर्यालोचनायां सत्यां भेदसाधकः धर्म एव विशेषः इत्यवगम्यते । तत्रैव उपस्कारकृतां नैर्भ्यमित्यपि ज्ञायते ।

किञ्च इत्थं स्वीकारे प्रयोजनान्तरमप्यस्ति । तथा हि - यदि नित्यद्रव्येषु विद्यमानस्तादृशपदार्थ एव विशेष इत्युच्यते तर्हि तद्व्यक्तित्वादीनां गगनत्वाद्यखण्डोपाधीनाञ्च पृथक्पदार्थत्वं स्वीकरणीयमापतति । न हि तेषां क्लृप्तेषु द्रव्यादिपदार्थेष्वन्तर्भावः सम्भवति । सामान्यादिष्वपि सत्त्वात् । तथा च सूत्रकारोक्तषड्पदार्थनिरूपणमसङ्गतं स्यात् । तेषां

नित्यद्रव्यातिरिक्तेषु घटादिष्वपि सत्त्वात् । किञ्च सूत्रकारैः सामान्यविशेषयोर्बुद्धिसापेक्षत्वकथनात् विशेषस्य नित्यद्रव्यमात्रवृत्तित्वे तदसम्भवः । तस्मात् भेदसाधकः धर्मो विशेष इति प्रतिभाति ।

इदं नैयायिकानामपि सम्मतमेव । तथा हि – 'समानप्रसवात्मिका जातिः'[1] इति जातिप्रतिपादकसूत्रव्याख्यानावसरे भाष्यकारैस्तादृश एव विशेषः प्रत्यपादि । तथा हि – 'या समानानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु, यया बहूनि इतरतो न व्यावर्तन्ते, योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत्सामान्यम् , यच्च केषाञ्चिदभेदं केषाञ्चिद्भेदं तत्सामान्यविशेषो जातिरिति' इति । अत्र विशिष्य केषाञ्चिदभेदकः केषाञ्चिद्भेदकेत्यादिकथनेन भेदसाधकोऽपि धर्मः सामान्यं भवति इति वक्तुः तात्पर्यमवगम्यते । तेन भेदसाधकः एव विशेषपदार्थ इति स्पष्टं विज्ञायते । द्रव्यत्वादिकं हि गुणादिभ्यो भेदं साधयति द्रव्यादिभ्योऽभेदम् । द्रव्येषु मध्ये द्रव्यत्वादिना भेदसाधकत्वाभावात् तदानीं द्रव्यत्वस्य सामान्यत्वमेव । एवञ्च वैशेषिकसूत्रकाराभिमत एव भेदसाधको धर्मो विशेषपदार्थ इत्यत्र न कश्चिद्विरोधः प्रतिभाति ।

एवमपि यदि सामान्यानामेव घटत्वपटत्वादीनां विशेषत्वं स्वीक्रियते तदा सामान्यविशेषयोः विभागो न युज्यते विभाजकधर्मस्यानुपलब्धेः, सामान्यत्ववति पृथिवीत्वादावपि जलादिभेदसाधकत्वाद्विशेषत्वस्य सत्त्वाद् इति तदा नित्यद्रव्यवृत्तयः स्वतोव्यावर्तकाः एव विशेषाः इति परिभाषा स्वीकरणीया । तदनुसारं परमाण्वादिषि नित्यद्रव्येषु एव विशेष इति कश्चन पदार्थः कल्प्यनीयः । स च नित्यद्रव्येषु परस्परभेदं साधयति । विशेषान्तराच्च भेदं स्वयमेव साधयति इति च । अस्मिन् पक्षे विशेष इति पारिभाषिकः पदार्थः । अतः न काचिदनुपपत्तिः ।

१ न्यायसूत्रम् २.२.७०

# वैशेषिकसूत्रोपस्कारोक्तरीत्या अनुमानप्रमाणविमर्शः

**डा. नारायण बी राय्करः**

अतिथ्यध्यापकः, नव्यन्यायविभागः

सुविदितमिदं हि समेषां यत् सर्वशास्त्रप्रमेयविचारणानुकूलतया विद्वत्समाजे न्यायवैशेषिकदर्शनयोरनितरसाधारणो महिमा विद्यत इति। तत्राऽपि भूरिशः प्रमाणपरविचार-व्याख्यानोपव्याख्यानविमर्शादिभिः नैयायिकानां प्रमाणपटवः कर्तेति उपाधिरयम् अन्वर्थतया समुल्लसति। तत्किमेवम् इतरपदार्थविवेचनापेक्षया नैयायिकानामीदृशी प्रमाणपरचर्चायामतिशयिता प्रवृत्तिर्दृश्यते इति चेत्, तत्र न्यायभाष्यकाराणां वात्स्यायनाचार्याणां वचनं स्पुटयति 'प्रमाणमन्तरेण नार्थप्रतिपत्तिः नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्' इति। जगतोऽस्य इष्टे प्रवर्तनमनिष्टे वा निवर्तनं प्रमाणपूर्वकमेव सम्भवति, न त्वाकस्मिकम्। प्रमाणेन खलु प्रमाता प्रमितार्थमुपलभ्य अनुकूले सति तत्प्राप्तीच्छया प्रवर्तते, प्रतिकूले सति तत्परिहारेच्छया निवर्तते वा। इत्थं प्रमातुः इष्टानिष्टप्राप्तिपरिहारप्रयुक्तप्रवृत्त्यधीना भवतीयं जगद्व्यवस्थितिः। तस्मात् सर्वेऽपि पदार्थाः साक्षात् परम्परया वा येन केनाऽपि रूपेण प्रमाणकुक्षौ समापतन्तीत्यतः इतरप्रमेयविवेचनापेक्षया प्रमाणपरविचारावलम्बिनो नैयायिकाः इति स्पष्टम्।

अनयैव रीत्या प्रत्यक्षादिचतुर्षु प्रमाणेश्वपि तार्किकैरितरप्रमासाधनापेक्षया अनुमानमतिशयेन विचारणीयत्वेनाङ्गीकृतमिति न्यायशास्त्रग्रन्थतद्व्याख्यानावलोकनेन ज्ञायते। तदुक्तम् वाचस्पतिमिश्रैः 'प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः' इति। तथा च प्रत्यक्षेण साक्षात्कृतोऽर्थः अनुमानेन दृढतयाऽवधार्यतेतराम्। यथा कस्यचित् पुरुषस्य दूरस्थे सरोवरादौ जलस्य साक्षात्कारः भवति। तदा जलमरीचिकादिसन्देहात् प्रवृत्तः सः बलाकादिलिङ्गेन जलमनुमाय संवादेन प्रागुत्पन्नं जलज्ञानं यथार्थमिति अवधारयति। अपि चोक्तं वैशेषिकसूत्रे दृष्ट आत्मनि लिङ्गे एक एव दृढत्वात् प्रत्यक्षवत्प्रत्ययः' इति। यद्यपि मानसप्रत्यक्षेण गृहीतः आत्मा, तथाऽपि अनुमानेन प्राङ्मानसप्रत्यक्षेण गृहीतस्यैवात्मनो विषयीकरणात् दृढतरम् आत्मज्ञानं प्रत्यक्षवत् स्पष्टतामावहति। अपि च 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतिवाक्ये श्रवणानन्तरं विहितं यन्मननम्, तदनुमानमेव। तेनैव

अश्रद्धामलक्षालनात् निधिध्यासनाधिकारः सिध्यति। तस्मादनुमानप्रमाणमतिशयेन प्रशंसितं न्यायनयज्ञैः।

**अनुमानपदार्थनिर्वचनम्**

तत्र वैशेषिकसूत्रोपस्कारे अष्टमाध्याये प्रथमाह्निके तत्रात्मा मनश्चाप्रत्यक्षे इति सूत्रस्य व्याख्यानावसरे उपस्कारकारेण ज्ञानस्य विद्याऽविद्याभेदेन द्वैविध्यमिति व्याख्यातम्। तत्र विद्या नाम प्रमा। अविद्या नाम भ्रमः। तत्र विद्या प्रत्यक्षम्, लैङ्गिकम्, स्मरणम्, आर्षं चेति चतुर्धा विभक्ता। तत्र लैङ्गिकमिति पदेन अनुमानमेव लक्षितम्। तथा च लिङ्गात् जातं लैङ्गिकम्। तच्चानुमितिरेव। तथा च व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम्। यत् व्याप्तिरूपसामर्थ्येन लीनं साध्यं गमयति ज्ञापयति तल्लिङ्गमित्यर्थः। तदुक्तम् पदार्थधर्मसङ्ग्रहे-

**"अनुमेयेन सम्बध्दं प्रसिध्दञ्च तदन्विते।**

**तदभावे तु नास्त्येव तल्लिङ्गमनुमापकम्॥ (पदार्थधर्मसङ्ग्रहः)" इति।**

देशविशेषे कालविशेषे च **अनुमेयेन** = साध्येन यत् **सम्बद्धम्** = सहचरितं व्याप्तमिति यावत्, **तदन्विते** = अनुमेयधर्मान्विते अन्यत्र साध्यस्यावस्थानदशायां **प्रसिद्धम्** = यस्य अवस्थानम् अवगतम्, एवं **तदभावे** = साध्याभावदशायां **नास्त्येव** = यत् नियमेन न वर्तते; **तत्** = तादृशपदार्थविशेषः **अनुमापकम्** अनुमित्यात्मकज्ञानस्य करणम् **लिङ्गमित्यर्थः**। तेन व्याप्तिविशिष्टः पक्षधर्मो लिङ्गमित्युक्तं भवति। यथा- महानसादौ असकृदग्निधूमयो-रेकत्रावस्थानरूपं साहचर्यमवधार्य कश्चित् पुरुषः कदाचित् पर्वतसमीपं गच्छन् कुत्रचित् धूममात्रमवलोकयन् तस्मिन् धूमे प्रागनुभूतं अग्निसाहचर्यं स्मृत्वा पर्वते अग्निं प्रतिपद्यते। तेनात्र धूमः पर्वते अग्न्यवगाह्यनुमितेः लिङ्गमिति निर्णीयते। धूमेनानुमितोऽग्निरनुमेयः, साध्यम् लिङ्गी चेति व्यवह्रियते। यत्र पर्वते साध्यस्य संशयो जातः, स पक्षः इति; यत्र साध्यनिश्चयो गृहीतः महानसादौ, स सपक्ष इति; यत्र च साध्याभावनिश्चयोऽवधारितः ह्रदकूपादौ, स विपक्ष इति च व्यवह्रियते। इत्थं लिङ्गलिङ्गिनोरनुभूतसाहचर्यस्मरणप्रयुक्तेन लिङ्गेनानुमेयस्य प्रत्ययोऽनुमितिर्लैङ्गिकं चेति व्यपदिश्यते। तत्करणं लिङ्गं साधनं हेतुश्चेत्यभिधीयते।

**लिङ्गप्रभेदाः**

तत्रादौ सम्बन्धमात्रवचनात् प्रतीयमानाः लिङ्गस्य भेदाः निरूप्यन्ते। तथा च कणादाचार्याः "अस्य इदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम्" इति सूत्रे

साध्यसहचरितस्य लिङ्गस्य नाना भेदानुपदर्शयन्ति। 'अस्य इदम्' इति प्रत्येकमभिसम्बध्यते । तथा च 'अस्येदं कार्यम्', 'अस्येदं कारणम्', 'अस्येदं संयोगि', 'अस्येदं समवायि' इत्येवं व्यवहारभेदात् लिङ्गस्य भेदाः सिध्यन्तीत्यर्थः। अत्रास्येति पदेन साध्यस्य लिङ्गिनो वा निर्देशः, इदमिति पदेन च साधनस्य लिङ्गस्य वा निर्देशः कृतः। तदेकैकशः सर्वेषां लिङ्गानामुदाहरणपुरस्कारेण स्वरूपं विविच्यते-

१. यत्र यल्लिङ्गं कार्यात्मना लिङ्गिनमनुमापयति, तत्र तत्कार्यलिङ्गम्। यथा 'पर्वतो वह्निमान् धूमात् यथा महानसम्' इत्यत्र अस्य = साध्यस्य वह्नेः इदं = कार्यं लिङ्गं धूमः, तस्मात् पर्वते वह्निरस्तीति ज्ञानं लैङ्गिकमिति। एवं यथा- 'इयं नदी भूतावृष्टिमती पूर्वोदकविपरीतोदकवत्त्वात्' इत्यत्र अस्य = साध्यस्य भूतवृष्टेः इदं = पूर्वोदकविपरीतमुदकं कार्यं लिङ्गम्, तस्मात् अनेन लिङ्गेन पूर्वेद्युः वृष्टिरभूदिति ज्ञायते।

२. यत्र यल्लिङ्गं कारणात्मना लिङ्गिनमनुमापयति, तत्र तल्लिङ्गं कारणलिङ्गम्। यथा- 'अयं प्रदेशः शब्दवान् भेरीदण्डसंयोगात्' इत्यत्र कश्चित् बदिरः अस्य = साध्यस्य शब्दस्य इदं = कारणं लिङ्गं भेरीदण्डसंयोगः इति प्रतिपद्य तस्मात् लिङ्गात् अस्मिन् प्रदेशे शब्दमनुमिनोति, तल्लैङ्गिकम्। एवम् 'अयं प्रदेशः भविष्यद्वृष्टिमान् वर्धमानमेघवत्त्वात्' इत्यत्र अस्य = वृष्टिरूपस्य साध्यस्य इदं = कारणं मेघवर्धनरूपं लिङ्गम्। तल्लिङ्गात् भविष्यति वृष्टिरिति लैङ्गिकं ज्ञानम्।

३. यत्र यल्लिङ्गं संयुक्तं सत् लिङ्गिनमनुमापयति, तत्र तल्लिङ्गं संयोगिलिङ्गम्। यथा 'इदं शरीरवत् त्वचः' इत्यत्र अस्य = शरीररूपसाध्यस्य इदम् = संयोगि त्वक् लिङ्गम्। तस्मात् अन्धकारे त्वचं स्पृष्ट्वा तत्संयोगि शरीरमनुमीयते।

४. यत्र यल्लिङ्गं विरोधि सत् लिङ्गिनमनुमापयति, तल्लिङ्गं विरोधिलिङ्गम्। "अयम् गुल्मः अन्तर्निलीननकुलवान् विस्फूर्जसर्पात्" इत्यत्र अस्य = नकुलरूपस्य अनुमेयस्य साध्यस्य वा इदं = विरोधिभूतो सर्पः लिङ्गम्। अतः विस्फुर्जन्तं सर्पं दृष्ट्वा विरोधी नकुलोऽनुमीयते ।

५. यत्र यल्लिङ्गं समवायि सत् लिङ्गिनमनुमापयति, तत्र तल्लिङ्गं समवायिलिङ्गम्। यथा- 'इदं जलं तेजस्संयुक्तम् औष्ण्यात्' इत्यत्र अस्य = तेजसः इदम् = औष्ण्यं समवायेन सम्बन्धि सत् लिङ्गम्। अतस्तस्मात् जले तेजोऽनुमीयते।

इत्थमेतावता प्रतिपादितात् कार्यकारणभावादिसम्बन्धादतिरिक्त-सम्बन्धानवलम्ब्यापि लिङ्गस्य नाना प्रकाराः भवन्ति। यथा- "अयं कालः समुद्रजलवृध्दिमान् चन्द्रोदयात्" इत्यत्र अस्य = समुद्रजलवृद्धिरूपलिङ्गिनः इदम् = चन्द्रोदयः लिङ्गम्। एवम् "अयं कालः अगस्त्योदयवान् जलप्रसादात्" इत्यत्र अस्य = अगस्त्योदयरूपसाध्यस्य इदं = जलप्रसादो लिङ्गम्। "अयं कालः चन्द्रोदयवान् कुमुदप्रकाशात्" इत्यत्र अस्य = चन्द्रोदयरूपसाध्यस्य इदम् = कुमुदप्रकाशो लिङ्गम्। "अयं कालः चतुर्दशनक्षत्रास्तमयवान् अपरचतुर्दशनक्षत्रोदयात्" इत्यत्र अस्य = अपरचतुर्दशनक्षत्रास्तमस्य इदं चतुर्दशनक्षत्रोदयः लिङ्गम्। "इदं फलं रूपवत् रसात्" इत्यत्र अस्य = रूपस्य इदं = रसो लिङ्गम्।

इत्थमत्र सर्वत्र सूत्रोक्तम् 'अस्य इदमि'त्येतावदेव लिङ्गस्य साध्यगमकत्वे प्रयोजकम्, न तु कार्यकारणभावादि सम्भन्धः। तथा च अस्य साधनस्य धूमादेरिदं साध्यम् वह्न्यादिकम्, अथवा व्यापकस्य वह्न्यादेरिदं व्याप्यं धूमादिकं प्रयोजकम्। तेन व्याप्यत्वग्रहमात्रं प्रयोजकमिति सिद्धम्। व्याप्यत्वं च व्याप्तिरेव। तच्च साध्यसाधनयोरनौपाधिकः सम्भन्धः। अनौपाधिकत्वं च स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यरूपम्। तथा च 'पर्वतो वह्निमान् धूमात्' इत्यत्र स्वम् = साध्यो वह्निः। तद्व्यभिचारि = घटादिकम्। तद्व्यभिचारी साध्यो वह्निरेव। तत्सामानाधिकरण्यं धूमे इति लक्षणसङ्गतिः। एवं 'पर्वतो धूमवान् वह्नेः' इत्यत्र स्वम् = साध्यो धूम्अः। तद्व्यभिचारी वह्निरेव, वह्निमदयोगोलके धूमाभावात्। तद्व्यभिचारितया धूमस्य ग्रहणासम्भवात् न तत्र लक्षणमतिप्रसञ्जकमिति व्याप्तिनिरूपनम्।

**प्रकारान्तरेण लिङ्गस्य भेदनिरूपणम्**

एवं प्रागुक्ताः लिङ्गस्य भेदाः केवलम् 'अस्येदम्' इति सम्बन्धमात्रनिर्वचनात् सिद्धाः। प्रकारान्तरेण लिङ्गं दृष्टं सामान्यतो दृष्टमिति द्विविधम्। तत्र प्रसिद्धसाध्ययोर्अत्यन्तजात्यभेदेऽनुमानं दृष्टम्। व्याप्यव्यापकभावेन गृहीतयोः साध्यसाधनयोर्यद्यात्यन्तिकोऽभेदो दृश्यते, तदा दृष्टं लिङ्गम्। यथा 'अयं गौः सास्नावत्वात्' इत्यत्र केवलं गवि सास्नामात्रम् उपलभ्य देशान्तरेऽपि सास्नामात्रदर्शनात् गवानुमितिः। अत्र सास्नावत्त्वस्य गोत्वजात्या आत्यन्तिकोऽभेदः दृश्यते।

प्रसिद्धसाध्ययोर्अत्यन्तजातिभेदे लिङ्गानुमेयधर्मसामान्यानुवृत्तितोऽनुमानम् सामान्यतोदृष्टम्। व्याप्यव्यापकभावेनावधारितयोः साध्यहेत्वोः आत्यन्तिकतया जातिभेददर्शने सति लिङ्गानुमेयत्वरूपसामान्यधर्मं पुरस्कृत्य यदनुमानम् भवति, तत् सामान्यतो दृष्टं लिङ्गम्। यथा कर्षकवणिग्राजपुरुषाणां च प्रवृत्तेः फलवत्त्वम् ज्ञात्वा तदनुरोधेन प्रयोजनम् अनुद्दिश्य प्रवर्तमानानाम् वर्णाश्रमिणामपि दृष्टम् फलानुमानम् इति। अथवा गुणत्वानुमेयस्य गुण्याश्रितत्वरूपसामान्यधर्मानुरोधेन बुद्ध्यादिगुणाश्रयतया आत्मनोऽनुमानम्। इत्थं नानाग्रन्थव्याख्यानावलोकनपरामर्शपूर्वकम् अनुमानप्रमाणस्वरूपविवेचनं यथाशक्ति कृतम्। अतः कृतेऽस्मिन् शास्त्रप्रमेयचर्चारूपव्यवसाये दोषज्ञानां विदुषां वचनमेव प्रमाणमिति ब्रुवन् विरम्यतेऽत्र विस्तरात्।

आकरग्रन्थः- पदार्थधर्मसङ्ग्रहः, वैशेषिकसूत्रोपस्कारः।

# विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः

**प्रो. एन्. लक्ष्मीनारायणट्टः, प्राचार्यः,**

एस्.एम्.एस्.पि.संस्कृतमहाविद्यालयः, उडुपी

द्वे वर्त्मनी गिरो देव्याः शास्त्रं च कविकर्म च ।
प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम् ।।

वाक्यं यदि प्रयुज्यते तर्हि तत्र प्रतिपादकः, प्रतिपाद्यः, प्रतिपादनं चेति अंशत्रयं नियमेन भवति । तत्र प्रतिपादको भवति शब्दः, प्रतिपाद्यो भवत्यर्थः, प्रतिपादनं च क्रियारूपं तदुभयमाश्रित्य वर्तते इति स्थितिः । तत्र "अथातो ब्रह्मजिज्ञासा",

एकदा नारदो योगी लोकानुग्रहकाङ्क्षया ।
पर्यटन् विविधं देशं मर्त्यलोकमुपागतः ॥

एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ।

इति वाक्यत्रयं सूक्ष्मं परिशील्यते तर्हि आदिमे वाक्ये शब्दाः परिवृत्तिं न सहन्ते, द्वितीये अर्थः सकारणं प्रतिपाद्यते, तृतीये तु प्रतिपादनं वक्रमिति स्फुटं भाति । अत एव आदिमे वाक्ये शब्दस्य परिवृत्त्यसहत्वात् प्राधान्यमिति वाक्यस्य शास्त्रमिति व्यवहारः । मध्यमे सकारणत्वेन प्रतिपादनात् अर्थस्य प्राधान्यमिति पुराणमिति व्यवहारः । अन्तिमे तु चमत्कारजनकत्वात् प्रतिपादनक्रियायाः प्राधान्यमिति काव्यमिति विवेकः । एवंविधे काव्ये सारभूतः पदार्थः कः यस्तावत् आत्मेति व्यपदिश्येत - उच्यते, तत्र भामहादयो जरत्तरा विम्रष्टारः अलङ्कारं काव्यस्यात्मानम् आमनन्ति । वामनो रीतिम् । आनन्दवर्धनो ध्वनिम् । कुन्तको वक्रोक्तिम् । क्षेमेन्द्र औचित्यम् । अभिनवगुप्तादयस्तु रसम् । अद्यत्वेऽभिनवगुप्तस्यैव सिद्धान्तः सर्वजनग्राह्यतया वरीवर्ति ।

न चैवमलङ्कारादेः काव्यात्मत्वमिति पक्षे भरतेन स्वकृतौ रसस्य प्राधान्येन यन्निरूपणं तन्न सङ्गच्छेते इति वाच्यम्, सर्वेषामपि मतेन रसे आत्मत्वस्य सिद्धिरित्यदोषात्, तथाहि - भामहादीनां मतेन रसस्य रसवदाद्यलङ्काररूपत्वात् अलङ्कारेष्वेवान्तर्भावः, वामनस्य मतेन 'दीप्तरसत्वं कान्तिः' इति गुणवत्पदविन्यासरूपायां रीतौ उपसर्जने गुणेऽन्तर्भावः, आनन्दवर्धनस्य मतेन वस्त्वलङ्काररसरूपात्मकतया ध्वनावेव अन्तर्भावः, कुन्तकस्य मतेन वाक्यवक्रोक्तौ अन्तर्भावः, क्षेमेन्द्रस्य मतेन तु औचित्यस्य रसायत्तत्वेन तस्य आत्मत्वे

तन्निर्णयमूलभूतस्य रसस्यापि तत्सिद्धिरिति सर्वेषामपि मतेन रसस्यात्मत्वम् अनायाससिद्धम् ।

**ननु रसो नाम कः?**

ननु रसो नाम कः - उच्यते, रस्यत आस्वाद्यते इति रसः । आस्वादनस्नेहनार्थकात् रसयतेः चौरादिकात् कर्मणि 'पुंसि संज्ञायां घः प्रायेण' इत्यनेन घप्रत्यये निष्पन्नोऽयं शब्दः आस्वादनीयेऽर्थे वर्तते । स चार्थः चित्तवृत्तिविशेषा भावाः । भावयन्ति चित्तं प्राप्नुवन्ति व्याप्नुवन्तीति भावाः । भू प्राप्तौ इति चौरादिकात् भावयतेः कर्तरि अच् ।

चित्तं नाम बुद्धिः, या प्रकृतेः प्रथमो विकारः । वृत्तिर्नाम अवस्थाविशेषः । चित्ते हि आन्तरो बाह्यश्चेति द्विविधो विकारः, आकारान्तरप्राप्तिरिति यावत् । आन्तरश्च रत्यादिः । बाह्यश्च तत्तत्पदार्थाकारताप्राप्तिरूपः । यथा हि सरोवरस्थितस्य जलस्य अन्तः तरङ्गबुद्बुदादिः विकारः सम्भवति, बहिश्च कुल्यया निर्गतस्य तस्य तत्तत्क्षेत्राद्याकारतारूपः तथा चित्तेऽपि अन्तः रतिहासादिरूपो विकारः सम्भवति, बहिश्च इन्द्रियप्रणालिकया निर्गतस्य तस्य तत्तत्पदार्थाकाररूपः । तयोश्च यो रतिहासादिरूपो विकारः सा चित्तस्य आन्तरी वृत्तिः, यश्च घटपटादिपदार्थाकारतारूपः सा बाह्येति विवेकः । वृत्तिश्चेयमुभयविधापि न चित्ताद्भिद्यते, ज्वालेव हुताशनात्, तरङ्गादिरिव च जलात् ।

ननु चित्ते आन्तरा भावा रत्यादयः कति? - एकोनपञ्चाशदिति भरतः । अमीषु एकोनपञ्चाशति भावेषु रत्यादयः अष्टौ स्थायिनः, संसारचक्रे परिभ्रमतां प्राणिनां सदा प्रतीतिगोचरत्वेन चित्ते चिरमवस्थानात् । स्तम्भादयोऽष्टौ सात्त्विकाः, सत्त्वजन्यत्वात्, सत्त्वं च तन्मयीभवनम् । निर्वेदादयः त्रयस्त्रिंशत् व्यभिचारिणः, प्रधानीभूतरत्याद्याभिमुख्येन सञ्चारात् ।

काव्यप्रकाशकारादयस्तु एकोनपञ्चाशत् भावा इति, मुनिना यदुक्तं तत्प्रायिकम्, तथाहि - तत्र व्यभिचारिषु यः पठितो निर्वेदः स तावत् गृहकलहादिजन्यः जगदनित्यत्वज्ञानजन्यश्चेति द्विविधः । तत्राद्यस्य व्यभिचारित्वम्, अन्त्यस्य तु शान्तरसं प्रति स्थायित्वम् । पुनश्च स्थायिनिरूपणावसरे पठितेन रतिशब्देन यद्यपि सामान्यस्यैव प्रतिपादनम् तथापि तच्छब्देन स्त्रीपुरुषनिष्ठायाः रतेरिव गुरुदेवादिविषयिकाया रतेरपि ग्रहणं

भवति । तयोराद्यस्य शृङ्गारं प्रति स्थायित्वम् अन्त्यस्य तु व्यभिचारित्वम् । तस्मात् एकपञ्चाशत् भावाः, न त्वेकोनपञ्चाशत् इत्यभिप्रयन्ति ।

वस्तुतस्तु शृङ्गारादिकं रसान्तरं विकृतिः शान्तस्तु प्रकृतिरित्यङ्गीकारात् विकृतिभूतरसाभिप्रायेण अष्टावेव स्थायिन इति मुनेर्वचनम् । प्रकृतिविकृतिभावश्च नात्र मृद्धटयोरिव उपादानोपादेयभावः, किन्तु स्वभावेन अवस्थानं प्रकृतिः, प्रकारान्तरेण अवस्थानं तु विकृतिरिति बोध्यम् । तथा च -

स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ।
पुनर्निमित्तापाये च शान्त एवोपलीयते ॥

इत्युक्तदिशा रत्याद्यनुपरक्तत्वेनावस्थितं चित्तं प्रकृतिः तदुपरक्तत्वेन अवस्थितं तु विकृतिरिति सिध्यति । लोकेऽपि प्रसन्नं सरो वीक्ष्य 'इयमत्र प्रकृतिः' क्षुभितं च तदेव वीक्ष्य 'इयमत्र विकृतिः'इति प्रयोगो दृश्यते । एवं गुरुदेवादिविषया रतिरपि न पार्थक्यं व्रजति, धर्मवीर एवान्तर्भावात् । तस्मात् एकोनपञ्चाशदिति यन्मुनेर्वचनं तद्युक्तमिति मे मतिः ।

o **रसनिष्पत्तिः कथम् ?**

तत्र व्यङ्ग्यो रत्यादिः शृङ्गारादिः रसः । कथं तस्य निष्पत्तिरिति जिज्ञासायां महर्षिणा अभिहितम् – "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" ॥

वाक्यं चेदम् ऋषिमूलम् । अत एवास्य व्याख्याने मीमांसकादीनामपि भट्टलोल्लटादीनां प्रवृत्तिः । किन्तु ते न ऋषयः । तस्माद्तद्व्याख्याने मतिभेदो भवति बाधितत्वं च । तस्माद्युक्तिमवलम्ब्यैवात्र निर्णयः कर्तव्य इति स्थितिः ।

सूत्रस्यायमाशयः - यथा हि लोके रत्यादिं प्रति कारणकार्यसहकारिणो भवन्ति तथैवात्रापि, तथाहि - लोके रतिं प्रति तन्वी कारणम्, निर्जनप्रदेश-चैत्रमासादिकम् उद्दीपनम्, कटाक्षविक्षेपादिः कार्यम्, लज्जादयः सहकारिणः । एवमत्रापि दुष्यन्तादिनिष्ठां रतिः प्रति शकुन्तलादिः कारणम्, कोकिलकूजनादिकम् उद्दीपनम्, स्वेदादिः कार्यम्, आवेगादिः सहकारी । कारणकार्यसहकारिणामेव एतेषां शास्त्रेऽस्मिन् क्रमेण विभाव-अनुभाव-व्यभिचारिशब्देन व्यपदेशः ।

काव्ये हि रत्यादिरूपं रसं व्यञ्जयितुमिच्छता कविना त एवार्था निबध्यन्ते ये तावदुपकारित्वात् तत्सम्बद्धा भवन्ति । नात्र असम्बद्धस्य अर्थान्तरस्य निबन्धनं सम्भवति ।

अथ अनवधानेन निबन्धनं तर्हि स दोषाय । एतेषां संयोगो बुद्धौ । संयोगश्च समावेशः । एतेषु विभावाः सर्वथैव बाह्याः पदार्थाः । स्थायिनो व्यभिचारिणश्च सर्वथैवान्तराः । अनुभावास्तु स्तम्भस्वेदादिरूपा आन्तराः, कटाक्षविक्षेपादिरूपास्तु बाह्या इति विवेकः ।

यद्यप्यत्र सूत्रे रत्यादिप्रतिपादकं स्थायिपदं नास्ति तथापि न्यासान्तरे कृते तस्य आक्षेपात् सिद्धिः, यथा - विभावादिसंयोगात् रत्यादिः स्थायी रसः सन् निष्पद्यते ॥

सूत्रस्यास्य व्याख्याने महान् मतभेदो वर्तते । तत्र मीमांसको भट्टलोल्लटः, नैयायिको श्रीशङ्कुकः, साङ्ख्यो भट्टनायकः, वेदान्ती अभिनवगुप्तश्च प्रमुखाः । रसगङ्गाधरे पुनः नवीनास्तु इत्युल्लिख्य अन्यदेकमपि मतं निरूपितम् । तत्र सहृदये दुष्यन्तादेरभेदस्य भ्रान्त्या निर्णयात् भ्रान्तिवाद इति व्यवहारो युक्तः । एवमत्र रसे विषये क्रमेण उत्पत्तिवादः अनुमितिवादः भुक्तिवादः व्यक्तिवादः भ्रान्तिवादश्चेति पञ्च वादा जाग्रति । तत्र भट्टलोल्लटस्य मतेन रसोऽनुकार्ये रामादौ, शङ्कुकस्य मतेन अनुकर्तरि नटे, अन्येषां मतेन सहृदये इति विवेकः ।

*** निष्पत्तिरित्यस्यार्थः कः?**

यद्यपि निष्पत्तिशब्दस्य उत्पत्तिरित्यर्थः तथापि मतभेदात् तस्य अन्यान्यार्थपरत्वं निर्णीतम् दृश्यते । तत्र अनुकार्ये रसं मन्यमानस्य भट्टलोल्लटस्य मतेन शब्दस्यास्य उत्पत्तिज्ञप्तिपुष्टिसमुदायरूप उपचय इत्यर्थः । अनुकर्तरि रसं मन्यमानस्य शङ्कुकस्य मतेन अनुमितिरित्यर्थः । सहृदये रसं मन्यमानस्य भट्टनायकस्य मतेन भुक्तिरित्यर्थः । नवीनानां मतेन उत्पत्तिरित्यर्थः । अभिनवगुप्तस्य मतेन तु व्यक्तिरित्यर्थः ।

वस्तुतस्तु विभावादिसंयोगात् निष्पद्यमानो रत्यादिः रस इति स्थितौ निष्पद्यमान इत्यस्य तत्तन्मतेन उपचीयमानः, अनुमीयमानः, भुज्यमानः इत्यादेरर्थस्य सिद्धिः । तत्र गुणीभूतस्य उपचयादेः उत्पत्त्या रसस्यापि उपचरिता उत्पत्तिरिति सर्वेषां मतेनापि निष्पत्तिशब्दस्य उत्पत्तिरित्येवार्थः, 'दण्डे ध्वस्ते दण्डी ध्वस्त' इतिवदिति मे मतिः ।

**१. भट्टलोल्लटस्य मतम्**

अनुकार्ये रामादौ रसं मन्यमानस्य अस्य मतेन अनुकार्ये रामादौ वर्तमानो रत्यादिरेव रसः । तस्य च प्रकाशनं कविना स्वकृतौ क्रियते । यथा यथा सीतादेः विभावस्य निबन्धनं तथा तथा रामादौ रत्यादेः सम्यगुत्पत्तिः । यथा यथा कटाक्षविक्षेपादेः अनुभावस्य तथा तथा तस्य सम्यक् प्रतीतिः । यथा यथा च व्यभिचारिणः तथा तथा तस्य पुष्टिरिति

विभावादीनां त्रयाणां रत्यादिना उपचेयोपचायकभावः सम्बन्धः । उपचयशब्दश्चात्र न पुष्टिमात्रपरः किन्तु उत्पत्त्यादिसाधारणः । रसश्च रत्यादिः । ततश्च स रत्यादिः सीतादिनालम्बनविभावेन चन्द्रिकादिना उद्दीपनविभावेन रामादौ अनुकार्ये समुत्पन्नः, तत्कार्यरूपैः स्वेदरोमाञ्चादिभिः अनुभावैः प्रतीतः, लज्जादिभिश्च व्यभिचारिभिः परिपुष्टो भवति । वस्तुगत्या रत्यादिरयम् अनुकार्ये रामादौ वर्तते तथापि तस्य तद्रूपत्वेन गृहीते नटे साक्षात्कारात् सहृदयानां चमत्कारः, यथा चित्रे हिमालयादेः दर्शनात् आनन्दः । अनुकार्ये रामादौ रत्यादिरूपस्य रसस्य उत्पत्तिरित्यङ्गीकारात् अयमुत्पत्तिवाद इत्युच्यते ।

**चिन्त्यमिदम्, तथाहि -**

१. विभावादिसमूहे योऽनुभावः यश्च व्यभिचारी तस्मिन् कारणत्वस्य दुरुपपादत्वात् रससूत्रे हेत्वर्थकपञ्चम्या अनुपपत्तिः।

२. कल्पिते कथावस्तुनि अनुकार्यस्यैवाभावेन तत्र अधिकरणाभावात् रसस्याभावप्रसङ्गः ।

३. परगततया प्रतीयमनात्वेन अनास्वाद्यत्वम् ।

४. विभावादिशब्दैः व्यपदेशस्य अनौचित्यम् ।

५. करुणबीभत्सादिषु रसेषु सहृदयानाम् अप्रवृत्तिप्रसङ्गः ।

**२. शङ्कुकस्य मतम्**

अयं नैयायिकः । तस्मात् व्यञ्जनाम् अनङ्गीकुर्वन्नयम् अनुमानेनैव रसं साधयति । अस्य मतेन रसस्तावत् अनुकर्तरि नटे । अस्य मतं तावदिदम् -

पुरोवर्तिनं नटं पश्यतां सामाजिकानाम् 'अयं रामः' इत्याकारकं यज्ज्ञानं जायते तत्सर्वथा विलक्षणम् । न तज्ज्ञानं प्रमा, घटादौ दृष्टे जायमानस्य 'अयमेव घटः''घट एवायम्' इत्यादेः ज्ञानस्येव वास्तविकत्वाभावात् । न भ्रान्तिः, 'अयं रामः' इति ज्ञानकाले 'रामो न' इति बाधज्ञानप्रसक्तेः अभावात्, तज्जन्याया उपसर्पणादिक्रियायाश्च अदर्शनात् । भ्रान्तिस्थले तु रज्जुसर्पादौ 'अयं सर्पः' इति ज्ञानकाल एव सूक्ष्मतया परिशीलनेन 'नायं सर्पः किन्तु रज्जुः' इत्यवश्यं बाधज्ञानस्य प्रसक्तिर्वर्तते, पलायनादेश्च । न तावत् 'रामः स्यान्न वा' इति संशयः, निश्चयात्मकत्वेन जायमानत्वात् । नापि 'रामसदृशोऽयम्' इति सादृश्यगर्भम्, रामोऽयमिति प्रकारेणैव सम्भवात् ।

तस्मात् 'अयं रामः' इति यज्ज्ञानं तत् सम्यक्-मिथ्या-संशय-सादृश्यज्ञानेभ्यो व्यतिरिक्तं चित्रतुरगज्ञानमिव विलक्षणम् । एतादृशज्ञाने विषयभूतो नटोऽत्र पक्षः । तत्र च काव्यार्थानुसन्धानबलात् शिक्षाभ्यासादिबलाच्च अनुभावं (कटाक्षविक्षेपादिरूपं कार्यभूतमर्थं) प्रदर्शयति रामाद्यनुकारिणि नटे गम्यगमकभावरूपात् सम्बन्धात् असन्नपि रामादिगतरत्यादिः अनुमीयते । तस्य च पौनःपुन्येनास्वादने चमत्कारोदयः । विभावादयो यद्यपि कृत्रिमाः तथापि रसास्वादनकाले तन्मयतावशात् तेषामकृत्रिमतया ग्रहणम् । अयमत्र अनुमानस्य प्रयोगः - रामोऽयं सीताविषयकरतिमान्, कटाक्षविक्षेपादिमत्त्वात् ॥ निष्पत्तेः अनुमित्यर्थकत्वात् अयमनुमितिवाद इत्युच्यते ।

**इदमपि चिन्त्यम्,**तथाहि -

१. आलम्बने हेतुत्वस्य असम्भवेन समूहे कारणत्वोक्तेः अनुपपन्नत्वम् ।
२. परगततया प्रतीयमनात्वेन अनास्वाद्यत्वम् । नहि केनचित् पुरुषेण कोटिमितं धनं लब्धमिति कोऽपि नृत्यति ।
३. स्ववाचकेनैव कारणादिशब्देन व्यपदेष्टुं शक्यत्वात् विभावादिशब्देन व्यपदेशे बीजाभावप्रसङ्गः ।
४. हरिश्चन्द्रादौ शोकादेः प्रतीतौ सान्त्वानादौ प्रवृत्तिप्रसङ्गः, रसस्य दुःखमयत्वप्रसङ्गश्च ।
५. 'चैत्र! पुत्रस्ते जातः' इत्यादौ मुखविकासादिना हर्षस्येव अनुमीयमानस्य रत्यादेः लौकिकत्वप्रसङ्गः ।
६. प्रात्यक्षिकस्यैव अर्थस्य चमत्कारित्वेन अनुमेयस्य तस्य कथं चमत्कारित्वमिति पर्यनुयोगप्रसङ्गः ।
७. निष्पत्तिरित्यस्य अनुमित्यर्थकमित्यस्य असमञ्जसत्वम् ।
८. पदार्थेन पदार्थान्तरं व्याप्यते, यथा वह्निना धूमः । न जातुवाक्यार्थेन वाक्यार्थान्तरं पदार्थान्तरं वा । कुतः? - सामान्ययोरेव व्याप्तिरिति निर्णयात् ।
९. किञ्च अनुमितौ एकस्यैवार्थस्य हेतुत्वं पर्याप्तम्, न तु अनेकस्य । यद्यपि प्रकृत्यादौ अनेकस्य हेतुत्वं दृष्टं सांख्यादौ तथापि तस्य हेत्वन्तरसद्भावप्रतिपादने तात्पर्यम् न तु प्रकृते इवअनेकेन साध्यस्य साधने तात्पर्यम् । एतेन पुनः पुनः कार्यरूपस्य अनुभावस्य प्रतिपादनं यदुत्कर्षाय निर्णीतं तस्यात्र अपकर्षप्रयोजकत्वप्रसङ्गः ।

१०. अनुमितिपक्षे यथा महानसः इति दृष्टान्तोपन्यासः न तथात्र । किञ्च परार्थानुमाने प्रतिपाद्यप्रतिपादकभावः न त्वत्र ।

अत्रेदं बोध्यम्-"विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिरिति" तावत्सूत्रम् । रसश्च रत्यादिः अनुकार्ये अनुकर्तरि सहृदये च वर्तते किन्तु आस्वाद्यताशालित्वं सहृदयगत एव नान्यत्र, यथा लोके पायसं स्थाल्यां दर्व्यां स्थालिकायां चेति त्रिषु स्थलेषु भवति तथापि आस्वाद्यताशालित्वं स्थालिकागत एव पायसे नान्यत्र । आस्वाद्यताशालित्वमेव रसस्य जीवितम् अन्यथा स्वरूपतोपापत्तेः । तस्मात् सहृदयनिष्ठो रत्यादी रस इत्येव पक्षो ज्यायान्। किन्तु तत्र स्वनिष्ठस्य रत्यादेः व्यञ्जनानामकशब्दव्यापारेण बोध्यमानत्वं न सम्भवतीति व्यङ्ग्यत्वं दुरुपपादम्, तं प्रति शकुन्तलादीनाम् आलम्बनत्वं न सम्भवतीति दोषद्वयं जागर्ति ।

तत्र प्रथमो दोषः औपचारिकः प्रयोग इति व्याहृत्य उद्धारयितुं शक्यते, यथा - यदा शकुन्तलादयः पदार्थाः प्रदर्शिता भवन्ति तदा व्यञ्जकैस्तैः 'गतोऽस्तमर्कः इत्यनेन'सान्ध्यो विधिरनुष्ठीयताम्' इत्यादिवत् दुष्यन्तादौ शकुन्तलाविषयिका रतिः अभिव्यक्ता भवति । एवं दुष्यन्तगतरतेः व्यङ्ग्यत्वे सिद्धे सहृदयनिष्ठरत्यादावपि साजात्यात् तदारोप्य व्यवहारः कर्तुं शक्यते इति।

शकुन्तलादेः आलम्बनत्वं कथमिति यो द्वितीयः प्रश्नः तस्य तु द्वेधा परिहारः सम्भवति - अभेदबुद्धिरिति एकेन मार्गेण, साधारणीकरणमिति मार्गान्तरेण । तयोराद्यं नवीना अङ्गीकुर्वन्ति, अन्त्यं तु भट्टनायकाभिनवगुप्तादय इति विशेषः । तत्रेदं भट्टनायकस्य मतम् -

**३. भट्टनायकस्य मतम्**

अस्यायम् अभिप्रायः - काव्ये प्रयुक्तैः शब्दैः शकुन्तलादयोऽर्थाः प्रथमम् अभिधाव्यापारेण शकुन्तलात्वाद्यसाधारणधर्मवत्त्वेन उपस्थाप्यन्ते । उपस्थापिताश्चार्थाः यद्यपि दुष्यन्तादिमात्रसम्बन्धित्वात् असाधारणाः तथापि काव्यार्थानुसन्धानधारारूपेण द्वितीयेन भावकत्वव्यापारेणते सर्वेऽप्यर्थाः स्त्रीत्वादिरूपसाधारणधर्मवत्त्वेन प्रतिभासन्ते । तदेवं शकुन्तलाचन्द्रोद्यानदेशकालादिषु साधारणीभूतेषु पश्चादाविर्भूतेन भोजकत्वव्यापारेण सत्त्वोद्रेकप्रकाशानन्दमयनिजसंविद्विश्रान्तिरूपः तादृशो भोगो भवति यस्मिन् विषयीभूतो रत्यादी रस इत्युच्यते ।

भोगश्चास्य मतेन संविदो विश्रान्तिः । संविच्च चित्तम् । सा च विश्रान्तिः सत्त्वस्योद्रेके सति सम्भवतीति ज्ञानानन्दमयी । तत्र विषयीभूतो रत्यादी रस इति अस्य तात्पर्यम् । सीतादेः साधारणतया प्रतीतिर्नाम चैत्रादि-यत्किञ्चित्पुरुषसम्बन्धिनः उपवनादेः सर्वजनसम्बन्धित्वेनेव प्रतीतिस्तथा । ततश्च तत्र यथा प्रवेशादयः क्रियाः सम्भवन्ति तथा अत्रापि मनसा गमनादयश्च क्रिया इति आलम्बनत्वस्य उपपत्तिः । निष्पत्तेः भुक्तिगर्भत्वात् अयं भुक्तिवाद इत्युच्यते ।

**इदमपि चिन्त्यम्, तथाहि -**

१. भावकत्वमिति व्यापारस्य शब्दगतत्वेन कल्पनं कुतः? सहृदयनिष्ठत्वात् । असाधारणत्वे सति कथं वा भावकत्वेन साधारणस्यार्थस्य प्रतीतिः । नहि वचनमात्रेण पदार्थस्य सिद्धिर्भवति ।
२. भोगस्य अर्थरूपत्वाभावात् कथं तद्विषयकव्यापारस्य शाब्दत्वम् ।
३. भोजकत्वव्यापारस्वीकारोऽपि भारायैव केवलम्, तन्मयीभवनलक्षणस्य भोगस्य वस्तुमाहात्म्यादेव साधनीयत्वात्।
४. साधारणीकरणे सत्यपि भयानकादौ कथं प्रवृत्तिः, दुःखजनकत्वात् ।

**४. नवीनानां मतम्**

रसगङ्गाधरे नव्यास्तु इति प्रतीकमादाय मतमिदं निरूपितम् । तत्र नव्यशब्देन केषां ग्रहणमिति न ज्ञायते । एते तु शकुन्तलादिनामर्थानां साधारणीकरणम् अनङ्गीकुर्वन्तः अभेदबुद्धिरिति मार्गान्तरेण तद्विषयकरत्यादिं सहृदया उपपादयन्ति । तेषामयमभिप्रायः -

रसस्य परगतत्वेन प्रतीतौ ताटस्थ्यापत्तिरिति स्वगतत्वेनैव प्रतीतिः समर्थनीया किन्तु सा सेद्धुं न शक्नोति शकुन्तलादीनाम् अनालम्बनत्वात् । ननु भावनया साधारणीकरणे तद्भवतीति चेत् - मैवम्, तया स्वात्मनि दुष्यन्तादीनाम् अभेदप्रतिपत्तेरेव समर्थनं वरम्, लाघवात् । साधारणीकरणे हि शकुन्तलादीनां बहूनामर्थानाम् साधारणत्वेन अर्थात् अयथात्वेन प्रतीतिः । अभेदस्वीकारे तु स्वात्मनि दुष्यन्तादिनायकाभेदमात्रस्य इति लाघवं स्फुटम् । कः खलु पुमान् विवेकी उपानद्धारणं विना गन्तव्ये सर्वत्रापि मार्गे चर्मप्रसारणं युक्तं मन्यते? तदेवम् अवगन्तव्यम् -

कविना नटेन च विभावादिषु प्रकाशितेषु प्रथमं व्यञ्जनाव्यापारेण दुष्यन्तादौ शकुन्तलादिविषयकरत्यादिः विज्ञायते । तदनु सहृदयताजन्यभावनायाः प्रभावेण सहृदयस्तावत् आत्मानं दुष्यन्तत्वेन विभावयति । अत एव भावनाया लोके गुणत्वेन परिगणिताया अपि मिथ्याभूतदुष्यन्तत्वप्रकारकज्ञानस्य जनकत्वात् दोषत्वम्, यथा - रङ्गे रजतत्वप्रकारकज्ञानजनकत्वात् लोके गुणत्वेन गणितस्यापि चाकचिक्यस्य । तदेवं स्वस्मिन् दुष्यन्तत्वप्रकारके ज्ञाने सिद्धे शकुन्तलाविषयकरत्यादेरपि सिद्धिः । तदित्थं सहृदयगतो रत्यादिः रसशब्देन व्यवह्रियते ॥

सहृदये शकुन्तलाविषयकरत्यादेः भ्रान्त्या उपपादनात् अयं भ्रान्तिवाद इत्युच्यते ।

वस्तुतस्तु चिन्त्यमेतत्, आत्मनि दुष्यन्तत्वप्रकारकबुद्धेः भ्रान्तिरूपत्वात् । न कोऽपि मनीषावान् आत्मनो भ्रान्त्यर्थं प्रवर्तते । किञ्च यद्यात्मनि दुष्यन्ताभेदभ्रान्तेः अङ्गीकारः तर्हि सहृदयः शकुन्तलादेः आलिङ्गनादौ प्रवर्तेत, करुणादौ रसे सहृदयस्य दुःखमेव जायेत, भयानकादौ च पलायनं विदधीत । भ्रान्तिरिति हेतोः न भवतीति चेत् - तर्हि लोकेऽपि रज्जुसर्पादेः भयाद्यनुत्पत्तिप्रसङ्गः । किञ्च अर्थानुसन्धानरूपाया अस्या भावनायाः यदि भ्रान्तिजनकत्वं स्वीक्रियते तर्हि न कोऽपि मतिमान् देवतादिध्याने समुत्सहेत ।

तस्मात् भ्रान्त्या सहृदये रत्यादेरुपपादनम् असङ्गतमेवेति बोध्यम् ।

**५. अभिनवगुप्तस्य मतम्**

काव्ये यावन्तोऽर्था निबध्यन्ते तेषां सर्वेषामपि रत्याद्यर्थेन कारणत्वेन कार्यत्वेन सहकारित्वेन वा सम्बन्धोऽवश्यं भवति अन्यथा तदुपादानस्य वैयर्थ्यापत्तिः । तदिदं कारणत्वादिकं लोकदृष्ट्या, काव्यदृष्ट्या तु क्रमेण तेषां विभावादित्वम् । एतेषां विभावादीनां ज्ञाने सति काव्यार्थानुसन्धानरूपाया भावनायाः प्रभावेण शकुन्तलादयः सर्वेऽपि पदार्थाः साधारणत्वेन प्रतीयन्ते । एवं शकुन्तलादिषु सर्वेष्वपि अर्थेषु साधारणीभूतेषु सहृदये तद्विषयो रत्यादिरभिव्यज्यते योऽयं रस इत्युच्यते ॥

यदा काव्यं दृश्यते तदा शब्दैः शकुन्तलादयोऽर्थाः यद्यपि असाधारणत्वेन प्रतीयन्ते तथापि भावनावशात् तेषां पश्चात् स्त्रीत्वादिरूपसाधारणधर्मवत्त्वेन प्रतीतिः । तदेवं दृष्टान्तेन विज्ञातुं शक्यते - उद्यानं किञ्चित् यदि यत्किञ्चिद्व्यक्तिसम्बन्धित्वेन प्रतीयते तर्हि अन्यस्य कस्यापि न तत्र प्रवेशः सम्भवति । अथ स्वसम्बन्धित्वेन तर्हि तत्र प्रवेशः सम्भवति,

गृहनिर्माणादिकमपि । अथ तदेव सर्वजनसम्बन्धित्वेन प्रतीयते तर्हि तत्र प्रवेशविहारादेः सम्भवेऽपि गृहनिर्माणादिकार्यं न सम्भवति । एतदेव हि नाम साधारणत्वम्, तदुक्तं विश्वनाथेन -

परस्य न परस्येति ममेति न ममेति च ।

तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥ सा.द. का-१२.

निष्पत्तिश्च सूत्रे यद्यपि रसस्योच्यते किन्तु रत्यादेः संस्कारात्मना चित्ते वर्तमानत्वात् तद्रूपस्य रसस्य सा न सम्भवति तथापि तदर्थकुक्षिगतरसनाया निष्पत्तिमादाय तस्मिन्नपि सा उपचर्यते, यथा - शिखायां ध्वस्तायां शिखी ध्वस्तः, शिखायां जातायां शिखी जात इत्यादौ ।

एतदपि न युक्तम्,तथाहि -

१. तथा साधारण्ये सति तत्र स्वभिन्नस्य दुष्यन्तादेः प्रवर्तनेन सहृदयस्य तस्यां प्रवृत्तेरसम्भवात् । अथ सम्भवतीत्युच्यते तर्हि सहृदयः विटादपि निकृष्ट इति वक्तव्यताप्रसङ्गः ।
२. असाधारणत्वेन गृहीतस्य शकुन्तलादेः कथङ्कारं तावत् भावनयापि साधारणत्वेन प्रतीतिः? नहि चन्दन इति प्रतीतौ सत्यां कस्यापि पश्चात् वृक्ष इत्येतावन्मात्रं ज्ञानं जायते ।
३. साधारणीकरणस्य शृङ्गारादावेव अपेक्षा, न तु भयानकादौ ।

**इदमत्र अवगन्तव्यम्** - यद्येवं तर्हि मार्गः कः? अहमेवं मन्ये, साधारणीभवनमेव युक्तो मार्गः किन्तु स अभिनवगुप्ताद्युक्तदिशा न शकुन्तलादेः प्रत्युत स्वस्यैवेति विशेषः, तथाहि -

काव्यं नाम विलक्षणं किञ्चिज्जगत् ।यदा शकुन्तलादीनां दर्शनं भवति तदा कविनिर्मितं किञ्चित् जगत् दृग्गोचरीभवति । श्रव्ये तु काव्ये गाथकेन वाच्यमाने तदुक्ताकारकं बुद्धाविति विशेषः ।

जगत्यस्मिन् कविनिर्मिते तावन्त एव पदार्थाः सन्ति यावन्तो भान्ति, ये सर्वेऽपि सार्थकाः, ये च सुखमात्रजनकाः । कथं तेषां सुखमात्रजनकत्वम्? - कविना सहृदयार्थं यत्नेन सर्जनात् । अत एवेदं ब्रह्मकृताज्जगतो विलक्षणम् ।

तदनु यथा यथा चित्तं रमते तथा तथा तन्मयीभवनं सम्भवति । सत्यस्मिन् तन्मयीभवने नास्माकं एतज्जगति स्थितः कोऽपि न भासते । स्यान्नाम समीपोपविष्टः अस्माकं

प्राणेभ्योऽपि गरीयान् । तथापि न तस्य प्रतीतिः किन्तु कविसृष्टे जगति वर्तमानानामेव केवलम् । अथ कस्यचित् पुरुषस्य कविसृष्टजगद्गतस्येव समीपोपविष्टस्यापि प्रतीतिः तर्हि तस्य तन्मयीभवनं न जातम्, नापि च तस्य रसास्वाद इति मन्तव्यम् । एतादृशे तन्मयीभवने सति स्वाधिष्ठानं जगदेव सहृदयस्य बुद्धिमार्गात् गलति, येन जगदन्तरं प्रति प्रवेशनम् अनिवार्यम् । प्रवेशनं तु रङ्गे यः स्वप्रकृत्यनुरोधी दुष्यन्तादिः तदभिन्नीभवनरूपेण मार्गेण । नहि तं मार्गं विना मार्गान्तरं नास्ति ।

नन्वेवं दुष्यन्ताद्यभेदबुद्धौ जातायां दुष्यन्तादेरिव सहृदयस्यापि आलिङ्गनादौ, व्याघ्रादिभीतस्येव पलायनादौ प्रवृत्तिः स्यात् - मैवम्, अभेदबुद्धेरत्र मनाग्विलक्षणत्वात् । न चात्राभेदो वृक्षपादपयोरिवात्यन्तम्, दृश्यदर्शकभावस्य जागरूकत्वात् । दुष्यन्तो हि दृश्यः सहृदयस्तावत् दर्शकः । किञ्च शकुन्तलया दुष्यन्तो विलोक्यमानोऽपि सहृदयो न विलोक्यते । नापि व्याघ्रादिना भीतपुरुषो विलोक्यमानोऽपि सहृदयो विलोक्यते । अत एवायं सहृदयः न शकुन्तलादेरालिङ्गने प्रवर्तते, नापि व्याघ्रादिदर्शनात् पलायने । एतेन अत्यन्तमभेदो नास्तीति पक्षो गलितः । नापि अत्यन्तं भेदः, दुष्यन्तादेरिव द्रष्टर्यपि शकुन्तलादिविषयकरत्युत्पत्तेः अन्यथोपपादयितुम् अशक्यत्वात् । एतेन अत्यन्तं भेद इत्यपि पक्षो गलितः ।

तदेवं विज्ञेयम् - यथा हि मुखं चन्द्र इत्यादौ मुखचन्द्रयोः सौन्दर्यादिना साधारणधर्मेण अभेदः, मुखत्वचन्द्रत्वाभ्याम् असाधारणधर्माभ्यां भेदः तथात्रापि दुष्यन्तसहृदययोः पुरुषत्वेन अभेदः, दुष्यन्तत्वसहृदयत्वाभ्यां च भेदः । यथा हि मुखे चन्द्राभेदप्रत्ययात् चन्द्रगतस्य नयनायनन्दकारित्वादिधर्मस्य प्रतीतिः, भेदस्य प्रत्ययात् चन्द्रं पश्येत्युक्तः चन्द्रमेव पश्यति न मुखम् । एवमिहापि अभेदस्य प्रत्ययात् दुष्यन्त इव अयमपि स्वासनस्थोऽपि शकुन्तलादौ रतिमान् वर्तते, भेदस्य प्रत्ययात् न शकुन्तलाद्यालिङ्गने प्रवृत्तिमान् भवति ।

न च भेदाभेदयोः विरुद्धत्वात् कथं तयोर्युगपदनुभवः? - पुरुषत्वादिना व्यापकधर्मेण अभेदः, दुष्यन्तत्वसहृदयत्वाभ्यां व्याप्यधर्माभ्यां तु भेद इति विषयभेदस्य सत्त्वेन अदोषात् । नहि विषयभेदे सति विरुद्धयोः द्वयोर्धर्मयोः समावेशो विरुध्यते । अत एव कश्चिद्राजा शत्रुं प्रति क्रूरोऽपि मित्रं प्रति स्निग्धो भवितुं शक्नोति । तदेवं दुष्यन्तादीनां सर्वेषामपि

साधारणत्वकल्पनापेक्षया स्वस्मिन् दुष्यन्तत्वादिकल्पनमेव लाघवम् । नन्वत्र अभेदकल्पनमेव भारायते इति वाच्यम्, साधारणीकरणपक्षेऽपि दुष्यन्तादिना अभेदस्य सहृदयेऽपि कल्पनीयत्वात् न गौरवम् ।

**अत्रेदं बोध्यम्** - ब्रह्मा किमर्थमत्र सुरासुरैः प्रार्थित एतादृशं क्रीडनीयकं निर्माय ददौ? क्रीडनीयकान्तरस्यापि सुदानत्वात् - उच्यते, यथास्मिन् रङ्गे कविसृष्टं जगत् भासते तत्केवलं प्रतीतिसमकालम् । यदा च रूपकस्य समाप्तिः तदा न तज्जगत् किन्तु रङ्गमात्रम् । एवं यदिदं मत्सृष्टं जगद्वर्तते तत्केवलं तदाभिमुख्ये सत्येव । यदा तु वैमुख्यं तदा तन्न भवति कितु केवलं ब्रह्म । तदेतत् "ब्रह्म सत्यम्, जगन्मिथ्ये"ति जानन्तु इति बोधनार्थमेव ब्रह्मा रूपकमिति क्रीडनीयकं निर्माय ददौ । एतेन रूपकं नाम जाग्रदवस्थागतः कश्चित् स्वप्न इति बोध्यम् । यथा स्वप्ने समाप्ते सर्वं मिथ्येति बुद्धिः तथात्रापि रूपके समाप्ते तथाविधैव बुद्धिः ।

यद्यप्यत्र वक्तव्यं बहु, बहूनां बहुधा प्रश्नस्य सम्भवात् तथापि विस्तरभयात् समासेन किञ्चिन्निरूपितमिति दिक् ॥

# रीतिविमर्शः

डा. राघवेन्द्रभट्टः
सहाचार्यः, साहित्यविभागाध्यक्षः

शब्दार्थयुगलं तावत् काव्यम् । तल्लक्षणे विशेषणांशे महत्यां विप्रतिपत्तौ सत्यामपि शब्दार्थयुगलं विशेष्यमित्यत्र प्रायेण समेषां समानैव मतिः । तथाविधे काव्ये सारभूतत्वेन कस्तावदर्थः आत्मा भवितुमर्हतीति प्रश्ने तत्र महान् मतभेदो जागर्ति । तत्र भरतादयो रसं काव्यस्यात्मानं वदन्ति। भामहादयोऽलङ्कारम्। आनन्दवर्धनः प्रधानव्यङ्ग्यापरपर्यायं ध्वनिम् । कुन्तको वक्रोक्तिम् । क्षेमेन्द्र औचित्यम् । वामनस्तु रीतम् । तानीमानि षट् प्रस्थानानि इत्यभिधीयन्ते, सम्प्रदाया इति वा ।

तेषु रीतिर्नाम का? तस्याश्च कति प्रभेदा इति चेत् - उच्यते, 'रीङ् गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते' इति। भोजराजस्य वचनात् रीङ्धातोः रीणन्ति गच्छन्ति गुणा एनामिति कर्मणि क्तिनि रीतिशब्दस्य निष्पत्तिः, गुणवान् पदविन्यास इत्यर्थः । माधुर्यादयश्च गुणाः शब्दार्थनिष्ठा इति ये वदन्ति तेषां वामनादीनां मतेन समवायेन अभेदेन वा तद्वान् पदविन्यासः रीतिरभिधीयते। ये तु गुणा रसनिष्ठा इति वदन्ति तेषां मम्मटानन्दवर्धनादीनां नवीनानां मतेन तदभिव्यञ्जकः पदविन्यासः वृत्तिरिति विशेषः । तदा तु रीयते व्यज्यते रसिनष्ठो गुणोऽनयेति करणे इति मन्तव्यम् । अयं च पदविन्यासः वामनेन रीतिशब्देन व्यवह्रियते, दण्ड्यादिभिः मार्गशब्देन, आनन्दवर्दनेन सङ्घटनाशब्देन मम्मटादिभिश्च वृत्तिशब्देन । शैलीत यावत् । पदविन्यासश्च वर्गीयपञ्चमादिवर्णघटितत्वात् कोमलः, षकारटवर्गादिरूक्षवर्णघटितत्वात् कठोरः, अकोमलकठोररूपरेफधकारादिवर्णघटितत्वात् मध्यमश्च। एवमयं त्रिविधः। यत्र तु कोमलत्वादिर्नानुभूयते किन्तु व्यामिश्रणं तत्र स्वैरेण पदानि सुप्रयोज्यानि भवन्ति, यथा- व्यावहारिकवाक्येषु । अयं चानुपदोक्तः पदविन्यासः रीतिरिति नोच्यते, नापि चात्र विम्रष्टव्यो भवति, गुणसम्बन्धाभावात् ।

सर्वोऽप्यर्थः कोमलैः पदैर्यथा प्रतिपादियतुं शक्यते तथा कठोरैः मध्यमैश्च। कोमलैर्यथा - अमन्दस्यानन्दसन्दोहस्य सन्दायिनी ते अपाङ्गपङ्क्तिः इत्यादौ। कठोरैर्यथा –

अक्षुण्णप्रीतिप्रकर्षप्रदात्री त्वत्कटाक्षश्रीः इत्यादौ । मध्यमैर्यथा - जलं अनल्पप्रमोदं करोतु त्वदीक्षा इत्यादौ । एवंविधानामेव पदविन्यासानां क्रमेण वैदर्भी, गौडीया, पाञ्चालीति शब्देन व्यवहारः । लक्षणमपि तत्तत्सिद्धान्तभेदेन मनागिव भिद्यते - वामनस्य मतेन रीतिर्नाम गुणवान् पदविन्यासः । गुणाश्च शब्दार्थगता इति पदविन्यासः समवायेन तद्वान् । गुणाश्च तदुक्ताः श्लेषादयः शब्दगता दश, अर्थगताश्च तन्नामान एव दशेति विंशतिः, नामानि यथा -

श्लेषः प्रसादः समता सौकुमार्यमुदारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥

एषां नामानि समानान्यपि लक्षणानि भिद्यन्ते । रीतिश्चेयं वैदर्भी गौडीया पाञ्चाली चेति त्रिविधा। तत्र वैदर्भी समग्रगुणा । गौडीया ओजःकान्तिमती। पाञ्चाली माधुर्यसौकुमार्योपपन्ना। एतासु पूर्वाग्राह्येति तदाशयः। विदर्भादिदेशगतैः कविभिः यथास्वरूपं दर्शनात् तत्तत्पदेन प्रभेदानां व्यवहारः, न तत्तद्देशमात्रोपलब्धत्वेन। गुणानां सारभूतत्वात् दीप्तरसत्वं कान्तिरित्यादिना रसस्यापि गुणत्वात् तद्वतः पदविन्यासस्य आत्मस्थानीयत्वमिति तदभिप्रायः।

वस्तुतस्तु रीतेरात्मत्वमिति यन्मतम् तन्न साम्प्रतम्, मनुष्यत्वेन कल्पिते काव्ये तस्य अवयवसंस्थानतुल्यत्वात्, तत्प्रभेदेषु वैदर्भ्यादिषु तारतम्यस्य अभ्युपगमाच्च । नहि तारतम्यापन्नप्रभेदः कश्चिदर्थ आत्माभवितुमर्हति, सारभूतत्वस्य व्याहतत्वात् । अन्यच्च, तारतम्यस्य कल्पनमपि असङ्गतम्, निकृष्टत्वेन परिगणिताया अपि गौडीयाया रौद्रादौ रसे अत्यन्तानुकूलत्वेनानुभवात् । अन्यदपि, विन्यासस्य शब्दधर्मत्वेन शब्दस्य च शरीरस्थानीयत्वेन कथं तावत् तन्निष्ठस्य धर्मस्यात्मत्वम्? नहि शरीरधर्मस्य आत्प्मत्वं मन्दमतिरपि व्याहरति । तद्रीतेरात्मत्वं न विचारसहम् । अन्यच्च, समग्रगुणेति लक्षणमपि वैदर्भ्या न युक्तम्, ओजःप्रसादादीनां समतासमाध्यादीनां विरुद्धत्वेन युगपदेव अवस्थानस्य असम्भवात्।

ध्वनिकारस्य मतेनापि पदविन्यासस्यैव रीतत्वम्, न केवलस्य किन्तु रसाभिव्यञ्जकस्य । एतच्च 'गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा' इति तदीयवचनस्य परिशीलनेन विज्ञातुं शक्यते । सङ्घटनेयं माधुर्यादीन् गुणानाश्रित्य वर्तमाना रसं व्यनक्ति इति

अस्यार्थः । पदविन्यासेन रसानामभिव्यञ्जनं तु तन्निष्ठमाधुर्यादिगुणाभिव्यञ्जनद्वारेति हेतोः गुणाभिव्यञ्जकः पदविन्यासः रीतिरित्यभिधानमपि न दोषाय। एवं वामनस्य मते

गुणरीत्योः अभेदः, इह तु आश्रयाश्रयिभावेनसूचतो नियम्यनियामकभावः । तत्र रीतेर्नियम्यत्वंगुणस्य तु नियामकत्वमिति बोध्यम् । तदेवं माधुर्यादिगुणेन नित्यम्यमाना रीतिः तत्तद्रसं व्यनक्ति इति तदर्थः पर्यवस्यति । माधुर्यादिगुणेन नियमनं नाम समासरूपस्य व्यञ्जकत्वस्य समानत्वात् स्वस्थले असमासादेः प्रभेदस्य उपस्थापनम् । तेन यत्र माधुर्यं तत्र तदनुरूपा असमासेति प्रभेदो भवति, यत्र ओजः तत्र तदनुरूपा दीर्घसमासेत्यादिकं स्पष्टमेव ।

मतेनास्य रीतिकुक्षौ समासमात्रस्य प्रवेशः, न तु वर्णस्यापि। यद्यपि वर्णस्य रसाभिव्यञ्जकत्वमस्ति, तस्मादस्याः कुक्षौ समासेन सह तस्यापि प्रवेशः स्थाने तथापि तस्य पार्थक्येन रसाभिव्यञ्जकत्वमनेन स्वीकृतम्, यदाह -

यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।
वाक्ये सङ्घटनायां च स प्रबन्धेऽपि दीप्यते ॥

कारणं तु प्रथमं वर्णाः, ततस्तेषां समूहः पदम्, ततस्तेषां समूहः वाक्यम्, ततस्तेषां समूहः प्रबन्ध इति सोपानक्रमेणोपस्थितिः । तत्र प्रथमं वर्णाः उपस्थिता इति तेषां रसाभिव्यञ्जकत्वम् प्रतिपादितम् । ततः पदस्य । ततो वाक्यस्य । ततस्तु तद्गतस्य पदविन्यासस्य । वर्णानां च रसाभिव्यञ्जकत्वं पूर्वमुक्तमिति समाससद्भावासद्भावौ अवलम्ब्य पदविन्यासरूपायाः सङ्घटनायाः भेदनम् । अर्वाचीना मम्मटादयस्तु तत्कारणस्य तुच्छत्वात् सङ्घटनाकुक्षौ वर्णस्यापि प्रवेशमिच्छन्तीति विशेषः ।

वस्तुतस्तु पदविन्यासरूपाया रीतेः रसाभिव्यञ्जकत्वं पृथक् न वक्तव्यम्, वाक्यस्य व्यञ्जकत्वाभिधानेनैव गतार्थत्वात्, तथाहि - वाक्यं हि रसस्य व्यञ्जकं तत्समुदायस्य प्रबन्धस्य वा, विभावाद्यर्थर्थप्रतिपादने समर्थत्वात्, पदविन्यासरूपरीतिशालित्वस्य सम्भवात् । नहि वर्णाः पदं सङ्घटना वा रसमभिव्यङ्क्तुं शक्नुवन्ति, अनर्थकत्वात्, असङ्घटनाशालित्वाच्च । नहि सर्वविधं वाक्यं रसस्य व्यञ्जकं भवितुं शक्नोति । नह्युद्याने सुन्दरा वृक्षाः सन्ति, वानरा वृक्षे उपविष्टाः सन्ति, बालकाः अङ्गणे क्रीडन्तीत्यादिकं वाक्यं रसाभिव्यञ्जकम् । कीदृशं तर्हि? यत्प्रतिपादितस्यार्थस्य

विभावादिरूपत्वं वर्तते, यत्र च पदानां कोमलादिरूपत्वात् रीतिशालित्वम्। एतेन वाक्यस्य प्रबन्धस्य वा विभावाद्यर्थप्रतिपादकत्वे सङ्घटनाशालित्वे च सत्येव रसाभिव्यञ्जकत्वमिति सिद्धौ किं कारणं पुनः पार्थक्येन सङ्घटनायां रसाभिव्यञ्जकत्वस्य उपपादनम्

ननु यदि वस्तुगत्या वाक्य एव रसाभिव्यञ्जकत्वं तर्हि वर्णेषु पदे च तदुक्तं कथं घटते?

अन्वयव्यतिरेकाभ्यां प्राधान्यात्, उक्तं हि-

एकावयवसंस्थेन भूषणेनेव कामनी ।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ॥ इति ॥

पदविन्यासरूपेयं रीतिः असमासा मध्यमसमासा दीर्घसमासा चेति त्रिविधा, यदुक्तम्-

असमासा समासेन मध्यमेन विभूषिता ।
तथा दीर्घसमासेति त्रिधा सङ्घटनोदिता ॥

अत्रासमासेत्यत्र नञ ईषदर्थकत्वस्यापि विविक्षतत्वात् ईषत्समासेति प्रभेदस्यापि असमासाख्ये प्रथम एव प्रभेदेऽन्तर्भावः ।

एवं चानेन समप्राधान्येन निरूपितस्य असमासेत्यादिप्रभेदत्रयस्य कुत्र कुत्र विनियोगः? किं सर्वत्रापि सर्वोऽपि प्रभेदो ग्राह्यो भवति?इति प्रश्ने- इदमुत्तरम्, पूर्वं हि द्वितीयोद्योतेऽनेन शृङ्गारादौ चित्तद्रुतिजनकतारूपं माधुर्यम्, रौद्रादौ चित्तदीप्तिजनकतारूपम् ओजः, श्रवणसमकाल एव अर्थसमर्पकत्वमिति यस्य रूपं स प्रसादो रसमात्रे इति गुणत्रयं निर्णीतम्। तदनुसारेण माधुर्यवशात् शृङ्गारादौ असमासा, ओजोवशात् रौद्रादौ दीर्घसमासा, रसादिवशाच्च सर्वेष्वपि रसेषु असमासादिकं प्रभेदत्रयमिति सुनिश्चयमिति गुणेन सङ्गटनाया नियमनमित्येतत् उपपद्यते ।

मम्मटस्य मतेन वृत्तिर्नाम गुणाभिव्यञ्जकः पदविन्यासः । तच्चानेन विज्ञायते -

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ।
ओजःप्रकाशकैर्वर्णैः परुषा कोमला परैः ॥
केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः ।

अत्र माधुर्यव्यञ्जकैर्वर्णैर्त्यादिवचनात् पदविन्यासे गुणाभिव्यञ्जकत्वं सिध्यति, 'केषाञ्चिदेषांवैदर्भीप्रमुखा रीतयो मताः' इत्यभिधानात् वामनादिमतान्तरे

पदानां विन्यासस्य रीतित्वेनाभ्युपगमात् विन्यासस्य च पदीयत्वम्। तत्र माधुर्यव्यञ्जकः पदविन्यास उपनागरिका (वैदर्भी), ओजोव्यञ्जकः परुषा (गौडीया), प्रसादव्यञ्जकश्च कोमलेति (ग्राम्या) प्रभेदानां लक्षणम।

दर्पणकारस्तु मम्मटाभिमतमेव स्वीकरोति, यदाह -

पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा ॥

इति वदन् रसोपकारकस्य पदविन्यासस्य रीतित्वम् उररीकरोति । रसोपकारकत्वं च तन्निष्ठगुणाभिव्यञ्जनेनेति गुणाभिव्यञ्जकः पदविन्यास इति लक्षणस्य विवरणमपि न दोषाय । अत एवोत्तरत्र,

माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥

इत्यादितत्प्रभेदलक्षणेषु माधुर्यव्यञ्जकैरित्यादेः पदस्य विनिवेशनम्।

अवृत्तिरल्पवृत्तिर्वेति अभिधानात् वामनादिमतवत् वैदर्भ्यां समासस्य असत्त्वम् ईषत्त्वं वा । वृत्तिरियं लाटिकया सह चतुष्प्रकारेति विशेषः।

कुन्तकस्तु रीतिप्रकाराणां नामकरणे वामनोक्तदिशा न तत्तद्देशदृष्टत्वं निमित्तम्, देशानामनन्तत्वेन निरवधिकभेदकल्पनाप्रसङ्गात्, तत्तद्भेदस्य देशान्तरेऽपि दर्शनेन व्यभिचारापाताच्च। तस्मात् कविस्वभावस्यात्र निमित्तत्वम्। तत्स्वभावस्य यदि कोमलत्वं तर्हि कोमलानामेव शब्दानां स्फुरणमिति सुकुमारो बन्धः, यदि गाढत्वं तर्हि कठोराणामेवेति विचित्रः, अथ सङ्करः तर्हि उभयविधानामिति मध्यम इति पदविन्यासस्य त्रैविध्यात् रीतेरपि त्रैविध्यमित्यभिधत्ते। एवं नैकभेदं मतम् ।

एवं च शब्दार्थयुगले काव्ये यो रसः तं प्रति व्यञ्जकत्वं शब्दानां रीतिमत्त्वेन, अर्थस्य तु विभावादिरूपत्वेन। यदि पुना रसं प्रति रीतिः प्रतिकूला, यथा- शृङ्गारादौ दीर्घसमासात्मिका गौडीया, रौद्रादौ च असमासात्मिका वैदर्भीत्यादिः तदा रीतिभङ्ग इति दोषः । अथार्थः प्रतिकूलः तदा परिपन्थिरसाङ्गविभावादिपरिग्रह इत्यादिर्दोषः।

**१.वैदर्भी** – तत्र वैदर्भी नाम टठडढान् विना कादयो मावसाना वर्णाः, असंयुक्तौ रणौ इत्यादिभिः चित्तद्रुतिव्यञ्जकैर्वर्णैः कृतः असमासः ईषत्समासो वा पदविन्यासः, यदुक्तं दर्पणे-

माधुर्यव्यञ्जकैर्वर्णैं रचना ललितात्मिका ।

अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥

इयं च शृङ्गारे करुणे च रसे भवति, यथा -

लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन्

समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।

मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्

रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ॥

अत्र पञ्चमाक्षरेण संयुक्ताः कादयो वर्णाः लकारतकारादयश्च वर्णाः सन्ति।

**२. गौडीया** - गौडीया नाम च्छत्थप्रभृतिः वर्गस्य आद्येन संयुक्तः तदन्तिमः द्धग्घप्रभृतिश्च तृतीयेन संयुक्तः तदन्तिमश्च वर्णाः, पूर्वेण परेण उभयतो वा रेफेण संयुक्तः र्कक्रद्रप्रभृतिः संयुक्तो वर्णः, टवर्गः, शषौ इत्यादिभिः चित्तदीप्तिव्यञ्जकैः वर्णैः कृतो दीर्घसमासः पदविन्यासः, यदुक्तं

दर्पणे -

ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ।

समासबहुला गौडी ॥

इयं च वीरे रौद्रे च रसे भवति, यथा -

चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।

स्त्यानावबद्धघनशोणितशोणपाणिरुत्तंसियष्यति कचांस्तव देवि! भीमः ॥

अत्र संयुक्ताः रेफभकारादयो वर्णाः सन्ति द्राघीयान् समासश्च ।

**३.पाञ्चाली** - पाञ्चाली नाम ओजोमाधुर्यव्यञ्जकव्यतिरिक्तवर्णैः कृतः समस्तपञ्चषपदश्च पदविन्यासः, यदुक्तं दर्पणे –

वर्णैः शेषैः पुनर्द्वयोः ॥

समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ॥

इयं च मध्यमत्वात् सर्वेषु रसेषु भवति, यथा -

मधुरया मधुबोधितमाधवीमधुसमृद्धसमेधितमधया ।

मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥

अत्र ओजोमाधुर्यव्यञ्जकेभ्यो व्यतिरिक्ताः मकारधकारादयः वर्णाः प्रयुक्ताः सन्ति ।

ननु शृङ्गारादौ वैदर्भी रीतिः, रौद्रादौ गौडीयेत्यादिकं यदस्ति तद्युज्यते किन्तु यत्र रस एव नास्ति तत्र का रीतिरिति चेत् - उच्यते, यदि रसस्य सर्वथैव अप्रतीतिः, अनुद्बुद्धतया वा प्रतीतिः तत्र वक्तृवाच्यप्रबन्धवैशिष्ट्यानुसारेण तन्निर्णयः। यत्रापि रसो वर्तते तत्रापि क्वचिद्रीतिव्यत्ययो भवति, तदुक्तं दर्पणे- क्वचित्तु वक्राद्यौचित्यादन्यथा रचनादयः॥ । इहत्येनादिशब्देन वाच्यप्रबन्धौ गृह्येते । तत्र वक्त्रौचित्याद्यथा – मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरिः

कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसङ्घट्टचण्डः

कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घतवातः

केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥

अत्र दुन्दुभिः केन ताडत इति वाच्यस्य सौम्यत्वेन वैदर्भ्याम्ब् अनुसरणीयायामपि वक्ता भीमसेन इति हेतोः गौडीया रीतिः। वाच्यौचित्याद्यथा-

मूर्धव्याधूयमानध्वनदमरधुनीलोलकल्लोलजालो-

द्भूताम्भःक्षोददम्भात् प्रसभमभिनभःक्षिप्तनक्षत्रलक्षम् ।

ऊर्ध्वन्यस्ताङ्घ्रिदण्डभ्रमिभररभसोद्यन्नभस्वत्प्रवेग-

भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शिवं शाम्भवं ताण्डवं वः ॥

अत्र शिवविषयकभक्तिरिति वैदर्भ्याम् अनुसरणीयायामपि ताण्डवं वाच्यमिति तदनुसारेण गौडीया । प्रबन्धौचित्याद्यथा -

यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनां

यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।

यो यः तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः

क्रोधान्धस्तस्य तस्य जगतामन्तकस्यान्तकोऽहम् ॥

अत्र रौद्ररसस्याभिव्यञ्जनमिति गौडीयायाम् अनुसरणीयायामपि प्रबन्धो रूपकमिति हेतोरभिनयप्रातिकूल्यशङ्कय तदनुसारेण वैदर्भ । एवमाख्यायिकायां शृङ्गारेऽपि गौडीयेत्यादिकं चिन्त्यम्।

क्वचित्तु अन्यस्मिन् रीतिप्रभेदे उपादेयेऽपि अन्यस्य उपादानात् यद्यपि दोषः तथापि प्रतिभावशात् अर्थरूपव्यञ्जकान्तरस्य साधुतरं विभावादिरूपत्वेन निबन्धनात् दोषत्वेन स्फुरति, यथा - शून्यं वासगृहं विलोक्येत्यादौ । तदुक्तमानन्दवर्धनेन यथा -

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतस्तस्य झटित्येवावभासते ॥

व्युत्पत्त्यभावजन्यो दोषः प्रतिभयाच्छाद्यते ।

प्रतिभाविरहजन्यस्तु सपद्येव भासत इत्यस्य अर्थः । तस्मात् प्रतिभावान् कविः यथौचित्यं काव्ये रीतिमनुसरेत् इति सिद्ध्यति।

*****

# शान्तरसः

**डा. चन्द्रकला आर्. कोण्डी**
सहायकाचार्या, साहित्यविभागः

यद्यपि कविभारती नवरसरुचिरेत्याह वाग्देवतावतारो मम्मटाचार्यस्तथापि रसस्याष्टत्वप्रतिपादका अपि केचन सन्त्येव । तेषु धनिकधनञ्जयौ प्रमुखौ । शान्तस्य शमस्थायित्वात्, शमस्य चाभिनयायोग्यत्वात् काव्यनाट्येषु शान्तरसः नाङ्गीकार्य इति तेषामभिप्रायः। किन्तु भरतमुनिः नाट्यशास्त्रे षष्ठेऽध्याये (रसाध्याये) यद्यपि एकत्र

श‍ृङ्गारहास्यकरुणवीररौद्रभयानकाः।
बीभत्साद्भुतसञ्ज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ [१]

इत्याह, तथापि अध्यायस्यान्ते शान्तरसमपि स्थायिसहितं प्रतिपाद्य, 'एवं नवरसाः दृष्टा नाट्यज्ञैर्लक्षणान्विताः' इत्युक्त्वा तं रसत्वेन स्वीकृतवान् । मम्मटादयोऽपि शान्तरसमङ्गीकुर्वन्ति । शान्तरसविषये वर्तमानान् सर्वानपि विवादान् समाधाय, 'नव नाट्ये रसाः स्मृता' इत्येतदाधारीकृत्य 'मुनिवचनमत्र प्रमाणम्' इति वदन् पण्डितराजः शान्तरसस्यास्वाद्यत्वं समर्थयति । भरतेन शान्तरस एवमुक्तः-

'तत्र शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः । स तु तत्त्वज्ञान-वैराग्य-आशयशुद्धादिभिर्विभावैः समुत्पद्यते । तस्य यम-नियम-अध्यात्म-ध्यान-धारणा-उपासन-सर्वभूतदया-लिङ्गसङ्ग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचारिणश्चास्य निर्वेद-स्मृति-धृति-सर्वाश्रमशौच-स्तम्भ-रोमाञ्चादयः' [२] इति विव्रीय स रसोऽवश्यं सम्भवतीति निर्णयात्मकतया प्रत्यपादयत्-

मोक्षाध्यात्मसमुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्तः ।
नैःश्रेयसोपदिष्टः शान्तरसो नाम सम्भवति ॥ [३]
बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेतः ।
सर्वप्राणिसुखहितः शान्तरसो नाम विज्ञेयः ॥
न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः ।

---

[१] नाट्यशास्त्रम्-६/१६
[२] नाट्यशास्त्रम्-६/१०६
[३] नाट्यशास्त्रम्-६/१०७, १०८, १०९, ११०, १११.

समः सर्वेषु भूतेषु स शान्तः प्रतिथो रसः ॥
भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः ।
विकाराः प्रकृतेर्जातः पुनस्तत्रैव लीयते ॥
स्वं स्वं निमित्तमासाद्य शान्ताद् भावः प्रवर्तते ।
पुनर्निमित्तापाये च शान्त एवोपलीयते ॥

एवं शान्तरसः अस्तीति प्रतिपाद्य स एव रसः सर्वेषां रसानामाधारभूतः इत्यपि प्रतिपादितं भरतमुनिना ।

जगन्नाथपण्डितराजः पूर्वपक्ष-सिद्धान्तयोर्द्वारा शान्तरसं समर्थयति -

**पूर्वपक्षः**-नाट्ये शान्तरसस्याङ्गीकारोऽनुचित एव । शान्तस्य शमसाध्यत्वात्, नटे च शमस्यासम्भवात् ।

**सिद्धान्तः**-एष हेतुः शान्तरसनिराकरणे हेतुर्न भवति । यतोऽस्माभिः नटे रसाभिव्यक्तिर्नाङ्गीकृता । नटे शमो भवतु न वा, तस्याभिनयेन सहृदयानां हृदि स रसत्वं प्राप्नोति ।

यदि नटे शमाभावात् तस्य (शमस्य) अभिनयप्रकाशकत्वमनुपपन्नमिति हेतुना भवद्भिः शान्तरसो निराक्रियते तर्हि सर्वेऽपि रसा निराकृता एव। यतः नटे रति-भय-क्रोधादयोऽपि न भवन्तीति तेषामपि अभिनयप्रकाशता न भवति । तर्हि तेषामप्यसङ्गतिः सिध्यति खलु ?

**पूर्वपक्षः**-नटे वास्तवस्य क्रोधादेरभावात् वास्तवानि क्रोधादिकार्याणि शत्रूणां वधबन्धप्रभृतीनि नोत्पाद्यन्ते इति तु सत्यम्, किन्त्ववास्तवक्रोधादीनां सत्त्वात् अवास्तवानि तत्कार्याणि गर्जन-तर्जनादीनि शिक्षाभ्यासादिबलात् उत्पद्यन्त एव ।

**सिद्धान्तः**-तत्तु प्रकृतेऽपि अर्थात् शान्तरसविषयेऽपि समानमेव । नटे वास्तवशमाभावेन वास्तवशमकार्याणां सकलतृष्णाविरामादीनामुत्पत्तेरभावेऽपि, कल्पितशमकार्याणामक्षिनिमीलनादीनां शिक्षाभ्यासादिबलात् बाधकवैधुर्यात् कथं न स्यात् ?

**पूर्वपक्षः**-गीतवद्यादीनि शमविरुद्धानि, यानि नाट्यस्या-विभाज्याङ्गानि । तेषु गीतवाद्यादिषु सत्सु, कथं सहृदयेऽपि शान्तरसोद्रेको भवेत् ? तस्य मनोऽपि विक्षिप्येत एव ।

**सिद्धान्तः**-यद्यपि गीतवाद्यादीनि नाट्येऽनिवार्यतया भवन्ति, तथापि रसानुरोधेन तानि भिद्यन्त एव । श्रृङ्गाररसानुकूलगीत-वाद्यान्यन्यानि, वीरादीनां त्वन्यदेव । तथैव

शान्तरसानुकूलगीत-वाद्यादीन्येव तत्प्रधाननाट्येषु प्रयुज्यन्त इति, तद्भावानुकूलानि गीतवाद्यादीनि शान्तरसोद्रेके विरोधीनि न भवन्ति ।

**पूर्वपक्षः**-तथापीदं तु सत्यं यत्, विषयचिन्तासामान्यमेव शान्तरसविरोधि । अर्थात् यस्य कस्यापि चिन्ता मनसि नास्ति चेदेव मनसः शान्तिः सिद्ध्यति । अतः शान्तरसानुकूलविषय इत्येतदे-वासङ्गतम् ।

**सिद्धान्तः**-तथा न । सर्वे विषया शान्तरसविरोधिनो न भवन्ति । लौकिकप्रवृत्तिजनका एव विषया तथा भवेयुः । भगवत्सम्बद्धविषयः, तत्त्वचिन्तनमित्यादि शान्तरसानुकूलान्येव भवन्ति । भवदुक्तरीत्या विषयचिन्तासामान्यस्यैव शमविरोधित्व-स्वीकारे शमालम्बनस्य संसारानित्यत्वस्य, तदुद्दीपनस्य पुराणश्रवण -सत्सङ्ग-पुण्यवन-तीर्थावलोकनादेरपि शमविषयत्वेन विरोधित्वमेव स्यात् । किन्तु तानि शान्तरसानुकूलानीत्यत्र अनुभव एव प्रमाणम् ।

सङ्गीतरत्नाकरग्रन्थस्य चरमाध्यायेऽपि शान्तरसः नाट्येऽस्त्येवेति स्पष्टतया व्यवस्थापितम् -

अष्टावेव रसा नाट्येष्विति केचिदचूचुदन् ।
तदचारु, यतः कञ्चिन्न रसं स्वदते नटः ॥

इति । एवं नाट्ये शान्तरसोऽस्तीति सिद्ध्यति । नाट्ये तत्सिद्धौ श्रव्यकाव्ये स्वयमेव सिद्ध्यति, नाट्ये तन्निराकरणार्थं प्रस्तुतानाम् अभिनयायोग्यत्वादिहेतूनां तत्राभावात् । अतः शान्तरसस्य विरोधिनः नाट्य एव तदभावं प्रतिपादयन्ति, न तु श्रव्यकाव्ये । तदेवं स्पष्टीकृतं जगन्नाथेन-

"यैरपि नाट्ये शान्तो रसो नास्तीत्यभ्युपगम्यते, तैरपि बाधकाभावात् महाभारतादिप्रबन्धानां शान्तरसप्रधानताया अखिल-लोकानुभवसिद्धत्वाच्च काव्ये सोऽवश्यं स्वीकार्यः ।"

इति । एवं काव्ये शान्तरससत्त्वादेव मम्मटाचार्यैरपि अष्टौ नाट्ये रसाः स्मृताः इति रसस्योपक्रमं विधाय शान्तोऽपि नवमो रस इत्युपसंहृतम् ।

ध्वन्यालोककारेण महाभारतस्य अङ्गीरसः शान्त एव इति समर्थयितुं शान्तरसविषये बहवो विषयाः प्रतिपादिताः । महाभारतस्य अङ्गीरसविचारं प्रतिपादयन् सः वदति यत्, **"महाभारतेऽपि शास्त्ररूपे काव्यच्छायान्वयिनि वृष्णिपाण्डवविरसावसानवैमनस्यदायिनीं समाप्तिमुपनिबध्नता महामुनिना वैराग्यजननतात्पर्यं**

**प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षणः पुरुषार्थः शान्तो रसश्च मुख्यतया विवक्षाविषयत्वेन सूचितः ।**

**यथा यथा विपर्यैति लोकतन्त्रमसारवत् ।**
**तथा तथा विरागोऽत्र जायते नात्र संशयः ॥**

**इत्यादि बहुशः कथयता । ततश्च शान्तो रसः रसान्तरैर्मोक्षलक्षणः पुरुषार्थः पुरुषार्थान्तरैः तदुपसर्जनत्वेन अनुगम्यमानोऽ~ङ्गित्वेन विवक्षाविषय इति महाभारततात्पर्यं सुव्यक्तमेवावभासते । अङ्गाङ्गिभावश्च यथा रसानां तथा प्रतिपादितमेव । पारमार्थिकान्तस्तत्त्वानपेक्षया शरीरस्येवाङ्गभूतस्य रसस्य पुरुषार्थस्य च स्वप्राधान्येन चारुत्वमप्यविरुद्धम् "**[१] इति । एवं न केवलं शान्तरसः अस्तीत्येव न, अपि तु सः इतररसवत् आस्वाद्य इत्यपि तेन निरूपितमस्ति ।

शान्तरसस्य एकमुदाहरनं पश्यामः । मम्मटाचार्येण शान्तरसस्य एतत्पद्यमुदाहरणत्वेन दत्तम्-

**अहौ वा हारे वा कुसुमशयने वा दृशदि वा**
**मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।**
**तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः**
**क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥** [२]

अत्र मिथ्यात्वेन परिभूयमानं जगत् आलम्बनविभावः । तपोवनाद्युद्दीपनविभावः । अहिहाराद्योः समदर्शनम् अनुभावः । मति-धृति-हर्षाः व्यभिचारिभावाः । निर्वेदः स्थायी । तज्ज्ञे सामाजिके शान्तरसः निष्पद्यते । एवं रीत्या विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरित्येतत् रससूत्रं शान्तरसेऽपि समन्वेति ।

काव्यस्य प्रयोजनेषु चतुर्वर्गफलप्राप्तिमपि अन्यतमं मन्यन्ते केचनालङ्कारिकाः भामह-विश्वनाथादयः । चतुर्वर्गे तु मोक्षोऽप्यन्तर्भवतीति तत्र शान्तरसः अनुभूयत एव । अपि च काव्येषु आश्रमवर्णनादिषु, **'स्वर्गादधिकतरं निर्वृतिस्थानम्'** [३] इत्यादिवाक्येषु शान्तरसः सहृदयानां मनः आनन्दयति ।

[१] ध्वन्यालोकः-चतुर्थोद्योतः, पञ्चमकारिकायाः वृत्तिभागः ।

[२] काव्यप्रकाशः, चतुर्थोल्लासः

[३] अभिज्ञानशाकुन्तलम्-सप्तमाङ्कः, मारीचाश्रममागतस्य दुष्यन्तस्य वचनम् ।

# रीतिविवेचनम्

**डा. कोम्पेल्लि विनयकुमारः**
सहायकाचार्यः, साहित्यविभागः

ऋग्वेदे मार्ग-धारा-गत्याद्यर्थेषु प्रयुक्तात् रीतिशब्दात् "**नाट्यशास्त्रे**" नानादेश-वेष-भाषा-आचाराद्यर्थे प्रयुक्तात् प्रवृत्ति[1]शब्दाच्च प्रेरणामादाय अचार्यैः "**अलङ्कारशास्त्रे**" मार्ग-प्रस्थान-रीत्यादयः शब्दाः व्यवहृताः। रीतिशब्दस्य पन्थाः पद्धतिः प्रणाली शैली मार्गः इत्यादयः शब्दाः पर्यायवाचिनः। अद्यत्वे शैली(style)शब्देन यदभिमतं तत् पुरा रीतिशब्देन अभिप्रेतम् आसीत्।

**रीतेः स्वरूपम्** - विशिष्टा भणितभङ्गी पदसङ्घटना वा, कविप्रतिभाजन्या व्युत्पत्तिलभ्या अभ्याससिद्धा वाच्यवाचकसौन्दर्येण लावण्याभिवर्धकेन औचित्येन च अनुप्राणिता गुणाश्रया, रसं भावं वा अभिव्यञ्जयन्ती रीतिरिति। विदग्धभणितिभङ्गीरूपेण इयं चकास्ति। रीतिः शब्दार्थोभयनिष्ठान् गुणान् धारयति। इयं न केवलं गुणालङ्कारादिभिरेव सम्बद्धा, अपि तु ध्वनि-वक्रोक्ति-औचित्य-रसादिभिरपि सङ्गता।

रीतिः न केवलं काव्यस्य शरीरं पुष्णाति, अपि तु रसादीनाम् उपकर्तृत्वात् शरीरिणम् आत्मानमपि पोषयति। काव्यविदः रीतिं चरमत्कृतिशब्देनापि अभिदधति। अभिनवगुप्तः चमत्कृतिं वक्रोक्तिं बन्धं गुम्फादिशब्दं च रीतेः पर्यायं मनुते।

काव्ये कीदृशः गुणः विद्यते चेत् मुहुर्मुहुः पठितुम् आसक्तिर्जायते इत्यस्मिन् विषये कतिपये सम्प्रदायाः सञ्जाताः। केचन रसम्, केचन, अलङ्कारम्, केचन रीतिम्, केचन ध्वनिम्, केचन वक्रोक्तिम्, केचन औचित्यं कव्यात्मरूपेण स्वीचक्रुः। भरतमुनेरारभ्य कालक्रमेण समीक्षाभेदे विभिन्नशताब्दिषु बहूनां सम्प्रदायानां जनिः सञ्जाता। साम्प्रतं तु प्रसिद्धिमुपगताः केवलं षड्सम्प्रदायाः।

**१. भरतमुनेः रससम्प्रदायः** **२.भामहोद्भटरुद्रटानाम् अलङ्कारसम्प्रदायः**

**३. वामनदण्डिनोः रीतिसम्प्रदायः** **४. कुन्तकस्य वक्रोक्तिसम्प्रदायः**

**५. आनन्दवर्धनाभिनवगुप्तयोः ध्वनिसम्प्रदायः** **६. क्षेमेन्द्रस्य औचित्यसम्प्रदायः**

[1] पृथिव्यां नानादेश-वेष-भाषा-आचार-वार्ताः ख्यापयन्तीति प्रवृत्तिः। नाट्यशास्त्रे १४, ३६ कारिकायाम्।

तत्र रीतिसम्प्रदायस्य प्रधानप्रवर्तकः **वामनाचार्यः "काव्यालङ्कारसूत्रवृत्तौ" "रीतिरात्मा काव्यस्य"** इति रीतिं काव्यात्मत्वेन साधयामास। तथा रीतेः स्वरूपप्रदर्शनप्रसङ्गे **"विशिष्टपदरचना रीतिः" "विशेषो गुणात्मा"**[1] इत्यपि प्रतिपादयामास। श्लेष-प्रसादादि-गुण-विशिष्टा पदरचना रीतिः इति तदर्थः। अर्थात् पदानां विशिष्टा रचना रीतिरिति कथ्यते। पदसङ्घटनानां वैशिष्ट्यं काव्यगुणेभ्यः आगच्छति। गुणाः एव रीतेः आधारभूताः। अत एव रीतिसम्प्रदायः गुणसम्प्रदायः इत्यपि कथ्यते। सरस्वतीकण्ठाभरणे श्रीभोजराजः रीतेः व्युत्पत्त्यात्मिकां परिभाषां निर्दिशति -

**वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः।**

**रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते**[2]।।इति।।

एवं निष्पन्नः रीतिशब्दः वैदर्भादिमार्गस्य बोधको भवति। अर्थात् विदर्भ-गौड-पाञ्चालादि-देशवासिभिः मनीषिभिः कविभिः प्रवर्तितः पन्था एव काव्ये मार्ग इत्युच्यते। सरस्वतीकण्ठाभरणटीकाकारः रामसिंहः विषयं विशदयन् आह – **"गुणवत्पदरचना रीतिः, गुणाः श्लेषादयः"**, रियन्ते परम्परया गच्छन्ति अनया इति करणसाधनोऽयं रीतिशब्दः मार्गपर्यायः इति। एतस्यैव च मार्गस्य वाचको रीतिशब्दः सङ्घटनादिशब्दश्च। तत्र भामह-दण्डि-कुन्तकप्रभृतिभिः आचार्यैः मार्गस्य, वामन-रुद्रट-मम्मटादिभिश्च रीतेः, तथा आनन्दवर्धन-विश्वनाथप्रभृतिभिः सङ्घटनायाः प्रयोगः कृतः। आचार्यः विद्याधरः – **'रसोचितशब्दार्थनिबन्धं रीतिः'** इति परिभाषते। सिङ्गभूपालः – **"पदविन्यासभङ्गी रीतिः"** इति रीतिं लक्षयति।

अस्याश्च रीतेः किं स्वरूपम् ? किं महत्त्वं काव्ये कीदृशं स्थानम् इत्यादिविविधविषयम् अवलम्ब्य, प्रारम्भादेव अलङ्कारशास्त्रे अनेकविधो विचारः समालोचकविचक्षणैः कृतः।

**चतुर्विधा प्रवृत्तिश्च प्रोक्ता नाट्यप्रयोगतः।**

**आवन्ती दाक्षिणात्या च पाञ्चाली चौड्रमागधी**[3]।।

---

[1] काव्यालङ्कारसूत्रवृत्तौ – १,२, ७-८

[2] सरस्वतीकण्ठाभरणे – २, ५१

[3] नाट्यशास्त्रे १४, ३६

इति भारतस्य विभिन्नभूभागमनुसरन्त्याः नानादेश-वेष-भाषा-आचारवार्तायाः प्रख्यापिकायाः भरतमुनेः प्रवृत्तेः प्रादुर्भूता मार्गादिशब्दैः व्यवह्रियमाणा रीतिः बाणभट्टस्य समये भौगोलिकसीमाभिरेव आबद्धासीत्। यतः –

**श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थगौरवम्।**

**उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बरः**[१]।।

इति श्लेषादिनिमित्तकेषु उदीच्य-प्रतीच्य-दाक्षिणात्य-गौडेषु मार्गेषु भौगोलिकाधार एव परिदृश्यते। परन्तु भामहाचार्येण वैदर्भगौडीयमार्गयोः प्रतिपादनं कुर्वता –

**ननु चाश्मकवंशादि वैदर्भमिति कथ्यते।**

**कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते**[२]।।

इत्येवंप्राकारेण मार्गस्य भूभाग-विशेष-सम्बन्धस्य असमीचीनता प्रकटिता। नाममात्रेण वैदर्भमार्गस्य ज्यायस्त्वं गौडमार्गस्य च हेयत्वं तन्मते गतानुगतिकन्यायादेव। यतः

**अलङ्कारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम्।**

**गौडीयमपि साधीयो वैदर्भमपि नान्यथा**[३]।।इति।।

अर्थात् अलङ्कारयुक्तः ग्राम्यत्वदोषरहितः, अर्थादनपेतः, न्यायसम्मतः जटिलतादिदोषरहितः सन् अनाकुलः गौडीयमार्गोऽपि तथैव साधीयान् यथा वैदर्भमार्गः। पूर्वोक्तगुणरहितः वैदर्भमार्गोऽपि न साधुः।

दण्डिना तु सत्स्वपि सूक्ष्मप्रभेदेषु गिराम् अनेकमार्गेषु सुस्पष्टभेदौ वैदर्भगौडीयमार्गौ एव स्वीकृतौ। तथा -

**श्लेषः प्रसादः समता माधुर्यं सकुमारता।**

**अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः।।**

**इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः।**

**एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि**[४]।।

---

[१] हर्षचरितस्य प्रारम्भे

[२] भामहकाव्यालङ्कारे १, ३३

[३] भामहकाव्यालङ्कारे १, ३५

[४] काव्यादर्शे १, ४१ - ४२

इत्येवंप्रकारेण प्राणस्वरूपेण श्लेषादि-दशविधगुणेन समन्वितस्य वैदर्भमार्गस्य ज्यायस्त्वं गुणरहितनिर्जीवस्य गौडमार्गस्य हेयत्वं च स्पष्टं प्रकटितम्।

रीतिशब्दस्य प्रथमप्रयोगं कुर्वता रीतेश्च काव्यात्मत्वं स्वीकुर्वता वामनाचार्येण काव्यशोभासम्पादकैः काव्यव्यवहारप्रवर्तकैर्वा श्लेषप्रसादादिगुणैः विशिष्टायाः पदरचनाया रीतित्वम् अङ्गीकृतम्। एषा च रीतिः काव्यस्य आत्मा। अत्र अयमाशयो वामनस्य - श्लेषादिगुणः काव्यशोभायाः सम्पादको नित्यधर्मः। यं गुणरूपं नित्यधर्मं विना गुणालङ्कारसंस्कृतशब्दार्थरूपस्य काव्यस्य सृष्टिरेव न भवतुमर्हति। एषां च नित्यधर्णाणां गुणानामभिव्यक्तिः रीतिद्वारा एव भवति, अतो रीतिरेव काव्ये सारभूततया काव्यास्यात्मा। अन्यच्च यथा रेखसु[1] चित्रं प्रतिष्ठितं रेखाया अभावे चित्रस्यैव सर्वथा अभावः, तथैव वैदर्भी-गौडी-पाञ्चाली इति त्रिविधासु रीतिषु काव्यं प्रतिष्ठितम्, रीतेश्च अनस्तित्वे काव्यस्यैव अनस्तित्वम्। अतः काव्यत्वसम्पादिकाया रीतिरेव आत्मत्वम्। अत एव च अस्या रीतेः महत्त्वम् अलङ्कारशास्त्रस्य आचार्यैः अन्यैश्च महाकविभिः प्रदर्शितम्।

रीतिद्वारैव काव्ये तुच्छमपि वस्तु सारभूतं सत् आनन्दप्रदं भवति, वितथमपि च वस्तु सत्यत्वं प्राप्नोति इत्येवंरूपेण वैदर्भीरीतेः महत्त्वं प्रदर्शयता वामनाचार्येण प्राचीनोक्तं समुद्धृतम् –

**किन्त्वस्ति काचिदपरैव पदानुपूर्वी**
**यस्यां न किञ्चिदपि किञ्चिदिवावभाति।**
**आनन्दयत्यथ च कर्णपथं प्रयाता**
**चेतः सताममृतवृष्टिरिव प्रयाता।।**
**वचसि समधिगम्य स्पन्दते वाचकश्रीः**
**वितथमवितथत्वं यत्र वस्तु प्रयाति।**
**उदयति हि तादृक् क्वापि वैदर्भरीतौ**
**सहृदयहृदयानां रञ्जकः कोऽपि पाकः[2]।।इति।।**

[1] एतासु तिसृषु रीतिषु रेखासु इव चित्रं काव्यं प्रतिष्ठितम्। काव्यालङ्कारसूत्रवृत्तौ १, २, १३

[2] काव्यालङ्कारसूत्रवृत्तौ १, २, २२

**रीतेरुपयोगिता** – नहि इतिवृत्तमात्रनिर्वाहेण कवेरात्मपदलाभः। चमत्कृतिं वैशिष्ट्यं रम्यत्वं च आसादयितुं रीतिरनिवार्या। भणितभङ्गी एव कवेः वैशिष्ट्यं साधयति। रीतिः कलात्मिक्याः प्रवृत्तेः मूलम्। किञ्चित् वैशिष्ट्यम् अनाश्रित्य न कवेः कवित्वपदलाभः। अतः रीतेः महत्त्वं प्रतिपादयता नीलकण्ठदीक्षितेनापि स्पष्टमुक्तम् –

**सत्यर्थे सत्सु शब्देषु सति चाक्षरडम्बरे।**
**शोभते यं विना नोक्तिः स पन्था इति घुष्यते**[१]।।इति।।

रमणीयाभिव्यक्तिः काव्यम्। रमणीयत्वं च काव्ये चमत्कृतिम् आदधाति। रमणीयत्वस्य मूलं च रीतिः। रीतेरुद्देश्यम् अस्ति – सौन्दर्यस्य सृष्टिः, रसानुगुणं पदसंयोजनम्।

**महाकविमाघस्य** –

**म्रदीयसीमपि घनामनल्पगुणकल्पिताम्।**
**प्रसारयन्ति चतुराश्चित्रां वाचं पटीमिव**[२]।।

इत्युक्तौ रीतेरेव महत्त्वं प्रतिपादितं वर्तते। पद्मगुप्त-भर्तृमेण्ठ-नीलकण्ठ-राजशेखर-श्रीहर्षप्रभृतिभिः महाकविभिः रीतेः महत्त्वम्, विशेषतः वैदर्भीरीतेः महत्त्वं मुक्तकण्ठं समुद्घोषितम्[३]। सा च रीतिः आचार्यवामनमते वैदर्भी गौडी पाञ्चाली च इति त्रिविधा। एतासु **"समग्रगुणोपेता वैदर्भी"** तु -

**अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता।**
**विपञ्चीस्वरसौभाग्या वैदर्भीरीतिरिष्यते**[४]।।

इत्युक्त्या श्लेषादिसमग्रगुणैर्युक्ता भवति। अन्ये च कवयो वैदर्भीमेवं स्तुवन्ति। यथा -

**सति वक्तरि सत्यर्थे सति शब्दानुशासने।**
**अस्ति तन्न विना येन परिस्रवति वाङ्मधु**।।इति।।

वैदर्भीरीतेः महत्त्वं यथा शब्दार्थादिवैशिष्ट्ये सत्यपि वैदर्भीरीतिं विना न वाङ्मधु स्रवति, न च रम्यत्वं जायते।

---

[१] नलचरिते १, १०

[२] शशुपालवधे २, ६४

[३] द्रष्टव्या 'काव्यस्य मीमांसा' – पृ १६४ – ५

[४] काव्यालङ्कारसूत्रवृत्तौ

रुद्रटः श्रृङ्गारकरुणरसयोः वैदर्भ्याः प्रयोगं शंसति। राजशेखरः विदर्भप्रान्ते काव्यपुरुषस्य साहित्यवध्वाश्च गान्धर्वविवाहमुल्लिख्य वैदर्भीरीत्याः सर्वोत्कृष्टत्वं साधयति। विश्वनाथस्तु वैदर्भीरीतिलक्षणम् इत्थं निर्दिशति –

**माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका।**

**अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते**[१]।।इति।।

कालिदासः वैदर्भीरीत्याः सर्वमान्यः सर्वश्रेष्ठश्च कविः। तस्य काव्ये वाङ्मधु क्षरति। तथा तस्य काव्ये माधुर्यं सहृदयाह्लादकत्वं च यथा सर्वैरपि '**कविः कालिदासः**' इति स स्तूयते। तस्य वचोमाधुर्यं दिङ्मात्रम् उदाह्रियते। **सरसिजमनुविद्धं शैवलेनापि रम्यं**

**मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।**

**इयमधिकमनोज्ञा वल्कलेनापि तन्वी**

**किमिव हि मधुराणां मण्डनं नाकृतीनाम्**[२]।।

**गाहन्तां महिषा निपानसलिलं श्रृङ्गैर्मुहुस्ताडितं**

**छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।**

**विश्रब्धं कुरुतां वराहततिभिर्मुस्ताक्षतिः पल्वले**

**विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः**[३]।।

एवं समग्रगुणत्वात् ललितक्रमत्वाच्च वैदर्भी प्रेष्ठा।

"**ओजःकान्तिमती गौडीया**" रीतिस्तु –

**समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम्।**

**गौडीयामिति गायन्ति रीतिं रीतिविचक्षणाः।।**

इत्युक्त्या ओजःकान्तिगुणाभ्यां युक्ता गौडीरीतिरिति विचक्षणाः कथयन्ति। उदाहरणं यथा - **चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य।**

**स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि ! भीमः**।।इति।।

---

[१] साहित्यदर्पणः – ९ – २

[२] अभिज्ञानशाकुन्तलम् – १ – २०

[३] अभिज्ञानशाकुन्तलम् – २ – ६

पञ्चाली तु **"माधुर्य-सौकुमार्योपपन्ना पाञ्चाली"**– इत्युक्तेश्च माधुर्य-सौकुमार्य-गुणाभ्यां समुपेता भवति। किञ्च –

**आश्लिष्टश्लथभावां तां पुराणच्छाययाश्रिताम् ।**

**मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः[१]।।इति।।**

अर्थात् यत्र गाढत्वाभावः, समासबाहुल्याभावः, मधुरत्वं सुकुमारता च तत्र पाञ्चाली रीतिरिति।

उदाह्रियते यथा - **ग्रामेऽस्मिन् पथिकाय नैव वसतिः पान्थोऽधुना दीयते**

**रात्रावत्र विहारमण्डपतले पान्थः प्रसुप्तो युवा ।**

**तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत्कृतं**

**येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति।।इति।।**

एतासु तिसृषु रीतिषु वामनमते वैदर्भी एव गुणसाकल्यात् परमोपादेया भवति न पुनः इतरे स्तोकगुणत्वात्। **"विदर्भादिषु दृष्टत्वात् तत् समाख्या[२]"** **"न पुनः देशैः किञ्चिदुपक्रियते काव्यानाम्"** इत्यादिवामनोक्त्या तन्मतेऽपि देशविशेषेण सह रीतिविशेषस्य कोऽपि उपकार्योपकारकभावसम्बन्धो नास्ति।

आचार्यरुद्रटेन पदानां समस्तताम् असमस्ततां च आधारीकृत्य असमासेन वैदर्भी, द्वित्रिपदलघुसमासेन पाञ्चाली, पञ्च-सप्त-पद-मध्यम-समासेन लाटीया, बहुपददीर्घसमासेन च गौडीया रीतिः भवतीति प्रतिपादितम्। यथा –

**वृत्तेरसमासा या वैदर्भीरीतिरेकैव।**

**पाञ्चाली लाटीया गौडीया चेति नामतोऽभिहिताः।**

**लघु-मध्यायत-विरचन-समासभेदादिमास्तत्र।।**

**द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत्।**

**शब्दाः समासवन्तो भवति यथाशक्ति गौडीया[३]।।इति।।**

---

[१] काव्यालङ्कारसूत्रवृत्तौ

[२] द्रष्टव्या 'काव्यमीमांसा' पृ.सं १६४ – ५

[३] रुद्रटकाव्यालङ्कारे – १, ४ – ६

एतेन वामनस्य रीतित्रयमध्ये चतुर्थी लाटीया रीतिरङ्गीकृता तथा रसविशेषेण सह रीतिविशेषस्य नियतसम्बन्धः प्रदर्शितः। यथा –

**वैदर्भी-पाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः।**

**लाटीयागौडीये रौद्रे कुर्याद्यथौचित्यम्**[१]।।इति।।

अग्निपुराणेऽपि एता एव चतस्रो रीतयः प्रतिपादिताः सन्ति। एतासामाधारोऽपि उपचारेण सह समासः समासाभावो वा वर्तते।

**आनन्दवर्धनाचार्येण** रीतेः स्थाने सङ्घटनाशब्दं प्रयुञ्जानेन माधुर्यादीन् गुणान् आश्रित्य तिष्ठन्त्याः रसाभिव्यञ्जिकायाः सङ्घटनायाः त्रैविध्यं प्रदर्शितम्। यथा –

**असमासा समासेन मध्यमेन च भूषिता।**

**तथा दीर्घसमासेति त्रिधा सङ्घटनोदिता।।**

**गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा।**

**रसांस्तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः**[२]।।

एतस्याः सङ्घटनायाः नियामकञ्च वक्त्रौचित्यम्, वाच्यौचित्यम् , विषयौचित्म् , रसौचित्यं चेति। गुणसङ्घटनयोः परस्परसम्बन्धं प्रदर्शयता आनन्दवर्धनेनोक्तम् – "अत्र चैते विकल्पाः – गुणानां सङ्घटनायाश्च ऐक्यं व्यतिरेको वा। व्यतिरेकेऽपि द्वयी गतिः बोध्या – गुणाश्रया सङ्घटना, सङ्घटनाश्रया वा गुणा इति। तत्र ऐक्यपक्षे सङ्घटनाश्रयगुणपक्षे च गुणान् आत्मभूतान् आधेयभूतान् वा आश्रित्य तिष्ठन्ती सङ्घटना रसादीन् व्यनक्ति इत्ययमर्थः। यदि गुणाः सङ्घटना च इत्येकं तत्त्वं सङ्घटनाश्रया वा गुणास्तदा सङ्घटनाया इव गुणानाम् अनियतविषयत्वप्रसङ्गः। गुणानां माधुर्य-प्रसादप्रकर्षः करुण-विप्रलम्भश्रृङ्गारविषय एव। माधुर्य-प्रसादौ रस-भाव-तदाभासविषयौ एवेति विषयनियमो व्यवस्थितः। सङ्घटनायास्तु संविघटते। तथाहि – श्रृङ्गारेऽपि दीर्घसमासा दृश्यन्ते रौद्रादिषु असमासाश्चेति। तस्मात् अगुणाः सङ्घटनास्वरूपाः न च सङ्घटनाश्रया गुणाः"[३] इति। एतावता गुणाश्रया एव सङ्घटना इति सिद्धान्तः। **राजशेखरस्तु** –

[१] रुद्रटकाव्यालङ्कारे – १५, २०

[२] ध्वन्यालोके ३, ४ – ७

[३] तत्रैव -

**वैदर्भी गौडीया पाञ्चाली चेति रीतयस्तिस्त्रः।**

**आसु च साक्षान्निवसति सरस्वती तेन लक्ष्यन्ते**[१]।।

इत्येवंरूपेण त्रिविधाया रीतेः वर्णनमकार्षीत्।

**कुन्तकः** गुणानाश्रित्य त्रेधा रीतिं विभजते – सुकुमारः विचित्रो मध्यमश्च। यथा -

**सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।**

**सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः।।**इति।।

वक्रोक्तिसम्प्रदायप्रवर्तकेन कुन्तकेन सुकुमारमार्ग-विचित्रमार्ग-मध्यममार्गाणां प्रयोगं वैदर्भी-गौडी-पाञ्चालीनां स्थाने कुर्वाणेन रीतिविचारे नूतनविचारधारा प्रदर्शिता। कौमलैः असमस्तैः पदैश्च विन्यस्ते सुकुमारमार्गे माधुर्य-प्रसाद-लावण्याभिजात्यानां चतुर्णामसाधारणगुणानां तथा औचित्य-सौभाग्ययोः साधारणगुणयोः समावेशो भवति। रसादिपरमतत्त्वस्य विन्यासेन परमानन्ददायकः, अवयवसंस्थानरामणीयकेन मनोहरः, चारुत्वपूर्णतया अतिशयसौन्दर्ययुक्तः, प्रतिभानिष्पन्नविविधवैचित्र्यशाली च अयं सुकुमारमार्गः।

विचित्रमार्गे अलङ्काराधिक्येन अभ्यासान्तरगुणापेक्षया बाह्यचाकचिक्यमेव अधिकम्। वक्रोक्तिवैचित्र्यं च एतन्मार्गस्य जीवतम्। उभयमार्गगुणविशिष्टे मध्यममार्गे च कृत्रमा सौकुमार्येण च सहजशोभा प्राप्यते[२]। उत्तमाधममध्यत्वेन रीतीनां त्रैविध्यम्, देशाधारतया तन्नामकरणं च अनुचितमिति प्रतिपादयता कुन्तकेन, कविस्वभावमेव आधारीकृत्य तत् त्रैविध्यं व्यवस्थापयता तेन प्रोक्तम् –"न च रीतीनाम् उत्तमाधममध्यमत्वेन त्रैविध्यं न्याय्यम्। यस्मात् सहृदयाह्लादकारिकाव्यलक्षणप्रस्तावे वैदर्भीसदृशसौन्दर्यासम्भवात् मध्यमाधमयोः उपदेशवैयर्थ्यमायाति। तदेवं निर्वचन-समाख्या-मात्रकरण-कारणत्वे देशविशेषाश्रयणस्य वयं न विवदामहे। यद्यपि कविस्वभावभेदनिबन्धनत्वात् अनन्तभेदभिन्नमनिवार्यम्, तथा चेत् परिसङ्ख्यातुम् अशक्यत्वात् सामान्येन त्रैविध्यमेव उपपद्यते[३] इति तन्मतम्।

---

[१] काव्यमीमांसायाम् – पृ – ३१

[२] वक्रोक्तिजीविते १, २४ – ५२

[३] तत्रैव १. २४ कारिकायां वृत्तिः

**महिमभट्टस्य** मते पदार्थानाम् उत्कर्षापकर्षौ समासाभावे एव व्यक्तीभवतः, अतः समाससंस्पर्शरहिता वैदर्भी एव एका रीतिः प्रशस्यते। उच्यते यथा –

**अत एव च वैदर्भी रीतिरेकैव शस्यते।**

**यतः समाससंस्पर्शस्तत्र नैवोपपद्यते**[१]।।इति।।

अतः समस्तपदरचिताया वैदर्भीभिन्नाया रीतेः अस्वीकार एव तेन कृतः।

**भोजराजेन** आनन्दवर्धनानुसारेण गुणानाश्रित्य, रुद्रटानुसारेण च समस्तासमस्तपदान्याधारीकृत्य षण्णां रीतीनां स्वरूपाणि प्रतिपादितानि। तत्र वैदर्भीपाञ्चाल्योः अन्तरालवर्तिनी आवन्तिका तथा पूर्वरीतेः अनिर्वाहे खण्डरीतिः मागधी इति रीतिद्वयं नवीनम्।

**मम्मटाचार्यस्तु** उपनागरिका-परुषा-कोमलावृत्तिष्वेव वामनादीनां वैदर्भी-गौडी-पाञ्चालीरीतीः अन्तर्भावयामास।

**रुय्यक-वाग्भट-हेमचन्द्र-शारदातनय-विद्याधर-विद्यानाथ**-प्रभृतीनां रीतिविचारे न कापि नूतनता[२]। अमृतानन्दयोगिना तावत् –

**रीतिरात्मात्र काव्यस्य कथ्यते सा चतुर्विधा**[३]।

इत्येवंप्रकारेण रीतेः आत्मत्वं व्यवस्थापयाञ्चक्रे। **विश्वनाथस्य** काव्यशरीरस्य अङ्गसंस्थानविशेषरूपायां रसादेः उपकारिण्यां पदसङ्घटनायां रीतौ न किमपि नूतनत्वम्[४]।

**केशवमिश्रेण "अलङ्कारशेखरे"** मागधीरीतेः कृते मैथिलीरीतेरपि नाम उल्लिखितं यच्च राजशेखरस्य **"बालरामायणे"** भोजराजस्य **"सरस्वतीकण्ठाभरणे"** च विचारितं पूर्वम्, **पण्डितराजजगन्नाथेन** च रीतिवृत्त्योः ऐक्यमेव अङ्गीकुर्वता उक्तम् –

**"तां विबुधा वैदर्भीं वदन्ति वृत्तिं गृहीतपरिपाकाम्"**[५]। इति।

पाश्चात्यकाव्यशास्त्रे प्लेटोमहोदयेन प्रतिपादितं काव्यविषये शैल्या द्वैविध्यं न सर्वथा स्फुटम्। अरस्तूमहोदयेन रीतिशास्त्रे शैल्याः प्रसादः औचित्यं चेति

---

[१] व्यक्तिविवेके २, १६

[२] सरस्वतीकण्ठाभरणे २, ५६-५७

[३] द्रष्टव्या काव्यमीमांसा पृ – १५६ – १६३

[४] साहित्यदर्पणे ६ – १

[५] रसगङ्गाधरे पृ – ११७ 117

मौलिकगुणद्वयमङ्गीकृतम्। सामासिकशब्दाः, वैदिकशब्दाः, दीर्घानुपयुक्तात्यधिकविशेषण-शब्दाश्च शैल्यां दोषाधायका अतस्ते परिहरणीया इति च प्रतिपादितम्। डिमेट्रियसमहोदयः **'आन् स्टाइल्'** इति नामके स्वीये पुस्तके प्रसादमयशैली, उदात्तशैली, मसृणशैली, ओजस्विशैली चेति चतुर्विधशैलीं प्रतिपादयामास। लौञ्जाइनस-क्विन्टिलियन्-बैनजौन्स-पोप-रैले-मरीप्रभृतयः पाश्चात्यविद्वांसः शैल्याः विस्तृतं विवेचनम् अकुर्वन्।

**रीतिसमीक्षा** –

भरतमुनेः नाट्यशास्त्रस्य प्रवृत्तेः प्रादुर्भूता मार्गप्रस्थानादिशब्दैः व्यवहृता प्रारम्भिकभौगोलिकसीमां परिहृत्य काव्ये कविस्वभावेन जायमाना रीतिः विषयानुकूलवर्णनस्य माध्यमतया प्रचलिता। गुणविशिष्टपदरचनात्मिका रीतिः वामनेन काव्यस्य आत्मतया प्रतिष्ठापितापि ध्वनिसम्प्रदायप्रवर्तकाचार्यैः तद्रूपेण तिरस्कृता, काव्यात्मभूतस्य रसध्वनेरुपकारकतया एव अङ्गीकृता। पश्चात् "**काव्यालङ्कारसूत्रवृत्ति**"टीकाकृता तिप्पभूपालेन '**अलङ्कारसङ्ग्रहः**'कृता अमृतानन्दयोगिना च रीतेरात्मत्वं स्वीकृत्य पुनः काव्ये देहात्मवादस्थापनस्य महान् प्रयासः कृतः। परन्तु आनन्दवर्धनाभिवनमम्मटादिभिः प्रतिष्ठापितस्य काव्यात्मभूतस्य ध्वनितत्त्वस्य समक्षं रीतेः महत्त्वं काव्यशरीरावयवसङ्घटनाधिकं नाभूत् किमपि। वस्तुतः विशिष्टपदरचनारूपाया रीतेः अत्मत्वमङ्गीकृत्यापि वामनाचार्यः शब्दार्थरूपकाव्यशरीरसङ्घटनामेव रीतिं मन्यमानः काव्ये देहात्मवादमेव प्रतिष्ठापयामास। रीतिसम्प्रदाये रसध्वनिरूपस्य काव्यात्मनः कृता उपेक्षा चार्वाकदर्शने अध्यात्मवादस्य उपेक्षा इव ध्वन्यात्मवादिनां कृते असह्याभूत्। रसानुकूलसम्यग्घटनारूपा रीतिः माधुर्यादीन् गुणानाश्रित्य रसानभिव्यनक्ति, तस्मात् रसानुभूतौ साधनतयैव तस्याः महत्त्वं ध्वनिसम्प्रदायेऽभूत्। रीतेः अन्तस्तत्त्वं गुणः, समासादिस्तु बाह्यतत्त्वमेव। एवं च रीतेः सङ्ख्याविषये सत्स्वपि अनेकपक्षेषु त्रैविध्यपक्ष एव श्रेष्ठः।

- रीतेः आधारभूतस्य गुणस्य वस्तुतः त्रैविध्येन रीतेरपि त्रैविध्यमेव युक्तम्।
- कविस्वभावमाधारीकृत्य जायमानायां रीतौ कोमलस्वभावेन वैदर्भी, परुषस्वभावेन गौडी, कोमलपुरषयोः सम्मिश्रणेन च पाञ्चाली इत्यतोऽपि तस्याः त्रैविध्यमेव।

मानवस्वभावे आनन्त्येन तु "**तद्भेदास्तु न गण्यन्ते वक्तुं प्रति कविस्थिताः**" इति दण्डिनः उक्त्या आनन्त्यमेव स्यात्।

- समासादिबाह्यविषयाधारेऽपि असमासेन लघुसमासेन वा वैदर्भी, मध्यसमासेन पाञ्चाली, दीर्घसमासेन च गौडी इति तत् त्रैविध्यमेव।

एवञ्च – "**तत्तद्रसोपकारिण्यस्त्रिविधा रीतयो मताः**"।

इति सिद्धान्तानुसारेण रीतिः साधनभूता न सिद्धिरूपा इति तस्या अङ्गत्वमेव न च अङ्गित्वमति शम्।

**आधारग्रन्थाः**


१.नाट्यशास्त्रम् २. काव्यालङ्कारसूत्रवृत्तिः ३. सरस्वतीकण्ठाभरणम्
४. हर्षचरितम् ५. भामहकाव्यालङ्कारः ६. काव्यादर्शः
७. नलचरितम् ८. शिशुपालवधम् ९. काव्यमीमांसा
१०. साहित्यदर्पणः ११. अभिज्ञानशाकुन्तलम् १२. रुद्रटकाव्यालङ्कारः
१३ ध्वन्यालोकः १४. वक्रोक्तिजीवितम् १५. व्यक्तिविवेकः १६. रसगङ्गाधरः

# रामायणस्य नामान्तरौचित्यपरामर्शः

**डा. एम्. श्रीनिवासमूर्तिः**
अतिथ्यध्यापकः, साहित्यविभागः

एवं करणीयम् एवं न करणीयमिति विधिनिषेधरूपेण प्रतिसन्निवेशं धर्मं नीतिं वा प्रबोधयति कविताशाखारूढवाल्मीकिकोकिलमधुरकूजनं श्रीमद्रामायणम्। मर्यादापुरुषोत्तमं धर्मवीरं सत्यवचस्कं श्रीरामम्; आदर्शशीलवतीं दयार्द्रहृदयाम् उत्तमपतिव्रतां सीताम्; ब्रह्मवरप्रसादाहङ्कारिणं भीकरपराक्रमशालिनं लोककण्टकराक्षसं रावणञ्च पुरस्कृत्य आदिकाव्यस्य नामत्रयम् महर्षिणा निगदितम् यत् –

"काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।
पौलस्त्यवधमित्येव चकार चरितव्रतः॥" इति। (बालकाण्डम्-४-७)

"तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम्।
रघुवरचरितं मुनिप्रणीतं दशशिरश्च वधं निशामयध्वम्॥" (बालकाण्डम्-२-४३)

इत्यस्मिन् श्लोके प्रोक्तं रघुवरचरितमिति नामधेयं रामायणस्य,दशशिरवधः-इति नाम च रामायणपौलस्त्यवधयोः पर्यायपदत्वेनैव मुनिना प्रयुक्तम्। कृत्सन- महत्-वध-शब्दैः प्रधानपात्राणां राम-सीता-रावणानां गुणविशेषसूचनया काव्यार्थः संसूचितः वर्तते।

रामायणं तावत् वाल्मीकिमहर्षेः आश्रमे सीतायाःगमनानन्तरमेव लिखितमित्यतः सीताचरितम् इति नामधेयं सीतायां वाल्मीकेः वात्सल्यं सूचयति। नारदमहर्षिं वाल्मीकिमुनिः

"कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः॥
आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे॥"

इति खलु पृष्टवान्, न तु का इति। किञ्च सीता किष्किन्धकाण्डे प्रत्यक्षतया न दृश्यते। अपि च रामायणम् इति नामधेये-एव सीतायाः मार्गः इत्ययमर्थः अन्तर्गतो भवति। अतः सीतायाः चरितम् इति नाम रामायणम् इति नामवत् न सङ्गच्छते इति भाति।

पौलस्त्यवध इति नाम तावत् प्रतिनायकपरम्। काव्यकथानुसारं तावत् श्रीरामस्य-आवतरणं रावणसंहाररूपप्रधानकार्यार्थमेव खलु। अपि च काव्यप्रारम्भादारभ्य युद्धकाण्डान्तमं यावत् रावणवधस्य आवश्यकाः काव्यांशाः सम्यग्निरूपिताःयथा –

१) बालकाण्डे रामावतरणम्, सीताविवाहश्च कथाबीजम्;

२) अयोध्याकण्डे श्रीरामपट्टाभिषेकस्य विघ्नः,वनवासगमनञ्च बिन्दुः;

३) किष्किन्धकाण्डे सुग्रीवस्य वृत्तान्तः पताका;

४) युद्धकाण्डे विभीषणस्य वृत्तान्तः प्रकरी;

५) युद्धकाण्डे रावणस्य वधः कार्यम् इति।

अनेन विचारणेन पौलस्त्यवध इति नाम सङ्गच्छते इति भाति,किन्तु रावणवधकार्यं तावत् युद्धकाण्डे- एव परिसमाप्तिमेति। अतः रावणवधानन्तरमपि- उत्तरकाण्डमस्तीति हेतोः पौलस्त्यवध इत्यपि नाम न सङ्गच्छते इत्येव मन्तव्यम्।

अथ "रामायणम्" इति नामधेयविषयं पश्यामः-

रामायणम् इत्यस्य रामस्य-अयनम् इति,रामायाः अयनम् इति च विग्रहवाक्यं वक्तुं शक्यते,वाल्मिकिना बहुवारं सीतामुद्दिश्य रामा –इति लिखितमित्यतः।अर्थात् रामारमयोरयनं रामायणम् इति कथने न कश्चिद्दोषः। तथापि वाल्मीकिदृष्ट्या तावत् "काव्यं रामायणं कृत्स्नं ..." इति श्लोके रामायणशब्दस्यार्थः रामस्य-अयनम् इत्येव, समनन्तरमेव "सीतायाश्चरितं महत् इति उक्तत्वात्। किञ्च –

कुशलवयोः रामायणगानं किञ्चित् –श्रुत्वा काव्यस्यास्य किं प्रमाणम् इति यदा श्रीरामः पृच्छति तदा कुशलवाभ्याम् समाधीयते यत् –

" वाल्मीकिर्भगवान् कर्ता सम्प्राप्तो यज्ञसंविधम्।
येनेदं चरितं तुभ्यमशेषं सम्प्रदर्शितम्॥
सन्निबद्धं हि श्लोकानां चतुर्विंशत्सहस्रकम्।
उपाख्यानशतञ्चैव भार्गवेण तपस्विना॥
आदिप्रभृति वै राजन् पञ्चसर्ग शतानि च ।
काण्डानि षङ्कृतानीह सोत्तराणि महात्मना॥ " इति।

(उत्तरकाण्डम्-९४-२५,२६,२७)

अर्थात् हे श्रीराम! भगवान् वाल्मीकिः काव्यस्यास्य कर्ता वर्तते। भवता क्रियमाणे यज्ञसमीपे- एव वर्तते। भवतः चरित्रमेव काव्ये-अस्मिन् कीर्त्यते। काव्यमिदं २४००० श्लोकैः,१०० उपाख्यानैः,५०० सर्गैः,६ काण्डैः, तथा इतोऽपि एकेन काण्डेन, महात्मना भार्गवेण लिखितं वर्तते- इति।

अनेनापि सन्दर्भेण रामस्य अयनमित्यर्थे-एव रामायणमित्येव नामधेयं महर्षिणा- अभिलषितमिति वक्तुं शक्यते।

काव्यान्ते वाल्मीकिना एवमुक्तम् –

"एतावदेतदाख्यानं सोत्तरं ब्रह्मपूजितम्।
रामायणमिति ख्यातं मुख्यं वाल्मीकिना कृतम्॥ " इति।

(उत्तरकाण्डम् -१११-१)

अर्थात् कथैषा उत्तरकाण्डसहिता ब्रह्मपूजिता चास्ति। रामयणनाम्ना प्रसिद्धा। अत्यन्तं मुख्या। वाल्मीकिना रचिता इति।

काव्ये प्रथमश्लोकादारभ्य आन्तं यावत् (उत्तरकाण्डे-अपि) सर्वत्र प्रत्यक्षतया श्रीरामसम्बद्धविषयविष्यत्वात्, प्रत्येकस्मिन्नपि काण्डे अन्ते "इत्यार्षे श्रीमद्रामायणे" इति रामायणनामधेयमेव अस्तीति हेतोः, ग्रन्थान्ते 'रामायणम्"इति नामैव प्रसिद्धमिति वाल्मीकिना उक्तत्वात् आदिकाव्यस्य "रामायणम्" इति नामधेयमेव सर्वविधत्वेन सङ्गच्छते।

" वेदवेद्ये परे पुंसि जाते दशरथात्मजे।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना॥ "

इति स्कान्दपुराणे प्रसिद्धे- अस्मिन् श्लोके-अपि "रामायणम्" इति नामैव प्रयुक्तम्।

आलङ्कारिका अपि वाल्मीकेः आदिकाव्यं "रामायणम्" इत्येव व्यवहृतवन्तः। लोकव्यवहारे-अपि सीतायाः चरितम्, पौलस्त्यवधः- इति नामाभ्यां "रामायणम्" इति नामैव बहुलप्रसिद्धिङ्गतम्।

वाल्मीकिगिरिसम्भूता रामसागरगामिनी।
पुनाति भुवनं पुण्या रामायणमहानदी॥

इति सम्प्रदाये दृश्यमाने-अपि श्लोके रामायणनामैव प्रसिद्धं वर्तते।

भारतीयसम्प्रदाये रामशब्दविषये कश्चन विशिष्टांशः वर्तते यत् –

रामशब्दः अष्टाक्षरी-पञ्चाक्षरीमन्त्रसाररूपः-इति। अष्टाक्षरिमन्त्रे “र”कारः, पञ्चाक्षरिमन्त्रे “म” कारश्च नितरां प्रधानः।

श्रीराम राम रामेति रमे रामे मनोरमे।
सहस्रनाम तत्तुल्यं रामनाम वरानने॥

इति पद्मपुराणान्तर्गतः-अयं श्लोकः-एवात्र प्रमाणम्।

# संस्कृतमहाकवीनां दृष्टौ काव्यमीमांसा

**डा. श्रीकरः वि**

अतिथ्यध्यापकः, साहित्यविभागः

भरतमुनेरारभ्य पण्डितराजजगन्नाथपर्यन्तं वर्तमानसमयं यावच्चद्विसहस्रवर्षाणि काव्यशास्त्रस्येतिहासं पश्यामश्चेद् काव्यमीमांसासंवर्धने अनेकेषां महाकवीनाम् अलङ्कारिकाणां च योगदानं दरीदृश्यते । भारतीयकाव्यशास्त्रस्य समग्रं क्षेत्रं काव्यसौन्दर्यस्य नाट्यरसस्य च विवेचनेन परिव्याप्तं विद्यते । अस्य साहित्यशास्त्रस्यविकासयात्रायां कालक्रमेण षड्सिद्धान्ताः प्रादुर्भूताः । यथा रससिद्धान्तः, अलङ्कारसिद्धान्तः, रीतिसिद्धान्तः, ध्वनिसिद्धान्तः, वक्रोक्तिसिद्धान्तः, औचित्यसिद्धान्तश्च । त एव षड्प्रस्थानानीत्युच्यन्ते। एते षट् सिद्धान्ताः काव्यात्मप्रतिपादनाय काव्यस्य सर्वप्रधानं तत्त्वं किमिति निर्णेतुं वा कालक्रमेणाविर्भूताः । आभरतात् पण्डितराजजगन्नाथविश्वेश्वरपर्यन्तं सर्वेऽपि शास्त्रकाराः एतेषु षड्सिद्धान्तेषु कश्चिदेकं पक्षं परिपोष्य प्रमाणिताभिः युक्तिभिस्तं समर्थितवन्तः ।

विविधालङ्कारिकाणां मते काव्यमीमांसाविषयीभूतानि रसध्वन्यलङ्कारादितत्त्वानि प्रत्यक्षतया तेषां ग्रन्थरत्नेषु लभ्यन्ते । परन्तु ये केवलं काव्यमेव अरचयन् तेषां मते रसगुणालङ्कारणां किं स्थानम् ? इति जिज्ञासाया निवृत्त्यर्थं प्रत्येकं कवेः काव्येषु तत्र तत्र उल्लिखितानां तादृशांशानाम् अध्ययनं कर्तव्यं भवति । एते अंशाः कदाचित् वाच्याः कुत्रचिद् व्यङ्ग्याश्च भवन्ति । अस्माकं कृते आदिकाव्ये श्रीमद्वाल्मीकिरामायणे एव हनुमतः वाग्वैखरीं दृष्ट्वा रामस्य वचनेषु काव्यस्वरूपं काव्यहेतुभूतव्युत्पत्त्यभ्यासयोः आवश्यकता-इत्यादयः ज्ञायन्ते । यथा-

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहुव्याहरताऽनेन न किञ्चिदपभाषितम् ॥
न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित् ॥

अविस्तरमसंदिग्धमविलम्बितमव्यथम् ।

उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम् ॥

अनया चित्रया वाचा त्रिस्थानव्यंजनस्थया।

कस्य नाराध्यते चित्तमुद्यतासेररेरपि ॥[१]

काव्यं बहुशास्त्राणामध्ययनस्य फलं भवति । कवेः वाक्येषु व्याकरणदृष्ट्या दोषराहित्यं भावदृष्ट्या च स्पष्टता भवेदेव । अयमेव गुणः काव्यशास्त्रेषु प्रसादगुण इत्युच्यते । वक्तुमिष्टस्य विषयस्य धाराप्रवाहरूपेण अस्खलिततया वा निरूपणं कविः कुर्यात् । कविः काव्यं चित्ताकर्षकम् असन्दिग्धं च कर्तुं प्रयत्नशीलः भवेदिति अंशः एतैः रामायणश्लोकैः ज्ञायते । महाभारते उद्योगपर्वणि कर्णेन सह वार्तालापे श्रीकृष्णो यदुवाच तद्वाक्ये तीक्ष्णता, मृदुता,हृदयग्राहिता चासीत् । तद्वचनं सत्यं हितकरं धर्मयुतं प्रियं चावर्तत –

आनुपूर्व्येण वाक्यानि तीक्ष्णानि च मृदूनि च

प्रियाणि धर्मयुक्तानि सत्यानि च हितानि च ॥

हृदयग्रहणीयानि राधेयं मधुसूदनः।

यान्यब्रवीदमेयात्मा तानि मे श्रुणु भारत[२]

एतादृशसन्दर्भे अस्माकं मनसि काव्यमीमांसायाः तत्त्वानि परिस्फुरन्ति । अत्र काव्यवाक्यानि एवमेव भवन्तीति सहृदयाः चिन्तयन्ति । एवमेव कालिदासकाव्येषु काव्यविषयकचिन्तनानि लभ्यन्ते । यथा-

काव्यं शब्दनिष्ठं शब्दार्थनिष्ठं वेति विकल्पद्वयं सम्भवति । केचन तस्य कमनीयशब्दमात्रोपस्थाप्यत्वात् शब्दनिष्ठताम्,अपरे तु व्यासज्यवृत्याऽभिव्यञ्जकताया उभयगततयोभयनिष्ठता मुररीकृतवन्तः। न केवलं काव्यशास्त्रस्य प्रधानाचार्याः शब्दार्थौ काव्यमिति मन्यन्ते अपि तु अनेके महाकाव्यप्रणेतारः महाकवयोऽपि तथैव स्वीकुर्वते । अधोलिखितानि कथनान्येववात्र निदर्शनानि-

वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये ।

जगतः पितरौ वन्दे पार्वती परमेश्वरौ ॥[१]

---

[१]श्रीमद्वाल्मीकिरामायणम् किष्किन्धकाण्डम् ४.३.२७-३३

[२]महाभारतम् उद्योगपर्व १४०/४/५

इत्यत्र महाकविः न केवलं शब्दस्यैव प्रतिपत्तिं प्रार्थयते, किन्तु शब्दार्थयोरुभयोः । एतत्तु 'शब्दार्थौ काव्य'मित्यस्य मम्मटोक्तलक्षणस्य, 'तौ शब्दार्थौ महाकवेः' इत्यस्याः आनन्दवर्धनोक्तेः समर्थनपरं भवति। तेन कालिदासोऽपि शब्दार्थयुग्लस्यैव काव्यत्वं मन्यते इति सिद्धम् । इदं मतं महाकविना माघेनापि निरगादि-

नालम्बन्ते दैष्टिकतां न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥[२]इति ।

माघकवेः शिशुपालवधमहाकाव्ये शब्दार्थयोरेव सत्काव्यता प्रतिपाद्यते । विद्वान् केवलं दैवम् आहोस्वित् पौरुषं नालम्बते किन्तु उभयमपि आश्रयति । सत्कविः न हि केवलान् शब्दालङ्कारान् उपादत्ते नापि केवलान् अर्थालङ्कारान् । तथैव काव्यगुणा अपि शब्दगुणा अर्थगुणा इति द्विधा विभक्ताः । आचार्यः दण्डी उदारनामकं तत्त्वं प्रतिपादयति । तत्तु

उत्कर्षवान् गुणः कश्चित् यस्मिन्नुक्ते प्रतीयते ।
तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः ॥

इति लक्षणं शब्दार्थावुभावपि आश्रित्य भवति । एतदेव महाकविना भारविना किरातार्जुनीयमहाकाव्ये वनेचरस्य वचः सौष्ठवौदार्यविशेषशालिनी आसीदिति वर्णितम्[३] । अतः शब्दार्थयोः उभयोरेव काव्यत्वं बाहुल्येन अङ्गीकृतमस्ति काव्येषु काव्यशास्त्रे च ।

एवं काव्यशास्त्रिभिः निर्दिष्टः काव्यमार्गः काव्यरचयितृभिः अनुसृतः । काव्यशास्त्रकारैः एते विषयाः उक्ता इत्यत्र कोऽपि विशेषः न दृश्यते । किन्तु कविभिरपि प्रतिपादिता इत्यत्र विशेषः दृश्यते ।

एवमेव सुबन्धोः वासवदत्तायाम् एवं वर्तते-

अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥

---

[१]रघुवंशम् १.१ ॥

[२]शिशुपालवधम्२.८६

[३]द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः । स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे

सत्कवीनां वचनेषु माधुर्यादिगुणा अज्ञाता अपि श्रोतॄणां कर्णेषु रमणीयताऽतिशयं प्रकटयति । तथाहि मालतीमाला अप्राप्तपरिमलापि दृशं हरति इत्यर्थः । अस्मिन् श्लोके सुबन्धुः काव्यस्य श्रवणाभिरामतां कथयति । कविः न्यूनातिन्यूनं छन्दसां रसानाञ्च यथायोग्य प्रयोगेण काव्यं श्रोतुं योग्यं कुर्यादिति मूलतत्त्वविषये सहृदयानां मनः आकर्षति । अस्य श्लोकस्य प्रभावः '**काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्**[१]" केशवमिश्रस्य अलङ्कारशेखरे दृश्यते । मम्मटेन स्वकाव्यलक्षणे अदोषौ इति पदेन अयमेवांशः प्रतिपादितः वर्तते ।

**अर्वाचीनस्य श्रीनीलकण्ठदीक्षितस्य काव्येषु काव्यविषयकचिन्तनानि**

श्रीनीलकण्ठदीक्षितेन शिवलीलार्णवाख्ये महाकाव्ये प्रथमसर्गे कवेः साहित्यस्य च वैशिष्ट्यं विस्तरेण प्रदर्शितम् । कविः स्वविलक्षणप्रतिभायाः प्रभावात् साधारणेऽपि वस्तुन्यसाधारणतां प्रकटयन् जयति ।

यानेव शब्दान् वयमालपामो यानेव शब्दान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति ॥ [२]

श्रीनीलकण्ठदीक्षितः ब्रवीति यत् काव्ये खलु वाच्यवाचकयोर्महत्त्वं न भवति प्रत्युत वक्रोक्त्य एव प्रशस्या भवन्ति । व्यङ्ग्ये एव च भवति कश्चिद् विशिष्टश्चमत्कारो यस्मात् कवयो जायन्ते काव्यानि च प्राप्नुवन्ति महाकाव्यत्वगौरवम् । तथाहि-

वक्रोक्तयो यत्र विभूषणानि वाक्यार्थबोधः परमप्रकर्षः ।
अर्थेषु बोध्येष्वभिधैव दोषः सा काचिदन्या सरणिः कवीनाम् ॥

श्री नीलकण्ठदीक्षितेनापि साहित्यशब्दस्य साक्षात् प्रयोगोविहितोऽस्ति स्वमहाकाव्ये । यथा-

बाल्यं विदुः प्राकृतभाषितानि श्रुतिस्मृती वृद्धदशां वदन्ति ।
साहित्यमेकं तु गिरां सवित्र्यास्तारुण्यमुद्गाढमुशन्त्यभिज्ञाः ॥

विक्रमाङ्कदेवचरिते बिल्हणः काव्यार्थहरणस्य विषये एवं प्रतिपादितवान्-

साहित्य पाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ! ।
यत्तस्य दैत्या इव लुण्ठनाय काव्यार्थचोराः प्रगुणी भवन्ति ॥

---

[१]अलङ्कारशेखर १/१

[२]शिवलीलार्णव १.१३

गृह्णन्तु सर्वे यदि वा यथेच्छं,नास्ति क्षतिः क्वापि कवीश्वराणाम्।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः ॥

हे कविश्रेष्ठाः साहित्यसमुद्ररूपाणां नाट्यशास्त्रादीनां परिशीलनाद् उत्पन्नं कर्णयोः अमृतमिवाह्लादकं काव्यं रक्षन्तु । कुतश्चेत् लुण्ठनार्थं दैत्या इव काव्यरूपस्य अर्थस्य चोराः बहुलीभवन्ति । अत्र कविशिक्षा स्पष्टरूपेण प्रतिपादिता वर्तते ।

काव्यानाम् उद्देश्यं केवलं रसानुभूति निमित्तमेव भवतीति केचन चिन्तयेयुः। परन्तु काव्यानामध्ययनेन विविधशास्त्रेषु व्युत्पत्तिः भवति । एवमेव काव्येभ्यः काव्यशास्त्रज्ञानम् इत्युक्ते रसध्वन्यलङ्काराणां स्पष्टीकरणं प्रत्यक्षतया भवति। महाकविः काव्यमाध्यमेन इतरान् शिक्षते । अतः महाकाव्यानामध्ययनेन रचयितृणां काव्यविषयकं मतमनायासेन ज्ञातुं शक्यते ।

**सन्दर्भग्रन्थसूची**

1.अलङ्कारकौस्तुभः, कविकर्णपुरगोस्वामी, परिमलप्रकाशन, देहली, १९८१

2.अलङ्कारशास्त्रस्येतिहासः, डा. जगदीशचन्द्र मिश्रः, चौखम्बा प्रकाशनम् वाराणसी, प्रथमसंस्करणम्, २००१

3.उत्तररामचरितम्, भवभूतिः, निर्णयसागरप्रेस् मुम्बय्, १९२५

4.काव्यप्रकाशः, श्रीमम्मटभट्ट, विद्याभवनप्राच्यविद्या ग्रन्थमाला ५९, चौखम्बाविद्याभवनम्, वाराणसी, द्वितीयसंस्करणम्, १९९४

5.काव्यमीमांसा, राजशेखरः, जि. ओ. एस्. बरोड, १९३४

6.काव्याङ्कारः, रुद्रटः, निर्णयसागर पब्लिकेशन् मुब्बय्, १९२८

7.काव्यादर्शः, दण्डीविरचितः / श्रीशिवनारायणशास्त्री, परिमलसंस्कृतग्रन्थमाला २७, परिमल पब्लिकेशन्स्

8.किरातार्जुनीयविमर्शः, भारविः, सञ्जुमिश्रा, नागपब्लिशर्स दिल्ली, २००७

9.कुमारसम्भवम्, कालिदासः डा . कृष्णाविश्वास , मान्यता प्रकाशन नयी दिल्ली, २००४

10.गङ्गावतरणम्, नीककण्ठदीक्षितः, निर्णयसागरप्रेस् मुम्बय्, १९०२

11.ध्वन्यालोकः, आनन्दवर्धनः,आचार्यचण्डिकाप्रसादशुक्ल, विश्वविद्यालय प्रकाशनम्, वाराणसी, १९८१

12.वासवदत्ता, सुबन्धुः, चौखम्बविद्याभवन् प्रकाशन् वारणासी, १९६७

# ताम्बूलप्रश्नचिन्तनम्

**डा. नागेश के.सि**
सहायकप्राध्यापकः, ज्यौतिषविभागः
श्री श्रीमाता संस्कृतस्नातकस्नातकोत्तराध्ययनकेन्द्रम्
उम्मचगि,यल्लापुर

वेदोक्तकर्मणां कालनिर्देशनार्थमभिप्रवृत्तमिदं ज्यौतिषशास्त्रमधुना न केवलं वैदिककर्मणि अपि तु मानवानां नित्योपयुक्तं सर्वजनोपहितं शास्त्रमिति प्रसिद्धम् । तत्र गणिताभिमुखेन कर्मणा निर्मितेन पञ्चाङ्गेन कालनिर्णयः, संहितोक्तलक्षणादिना आलय-आराम-वाटिकादीनां निर्माणम् अर्घ-अनर्घ-अतिवृष्टि-अनावृष्ट्यादि विशेषविचाराः , होरास्कन्धेन जन्तोः आजीविकादिजीवनविषयाः विचिन्त्यन्ते विपश्चिद्भिः ज्योतिर्विद्भिः ।

तत्र –

**जातक-गोल-निमित्त-प्रश्न-मुहूर्त-गणितनामानि ।**
**अभिदधतीह षडङ्गान्याचार्या ज्योतिषे महाशास्त्रे ॥**

इत्युक्तदिशा शास्त्रेऽस्मिन् प्रश्नविभागोऽपि अन्यतमः । अतोऽत्र प्रश्नसम्बद्धविषयान् तत्रापि ताम्बूलप्रश्नविषयं यथाशास्त्रं यथामति प्रस्तौमि ।

अस्मिन्नपि प्रश्नविभागे सन्ति अनेकप्रकाराः। तत्कालप्रश्नः, ( शास्त्रभारतीप्रश्नः, संख्यावशात् प्रश्नः ), आरूढप्रश्नः, ताम्बूलप्रश्नः, दीपप्रश्नः, भोजनप्रश्नः, राजप्रश्नः, देवप्रश्नः, अष्टमंगलप्रश्नः इत्यादयः।

तेषु प्रकारेषु अन्यतमः अयं ताम्बूलप्रश्नक्रमः। सामान्येन ताम्बूलपरिचयः सर्वेषां विद्यते एव । समाजे तस्य महत्वं तस्मिन् महती श्रद्धा च वर्तते । कार्यारम्भे ताम्बूलस्यैव प्राधान्यम् । विशिष्य प्रश्नकार्येषु ताम्बूलमतिप्रधानं निमित्तम् । प्रथमनिवेदनकार्यं ताम्बूलेनैव भवति दैवज्ञे पृच्छकस्य । तद्वशात् अनेके विचाराः विचार्यन्ते ।

पृच्छकेन दत्तानि यानि ताम्बूलानि तानि दृष्ट्वा तेषां गणनं कृत्वा लग्नानयनं च कृत्वा द्वादशभावोत्थं फलं यत् चिन्त्यते तदेव ताम्बूलप्रशनः इत्युच्यते ।

उक्तञ्च

**प्रष्ट्रा वितीर्णताम्बूलैः शुभाशुभमशेषतः ।**
**वाच्यं द्वादशभावोत्थं तत्प्रकारोऽथ कथ्यते ॥ इति**

**ताम्बूलगणनक्रमः –**

पूर्वाह्णे यदि प्रश्नः तदा उपरिष्टात् ताम्बूलात् विचार्यते । अपराह्णे तु अधस्तात् ताम्बूलात् । तेषु ताम्बूलेषु प्रत्येकमपि पत्रमवलोक्य तत्रस्थ म्लान-क्षत-वर्ण-आकृतिं च दृष्ट्वा फलं निरूप्यते ।

**यथोक्तम् –**

**ताम्बूलैः प्रष्टृदत्तैः अपि फलमखिलं तस्यवक्तव्यमेवम् ।**
**प्रारभ्योपर्यधस्ताद्गणनमिह वपुः पूर्वमह्णोर्धयोः स्यात् ॥**
**म्लानिक्षत्याद्युपेतं तदयुतमपि यत् भावसम्बन्धिपत्रम् ।**
**तस्य व्याध्याद्यनिष्टं भवति शुभमपि प्राप्तिसंवर्धनाद्यम् ॥**

ताम्बूलपत्रं देवतायतनम् । ताम्बूलं श्रीकरं भद्रम् । ताम्बूलेषु सर्वेषु भागेषु देवाः निवसन्ति । यथा –

**ताम्बूलाग्रे निवसति रमा मध्यतो वागधीशः ।**
**पृष्टे ज्येष्ठा हिमगिरिसुता वामभागेऽन्यतो भूः ॥**
**अन्तर्विष्णुः बहिरुडुपतिः शङ्कराजौ च कोणे ।**
**शक्रादित्यावुपरि मदनः सर्वतो नागवल्याः ॥**

ताम्बूलाग्रे लक्ष्मीः मध्यभागे सरस्वती पृष्ठभागे ज्येष्ठादेवी वामपार्श्वे पार्वती दक्षिणपार्श्वे भूदेवी अन्तः विष्णुः बहिः चन्द्रः कोणद्वये रुद्रः ब्रह्मा च उपरिभागे इन्द्रसूर्यौ सर्वतः मदनश्च सानिध्यं वहन्ति ।

**ताम्बूललग्नानयनक्रमः**

पृच्छकेन दत्तैः ताम्बूलैः मेषादिलग्नानयनं कृत्वा द्वादशभावफलानि चिन्तनीयानि । अतः तदुच्यते यथा –

**ताम्बूलसंख्यां द्विगुणां शरघ्नां ।**
**सैकां हरेत् सप्तभिरत्र शिष्टैः ॥**
**सूर्यादिकानामुदयोऽत्र कल्प्यो ।**
**ग्रहोदयो यत्र स लग्नराशिः ॥**

ताम्बूलसंख्यां द्विगुणीकृत्य पुनः पञ्चभिः सङ्गुण्य एकयोजनेन यत्फलं तत् सप्तभिः विभज्यते यदा तदा यदवशिष्टं तत् संख्याको ग्रहः यस्मिन् राशौ तिष्ठति तस्मिन् काले तल्लग्नं भवति।

लग्नोदितग्रहफलम्

**दुःखाय भानुरुदितः सुखकृत्शशाङ्कः।**
**प्रष्टुः कुजः कलहकृत् धनदौ ज्ञजीवौ॥**
**शुक्रोऽखिलाभिमतं मरणाय मन्दो।**
**लग्नादिभावविहगैश्च वदेत् फलानि॥**

ताम्बूललग्ने रव्युदये दुःखम्, चन्द्रोदये सुखम्, कुजोदये कलहः, बुधगुरू सम्पत्प्रदौ, शुक्रोदये सर्वाभीष्टम्, मन्दोदये मरणभीतिः – एवं लग्नादिभावगतैः ग्रहैः वदेत् फलानि। तस्मात् ताम्बूललग्नात् भवनभनाथगुणैः भावकारक-भावदृष्टग्रहैः च फलं परिचिन्तनीयम्।

यदि पृच्छकेन एकमेव ताम्बूलं दीयते तत् दुःखाय। ताम्बूलद्वये दत्ते धनहानिः। तत्त्रयं चेत्तदा विनाशसूचकम् चतुःपञ्चादिकं शुभावहं भवति।

**ताम्बूलमेकं दुःखाय द्वितीयं तु धनक्षयम्।**
**तृतीयं तु विनाशाय चतुःपञ्चशुभावहम्॥**

ताम्बूललक्षणविचारः

ताम्बूलपत्रं कीदृशं विद्यते ? तस्य ह्रस्व-दीर्घत्वं कथम् ? चेदन-भेदनादिकं विचिन्त्यते। तद्यथा –

**अङ्गुलद्वयसंयुक्तं ह्रस्वं दीर्घं षडङ्गुलम्।**
**दीर्घह्रस्वविहीनञ्च पत्रं भावस्य पुष्टिदम्॥**

द्व्यङ्गुलं पत्रं ह्रस्वताम्बूलपत्रम्।षडङ्गुलात्मकं दीर्घं ताम्बूलपत्रं भवति। एवं यदि ह्रस्व-दीर्घताम्बूलपत्रं दीयते तर्हि अशुभाय। ह्रस्वदीर्घविहीनं ताम्बूलम् भावपौष्कल्यं सूचयति। तथा च -

**छिन्ने ताम्बूलपत्रे धनविभवकृतो वैरबन्धो बलीयान्**
**तत्रात्यानां नराणां निरवधिकविरोधोऽखिलप्रेततत्वात्।**

**देवानां मूलभाजां भवति खलु शिलादारुभेदोऽशुचित्वम्**

**तेनारिष्टं जनानां भवति बहुविधं रोगभाधाभिदेयम् ॥**

पृच्छकेन प्रदत्ते ताम्बूलपत्रे छिन्ने सति धनसम्बद्धवैरत्व प्रबलं विद्यते । कीटादिभिः संस्पृष्टे वा छिन्ने ताम्बूले प्रेतादिबन्धवशात् परस्परं जनानां निरवधिकविरोधोपदृश्यते । देवालयादिषु प्रतिमाभेदः शिलाभेदः दारुभेदः अशुचित्वं च जातमिति सूचयति । तस्मात् जनानामरिष्टं सम्भवतीति चिन्तनीयम् । एवमेव –

**द्वारे ताम्बूलपत्रे भवति खलु नृणां पूर्वपुण्यस्य दोषः**

**वह्नेर्भीतिश्च भूमीसुरकृतसकलद्यामयप्रेतकोपाः ।**

**नागे निन्द्यं च भूमीरुहविटपहतिं पुष्पवल्लीविपत्तिं**

**कृत्वा भोगीन्द्रशापादधिक ----------देवमर्त्येषु वाच्यम् ।।**

यदि ताम्बूलं दीर्घखण्डितं दारितं तर्हि पूर्वपुण्यक्षयः अग्निभीतिः ब्रह्मशापः रोगबाधा प्रेतकोपः भूखनन-वृक्षनाश-पुष्पवल्लीविनाशः सर्पशापादिना पिटकानां सम्भवादिकं वाच्यम् ।

**सरन्ध्रं पूर्वभागे तु ताम्बूले वनदेवता**

**यमरन्ध्रे कुजप्रेतो भ्रूणप्रेतोऽथवा भवेत् ।**

**वारुणे तु जलप्रेतो धनदे वित्तवैरतः**

**मध्ये त्वाकाशपाशादिसम्भूतप्रेतसञ्चयः ॥**

ताम्बूलपत्रस्य पूर्वस्यां दिशि रन्ध्रे सति वनदेवताकोपः दक्षिणस्यां दिशि रन्ध्रे कुजप्रेतः अर्थात् अग्निहतप्रेतः भ्रूणप्रेतो वा भवेत् । पश्चिमायां रन्ध्रे दृष्टे जलप्रेतः उत्तरस्यां धनसम्बद्धविरोधेन मृतप्रेतः मध्ये आकाशपतनात् इत्यादिकं विचिन्तनीयम् ।

एवं पृच्छकेन प्रदत्तैः ताम्बूलैः शुभाशुभफलचिन्तनमार्गः विपश्चिद्भिः प्रदर्शितः ॥

****

# आचार्यगणेशदैवज्ञस्य परिचयः

**डा. रतनकुमारपाण्डेयः**

सहायकाचार्यः, ज्योतिषविभागः

भारतीयज्यौतिषशास्त्रे द्वौ गणेशौ लभ्येते । प्रथमो जातकालंकारस्य प्रणेता गणेशोऽपरश्च ग्रहलाघवस्य रचनाकारोऽस्ति । ज्योतिष-जगति गणेशनाम्ना मुख्यतः ग्रहलाघवकारमेव गण्यते यतोहि भारतवर्षे अस्य ग्रहगणितः यावन् प्रचलितोऽस्ति तावन् नान्यस्य । अत्र प्रचलितेषु सर्वेषु करणग्रन्थेषु अस्य मुख्यं स्थानं वर्तते । आचार्यदीक्षितमहोदयेनोक्तं यदाचार्यस्य गोत्रो कौशिकः पितुर्नाम केशवस्तथा मातुर्नाम लक्ष्मी आसीत् । अस्य पिता सुप्रसिद्धज्योतिषी वेधप्रक्रियायाञ्च अतीव दक्ष आसीत् । तेन "ग्रहकौतुक"नामककरणग्रन्थस्य रचना कृता, यो सम्प्रति भारतवर्षे प्रसिद्धोऽस्ति । अस्य ग्रन्थस्यारम्भवर्षः १४१८ शकाब्दमितोऽङ्गीकृतः । अस्य महोदयस्य विषये प्रोक्तं यत् तेन कृतग्रहणगणिते किञ्चिदन्तरं समालक्ष्य कोऽपि यवनशासकः तेषामुपहासं कृतवान् । अतः क्षोभवशात् आचार्यः स्वग्रामस्य (नान्दि) मन्दिरे गत्वा भगवान् गणेशमाराधितवान्। तदानीं तस्य जरावस्थाऽऽसीत् । आचार्यकेशवस्य इमां निष्ठां संदृष्ट्वा गणपतिः वरमददत्, यत् तव गृहेऽहमवतरित्वा कार्यमिदं करिष्यामि । एवमाचार्यकेशवस्य गृहे पुत्रस्य जन्म अलभत् । तस्य पुत्रस्य नामकरणं गणेश इति संजातम् । विद्यते एतादृशी कथा भारतीयज्यौतिषशास्त्रस्य दन्तकथायाम् ।[१] केचन आचार्या आमनन्ति यत् गणेशदैवज्ञस्य पादयोश्चक्षुरासीत् । यश्चक्षुषा पथं पश्यति स्म । स आकाशं पश्यति गमनकालेऽपि चक्षुषा ।

आचार्यस्य जन्मस्थानविषये मुहूर्त्ततत्त्वटीकायामाह- "नन्दिग्रामगतः अपरान्तदेशे पश्चिमसमुद्रस्य पूर्वतीरस्थितो नन्दिग्रामः प्रसिद्धस्तत्र गतः निवासीत्यर्थः"[२] अत्रोक्तं तेषां निवासस्थानं पश्चिमसमुद्रस्य पूर्वतटवर्ती कोंकणनामकप्रान्ते नन्दि ग्राम आसीत् । ग्रामोऽयं सम्प्रति जंजीरास्थे लघुशासनक्षेत्रे (रियासते) वर्तते । स मुम्बईनगराद्विंशतिक्रोशमिते याम्यभागे स्थितो वर्तते । सम्प्रत्यस्य ग्रामस्य नाम नांदगांव इति वर्तते । तेषां वंशवृत्तान्तम्

[१] भा. ज्यो. पृ.सं. 398

[२] भा. ज्यो. पृ.सं. 356

अन्येषु ग्रन्थेष्वपि विद्यते । आचार्यगणेशदैवज्ञकालविषये स्वकृतग्रहलाघवनामककरणग्रन्थत्वेन ज्ञानं कर्तुं शक्यते ।

अत्रानुमीयते यत् आचार्यस्य प्रथमो ग्रन्थः ग्रहलाघवनामकः एव आसीत् । अस्य ग्रन्थस्य रचना त्रयोदशवर्षसमवयसि काले कृतेति चिराजनश्रुतिः । अस्य ग्रन्थस्यारम्भवर्षं १४४२मितः स्वीकृतः ।[१] तत्र ग्रहलाघवस्य कालश्च ग्रहलाघवीयाहर्गणानयनात् द्व्यब्धीन्द्रोनितशक इत्यस्माद्युग्मवेदपुरन्दर १४४२ शकस्तेन निर्धारितः । गणेशस्य जन्मशकश्च नवाक्षिशक्र १४२९ सम आयाति । स गणितशास्त्रे अत्यधिकं प्रवीणो आसीत् । यदा अनुमानं कृतं यत् ग्रन्थस्य निर्माणकाले आचार्यस्य आयुः विंशतिर्द्वाविंशतिर्वा आसीत् । तदा तस्य जन्म १४२० शकाब्दमिते संजातम् । तेन लघुचिन्तामणिग्रन्थस्यापि १४१७ शकाब्दमिते रचना कृता । भास्करकृतलीलावतीनामकग्रन्थस्यापि टीकां कृतवान् १४१७ शकाब्दमितेऽऽचार्यः । आचार्यशङ्करबालकृष्णदीक्षितः कथयति यद्विवाहवृन्दावनस्य एका टीका मुद्रिता वर्तते। ग्रन्थेऽस्मिन् टीकाकालः विचित्ररीत्या अङ्कितोऽस्ति विवाहवृन्दावनटीकायामाह यथा-

**हायनार्क १२ लवतुल्यमायनं तद्युतीरस ६ युता युतिर्भवेत् ।**
**सापि सागर ४ युतोदुपोद्रुक तत्त्रिनेत्रा २३ लव एक पक्षकः ।।**
**पक्षः सपक्षको २ यदि वासरः स्यात् तदीयरामां ३ शसमस्तिथिस्यात् ।**
**यच्चाखिलैक्यं कुयमाहतं तत् नन्दाधिकं मत्शकवत्सराः स्युः ।।**[२]

अनेन ज्ञायते यच्छकाब्द १५००मिते बहुधान्यसंवत्सरे, याम्यायने, माघशुक्ल प्रतिपदायां भौमवासरे, धनिष्ठानक्षत्रे, परिघानाख्ययोगे चेयं टीकासमाप्तिर्जाता । यदा १५०० शकमिते अस्य ग्रन्थस्य टीकासमाप्तिर्जाता तदा ग्रन्थस्य टीकायाः आरम्भकालो कदा जात? एवं वार-नक्षत्र-योगानाञ्च साधनार्थं तत्रोक्तं यद् १५०० शकाब्दमिते माघशुक्लप्रतिपदायाः गणितप्रक्रियया वारनक्षत्रयोगादयश्च संजायन्ते । यदि गणेशकृत- विवाहवृन्दावनटीकायाः कालः अयमेवास्ति, तदानीं तस्यावस्था अशीतिवर्षाणि आयाति। यद्यत्र षोडशवर्षावस्थायां ग्रहलाघवस्य रचना मन्यते तदा विवाहवृन्दावनटीकायाः काले तदवस्था पञ्चसप्ततिर्वर्षाणि

[१] भा. ज्यो. पृ.सं. 390-91
[२] भा. ज्यो. पृ.सं. 360

आयाति । अयं सम्भवो नास्ति । भारतीयज्योतिषे प्रोक्तं यत् कोंकणप्रान्ते दापोलीतालुकस्य गुरुनामकग्रामे रघुनाथस्य पार्श्वे विवाहवृन्दावनटीकाया एकहस्तलिखिता प्रतिप्राप्तमिति तत्र लिखितं वर्तते "रसनगमनु-तुल्ये शाके आनन्दवर्षे" अर्थात् १४७९ शकाब्दमिते आनन्दनामकसम्वत्सरे अस्य ग्रन्थस्य रचना प्रकल्पिता, लेखोऽयं विश्वसनीयोऽस्ति ।[१]

आचार्यगणेशः न केवलं ज्योतिषशास्त्रस्य सिद्धान्तविषयोपरि टीकां कृतवान् अपि तु त्रयस्कन्धसम्बन्धिनां विषयाणां विवेचनमौलिकरूपेण टीकारूपेण वा कृतवान् । परन्तु तस्य प्रमुखः विषयः गणितमेवासीत् । स गणितशास्त्रे अधिकनिपुणमासीत् । तेषां कृतिषु मुहूर्त्तविषयकग्रन्थोऽपि विद्यते । एतेषां कृतित्वं समुपलभ्यते धर्मशास्त्रे अपि । आचार्यविश्वनाथदैवज्ञेन ग्रहलाघवस्य टीकायां विलिखितं वर्तते- श्रीमद्गुरुणा गणेशदैवज्ञेन ये ग्रन्थाः कृतास्ते तद्भ्रातृपुत्रेण नृसिंहज्योतिर्विदा स्वकृतग्रहलाघवस्य टीकायां निबद्धाः।[२] अर्थात् नृसिंहः गणेशदैवज्ञस्य भ्राता रामदैवज्ञस्य पुत्र आसीत् । आचार्यरामदैवज्ञः गणेशस्य लघुभ्रातृरूपेण मन्यते । तेन १४८० शकमिते "मध्यग्रहसिद्धि" नामकग्रन्थस्य रचना कृतेति ।[३] आचार्यविश्वनाथस्य गुरुर्मन्यते गणेशदैवज्ञमेतेषां ज्ञानं कर्तुं शक्यते पूर्वोक्तटीकायाः । तेन विरचिताः ग्रन्थाः सन्ति, यथा-

**कृत्वादौ ग्रहलाघवं लघुबृहत्तिथ्यादिचिन्तामणि**
**सत्सिद्धान्तशिरोमणौ च विवृत्तिं लीलावतीव्याकृतिम् ।**
**श्रीवृन्दावनटीकिकां च विवृत्तिं मौहूर्ततत्त्वस्य वै**
**सत्श्राद्धादिविनिर्णयं सुविवृत्तिं छन्दोर्णवास्यख्यै ।।**
**सुधीरञ्जनं तर्जनीयन्त्राकं च सुकृष्णाष्टमीनिर्णयं होलिकायाः ।**
**लघूपायपातस्तथान्यानपूर्वान् गणेशो गुरुर्ब्रह्मनिर्वाणमापत् ।।**[४]

आचार्यगणेशदैवज्ञेन विरचिताः ग्रहलाघवम्, लघुतिथिचिन्तामणिः बृहत्तिथिचिन्तामणिः श्राद्धनिर्णयः, सुधारञ्जनी, तर्जनीयन्त्राकम्, कृष्णजन्माष्टमीनिर्णयः

---

[१] भा. ज्यो. पृ.सं. 361
[२] भा. ज्यो. पृ.सं. 351
[३] भा. ज्यो. पृ.सं. 377
[४] भा. ज्यो. पृ.सं.359

होलिकानिर्णयादि क्रमेण ग्रन्थाः सन्ति । अन्योऽपि आचार्यकृतग्रन्थोपरि एतेषां टीका विद्यते यथोक्तं सिद्धान्तशिरोमणिटीका, लीलावती, विवाहवृन्दावनम्, मुहूर्त्तत्वप्रभृत्यादयश्च टीकाः सन्ति । तेषां प्रतिपाद्यग्रन्थेषु ग्रहलाघवम्, लघुतिथिचिन्तामणिः, बृहत्तिथिचिन्तामणिग्रन्थाः प्रसिद्धास्तेषु ग्रहलाघवमेव सज्ज्यौतिर्गणकैः आद्दतं लिखितं मुद्रितं च प्रायः सर्वत्रैव शोभते, यत्र बहूनां प्रगल्भणकानां च चमत्कृतं वासना, मण्डिता विवृत्तिश्च राजन्ति । अन्ये ग्रन्थाः अपि बहुना आयासेनोपलभ्यन्ते । ग्रन्थानां विषये तेनोक्तं विवाहवृन्दावनटीकायामपि-

**कृत्वादौ ग्रहलाघवाख्यकरणं तिथ्यादिसिद्धिद्वयं**
**श्लोकैः श्राद्धविधिं सवासनतया लीलावतीव्याकृतीम् ।**
**सप्रक्षेपमुहूर्त्ततत्त्वविवृत्तिं पर्वादिसन्निर्णयः**
**तस्मान्मङ्गलनिर्णयाद्यथकृता वैवाहसद्दीपिका ।।**[1]

सर्वप्रथमादौ ग्रहलाघवनामककरणग्रन्थस्य रचना कृता ज्याचापकर्मविना लाघवरूपतया गणेशेन । तदनन्तरं तिथिचिन्तामणिः, श्राद्धनिर्णयः, लीलावती, मुहूर्ततत्त्वटीका, पर्वादिग्रन्थानां रचना टीका वा कृताऽऽचार्येण । विवाहवृन्दावनटीकायामाचार्यः किञ्चित् ग्रन्थानामुल्लेखं न कृतवान् । एतादृशी प्रतीतिर्भवति यद् ग्रहलाघवस्यानन्तरं तिथिचिन्तामणिग्रन्थस्य रचना कृतेति । भारतवर्षेऽस्मिन् स्फुटग्रहसाधनं पञ्चाङ्गसाधनञ्च ग्रहलाघववशेनाद्यापि संजायते । अस्य ग्रन्थस्य चर्चा न देशे एव प्रत्युत् विदेशेऽपि विद्यते । सर्वेषु करणग्रन्थेषु अस्य ग्रन्थस्य मुख्यतमं स्थानं वर्तते । अस्य ग्रन्थस्य ग्रहगणितप्रक्रियाऽत्यधिकसूक्ष्मत्वात् ज्योतिर्विद्भिः स्वीक्रियते ग्रन्थोऽयम् । गणेशदैवज्ञस्य ग्रहलाघवकरणग्रन्थत्वेन पाण्डित्यं ज्ञायते यत् अद्यापि भारतवर्षे पञ्चाङ्गसाधनं तेन ग्रन्थेन निष्पद्यते । तत्र तिथ्यानयनं ग्रहलाघवग्रन्थेन क्रियते तत्साधने त्रिंशत्-पलानामन्तरं दृश्यते । अत्राचार्यकृततिथिचिन्तामणिग्रन्थस्य द्वयरूपेण विभज्यते, पूर्वभागस्य नाम लघुतिथिचिन्तमणिरपरा च बृहत्तिथिचिन्तामणिः भजिता । अस्य ग्रन्थस्य पूर्वभागे पञ्चाङ्गनिर्माणं सम्यग्रूपेण वर्णितमस्ति । एवमेव बृहत्चिन्तामणौ ये विषयाः निर्दिष्टाः सन्त्यस्य ग्रन्थस्यापरभागे च किञ्चिद् वैशिष्ट्यं प्रतिपादितम् । यथा लघुचिन्तामणौ सप्तदशश्लोकास्तथा

[1] ग.त. सुधाकरकृत पृ. 51 ।

बृहत्तिथिचिन्तामणौ सप्तविंशतिः श्लोकाः अभिहिताः सन्ति । आचार्यगणेशस्य पितृकृतग्रहकौतुकनामकग्रन्थे वेधप्रक्रिया सूक्ष्मरूपेण परिदृश्यते । सा सूक्ष्मत्वात् ज्योतिषज्ञैरनुमीयते यत् सः वेधप्रक्रियां दक्ष आसीत् । तेषां वेध-प्रक्रिया सरला समीचीना चासीत् । एवं १४४२ शकमिते आचार्यस्य ग्रन्थागतेन केशवस्य ग्रन्थो विलुप्तः संजातः । सः ग्रहकौतुकस्य मिताक्षरटीकायां प्रोक्तवान् यथा- ब्रह्मार्यभटसौरासिद्धान्तेषु ग्रन्थेषु बुधशुक्रयोर्महदन्तरं अङ्कतया दृश्यते । एवं वेधप्रक्रियया मन्दोच्चे, नक्षत्रग्रहयोगे उदयेऽस्ते च पञ्चभागा अधिकाः प्रत्यक्षमन्तरं दृश्यन्ते ।[१] अर्थात् ब्रह्मार्यभटसौरसिद्धान्तादिषु ग्रन्थेषु साधितग्रहाणां किञ्चिदन्तरं दृश्यते ग्रहकौतुकग्रन्थस्यापेक्षा । अत्र मूलसूर्यसिद्धान्तकारोक्तं यत् ब्रह्मगुप्तार्यभट्टभोजप्रभृत्यादि ज्योतिषज्ञानां विहाय एतेषां सदृशो ज्योतिषी अन्यो न जातः । आचार्यप्रवरेण ग्रहकौतुकजातकपद्धतिनामकग्रन्थयोः स्वमेव टीका कृतेति । प्राचीनग्रन्थेषु ग्रहाणामन्तरं दृष्ट्वा तच्चालनं साधितं वर्तते केशवेन । ग्रहलाघवकारेणोक्तं लघुचिन्तामणौ यद् ग्रन्थेऽस्मिन् ग्रहाणां स्पष्टसाधनं कृतवान् । सर्वेषु करणग्रन्थेषु ग्रहलाघवस्य अद्वितीयं स्थानं वर्तते, मानवजीवनेऽस्य ग्रन्थस्योपयोगिता मौलिकरूपेण दृश्यते । ग्रन्थेऽस्मिन् ग्रहाणां स्पष्टसाधनं ज्याचापकर्मरहितवशेन कृतमिति, ग्रन्थोऽयम् अत्यधिकसूक्ष्मत्वात् समाजेऽस्मिन् पञ्चाङ्गसाधनाय अद्यापि प्रयुज्यते । अस्य ग्रन्थस्य सर्वप्रथमं गंगाधरेण १५०७ शकमिते टीका कृतेति मनोरमानाम्नी । आचार्यकृतबृहत्तिथिचिन्तामणिग्रन्थोपरि विष्णुदैवज्ञेन सुबोधनीनाम्नाटीका विलिखिता। विष्णुदैवज्ञस्य मल्लारिः कनिष्ठः भ्राताऽऽसीत् । तेनापि ग्रहलाघवस्य टीका कृतेति, य भारतवर्षे प्रचलितोऽस्ति। ग्रन्थेऽस्मिन् टीकाकालः विलक्षणरीत्या विलिखितः । यथा-

**बाणोनाच्छकतः कुरामविद्धतान्मूलं हि मासः स युक्**
**बाणैर्भश्च दशोनितं दिनमितिस्तस्या दलं स्यात्तिथिः ।**
**पक्षः स्यात्तिथिसंमितोऽखिलयुतिः सप्ताब्धितिथ्युन्मिता**
**बालाख्यो गणको लिलेख च तदा टीकां परार्थं त्विमाम् ।।**[२]

[१] भा. ज्यो. पृ. सं. 358
[२] भा. ज्यो. पृ. सं. 386

अर्थात् १५२४ शकाब्दमितेऽश्विनशुक्लप्रतिपदायां सोमवासरे उत्तराफाल्गुनीनक्षत्रे बालनामकगणकः इमां टीकां कृतवान् । अस्य रचनाकालोऽपि अयमेव भविष्यति, यतोहि कालोऽयं विस्वनाथस्य तुल्यं प्राप्नोति । अस्यां टीकायां मल्लारिणा ग्रहलाघवस्योपपत्तिर्विलिखिता वर्तते । अस्य ग्रन्थस्योपपत्तिः सिद्धान्तस्योपपत्तेरपेक्षया कठिना वर्तते, मल्लारिमहोदयेन कार्यमिदं उत्तमरीत्या सम्पन्नं कृतमिति । आचार्यविश्वनाथेन १५३४ शकाब्दमिते अस्य ग्रन्थस्य टीका कृता, तट्टीकायामुपपत्तिर्सम्बन्धिश्चर्चा नास्ति । एवं कृष्णशास्त्रीगोडबोलमहोदयेन ग्रहलाघवस्यान्ते त्रयः श्लोकाः प्रदत्ताः सन्ति । तेन विलिखितं यद् ग्रहलाघवनिर्माणाय २११ वर्षानन्तरं विश्वनाथेन दृक्प्रत्ययस्य कृते बीजसंस्काराः प्रदत्ताः । विश्वनाथस्य कालः शकाब्द १६५३ मितो अस्ति ।[१] परन्तु ग्रहलाघवटीकाकारेण कालोऽयं निर्विवादः सिद्धः।

[१] भा. ज्यो. पृ. सं. 387

# द्रेष्काणस्वरूपं तत्प्रयोजनञ्च

**डा. मुरलिकृष्णः टि.**

संविदाध्यापकः, ज्यौतिषविभागः

**विषयसारः-** सिद्धान्तः, संहिता, होरेति ज्योतिश्शास्त्रस्य त्रयः स्कन्धाः। फलादेशशास्त्रत्त्वेन लोके प्रसिद्धे होराशास्त्रे प्रकृतविचारोऽयमन्तर्भवति। ग्रहाणां शुभाशुभफलनिर्णयाय विविधाः वर्गाश्चिन्तनीया इति वयं विद्मः। वर्गेषु षड्वर्गाः, सप्तवर्गाः, दशवर्गाः, षोडशवर्गाः वा प्रसिद्धाः। किन्तु विद्यमानेषु षड्वर्गाणां प्रसिद्धिरधिका। तत्रापि द्रेष्काणस्यास्त्यनितरसाधारणं वैशिष्ट्यम्। द्रेष्काणाधिपतेः बलाबलेन सह तत्स्वरूपं चिन्तयेदिति शास्त्रोक्तिः। अर्थात् होराशास्त्रोक्तपद्धत्या प्रश्नशास्त्रोक्तसरण्या वा द्वित्रिसंवादेन फलनिर्णयार्थं द्रेष्काणस्वरूपाणि दैवज्ञानां स्मृतिपटले दृढानि स्युः। तदिह यथाशास्त्रं स्पष्टीक्रियते।

### ❀ प्रस्तावना – द्रेष्काणपरिचयः।

त्रिस्कन्धात्मके ज्योतिश्शास्त्रे पूर्वजन्मार्जितकर्मणः फलाभिव्यञ्जकं शास्त्रं होराशास्त्रम्। इह तावद्द्वित्रिसंवादात्फलादेशो दैवज्ञाय बहवस्सम्भाराः अपेक्ष्यन्ते। तेषु षड्वर्गाः अन्यतमाः, षड्वर्गेष्वप्यन्यतमः द्रेष्काणः। अयञ्च फलादेशोपयोगिषु सम्भारेषु प्रमुख इत्युक्तावतिशयोक्तिर्न जायेत। द्रेष्काणो नाम राशेस्त्रिभागः।[१] तस्मादेकस्य द्रेष्काणस्य मानं दशांशाः ($10^{\circ}$)। यतः त्रिंशदंशात्मकस्यैकस्य राशेः त्रिधा विभागे एको भागः दशांश (३०°/३ = १०°) इत्यनुक्तेऽपि ज्ञायते । प्रत्येकस्मिन् राशौ प्रथम-पञ्चम-नवमानामधिपाः यथाक्रमं द्रेष्काणत्रयस्याधिपत्यं वहन्ति । तदुक्तं खल्वाचार्येण मिहिरेण यथा- **द्रेष्काणास्स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्।**[२] इति । अतः मेषे मेष-सिंह-धनुषामधिपा क्रमशः कुज-रवि-गुरवः एव प्रथम-द्वितीय-तृतीय-द्रेष्काणानामधिपाः भवन्ति। एवमन्येषां

---

[१] द्रेष्काणः द्रेक्काणः दृगाणः दृक्काण इति समानार्थकाश्शब्दाः।

[२] बृ. जा – १अ. ११श्लो.। श्री-सीताराम-झा-सम्पादिते बृहज्जातके द्रेष्काणविचारं निरूपयन् टिप्पण्यामेवमाह – **'द्रेक्क-द्रेक्काण-दृक्काण भवन्ति च दृकाणवत्' इति परद्विरूपकोशः। तथा 'दृग्ज्ञाने ज्ञातरि त्रिषु, कणोऽतिसूक्ष्मे' इति चामरकोशः। कणस्यातिसूक्ष्मस्य भावः काणो धर्मः स्यात्तेन स्वकीयबुद्धिधर्मयोर्विचारार्थभागो द्रेक्काणांशः कथ्यतेऽत एव प्रथम-पञ्चम-नवमपा एव तत्पतयो भवितुमर्हन्तीति दिक्। अथवा 'रूपात् कटपयपूर्वैर्वर्णैर्वर्णक्रमाद्भवन्त्यङ्काः।' इति महासिद्धान्तनियमात्, दृक् = ८१, द्वादशतष्टितशेषे ९, का=१, ण=५ (दृकाणाः ९, १, ५) अत एव 'दृक्काणः प्रथमपञ्चमनवपानाम्' इति स्फुटं सिद्ध्यतीति।**

द्रेष्काणानामाधिपत्यं चिन्तयेत्।[१]

- **होराशास्त्रोक्तानां द्रेष्काणस्वरूपाणां स्मृत्युपायः।** - भचक्रस्थाः षड्त्रिंशद्द्रेष्काणाः फलादेशार्थमत्यन्तमुपकुर्वन्ति। वराहमिहिरः बृहज्जातकस्य सप्तविंशेऽध्याये[२] द्रेष्काणस्य स्वरूपं स्पष्टीचकार।[३] तत्रोक्तैः **द्रेष्काणरूपं यवनोपदिष्टमि**त्यादिभिः वाक्यैः ज्ञायते यदयं क्रमः यवनैरुपात्त इति।[४] बृहज्जातकस्थान् श्लोकान् स्मर्तुं कञ्चनामोघमुपायमित्थमुपावर्णयत् प्रश्नमार्गकारः -

**कट्यां रक्ताम्बरा क्रूरः कुञ्चित-क्षेत्रधा-द्विप**
**सूच्यो-द्या-भूषितः पत्र-पद्मा-भार्याभ-शाल्मलेः।**
**हय-क्षानन-पुष्पप्र-पुरुषः प्रगृहीत-गौ-**
**वीथी-कल-विभी-वस्त्रैर्विही-स्थानसुखा-पृथुः ॥**
**मनु-र्मनोर-कूर्ची-रो-कला-कि-स्नेहमद्यज-**
**दग्धे श्यामः स्रुग-भ्युच्छि-श्वभ्रेत्यादिभिरीरिता।**
**मेषाद्याद्या झषान्त्यान्ता द्रेक्काणाः स्वस्वरूपतः**
**वस्त्रास्त्रभूषणाकारान् वदेच्चोरस्य तत्समान् ॥**[५]

बृहज्जातकस्य द्रेष्काणस्वरूपाध्यायोक्तानां श्लोकानामादिमशब्दस्थान्यक्षराणि गृहीत्वा श्लोकोऽयं रचितः। अनेन षड्त्रिंशच्छ्लोकाः क्रमशः स्मर्यन्ते यथा - (१) **कट्यां** सितवस्त्रवेष्टितः... (२) **रक्ताम्बरा** भूषणभक्ष्यचित्ता... (३) **क्रूरः** कलाज्ञः... (४) **कुञ्चित**लूनकचा... (५) **क्षेत्रधा**न्यगृहधेनुकलाज्ञः... (६) **द्विप**समकायः... (७) **सूच्या**श्रयं समभिवाञ्छति... (८) **उद्या**नसंस्थः कवची... (९) **भूषितो** वरुणवद्बहुरत्नो... (१०) **पत्र**मूलफलभृद् द्विपकायः... (११) **पद्मा**र्चिता मूर्धनि... (१२) **भार्याभ**रणार्थमर्णवं... (१३) **शाल्मले**रुपरि... (१४) **हया**कृतिः पाण्डुर... (१५) **ऋक्षानन**नो वानरतुल्यचेष्टो... (१६)

---

[१] द्रेष्काणविभागप्रदर्शके कोष्ठके तद्द्रष्टव्यम्।

[२] रुद्रव्याख्यामनुसृत्य पञ्चविंशः अध्यायोऽयम्।

[३] सारावल्याः ४९तमः अध्यायः द्रेष्काणपरकः।

[४] किन्तु प्रयोगकुशलाः दैवज्ञास्तावदेनं शब्दमर्थबहुलत्त्वेन स्वीकृत्य, अपेक्षायां सत्यां यवनजनान् यवनदेशं वा चिन्तयन्ति।

[५] प्र. मा. - २९अ. ४३-४४श्लो.

**पुष्पप्रपूर्णेन**... (१७) **पुरुषः** प्रगृहीतलेखनिः... (१८) **गौरी** सुधौताग्रदुकूलयुक्ता... (१९) **वीथ्यन्तरापणगतः**... (२०) **कलशं** परिगृह्य... (२१) **विभीषयंस्तिष्ठति**... (२२) **वस्त्रैर्विहीनाभरणैश्च**... (२३) **स्नानसुखान्यभिवाञ्छति**... (२४) **पृथुलचिपिटकूर्मतुल्यवक्त्रः**... (२५) **मनुष्यवक्त्रोऽश्वसमानकायो**... (२६) **मनोरमा** चम्पकहेमवर्णा... (२७) **कूर्ची नरो** हाटकचम्पकाभो... (२८) **रोमचितो** मकरोपमदंष्ट्रः... (२९) **कलास्वभिज्ञाब्जदलायताक्षी**... (३०) **किन्नरोपमतनुः** सकम्बलः... (३१) **स्नेहमद्यजल**भोजनागमव्याकुलीकृतमनाः... (३२) **दग्धे शकटे** सशाल्मले... (३३) **श्यामः** सरोमश्रवणः... **(३४) स्रुग्**-भाण्डमुक्तामणिशङ्खमिश्रैः... **(३५) अभ्युच्छ्रितध्वजपताकमुपैति**... (३६) **श्वभ्रान्तिके** सर्पनिवेष्टिताङ्गो...। श्लोकोक्तस्वरूपाधारेण द्रेष्काणभेदाः निर्धार्यन्ते। इह तावत्प्रत्येकं श्लोकस्य व्याख्यानं न विधीयते। तत्रोक्तस्वरूपान्निर्दिश्यमानः द्रेष्काणविभागः अग्रे प्रदर्श्यते।

- **द्रेष्काणस्वरूपात् विभागभेदः।**

अधुना विविधेषु ग्रन्थेषु निर्दिष्टान् द्रेष्काणविभागान् परिशीलयामः। होराशास्त्रानुरोधेन शुभाशुभफलनिर्देशार्थं द्रेष्काणधिपतीनां बलाबलनिर्णयेन सह उद्यतायुध-निगड-पाशादिभेदान्, पुंस्त्र्यादिभेदान् क्रूरसौम्यादिभेदांश्च दैवज्ञः जानीयात्।

- **प्रश्नमार्गकारस्य मतेन** – प्रश्नमार्गकारस्त्वेवमाह -

**सिंहाजाश्वितुलानृयुग्मभवनेष्वन्त्या हयाजादिमाः**
**मध्यौ स्त्रीयमयोरिहायुधभृतः पाशोलिमध्यो भवेत् ।**
**नक्राद्यो निगलो मृगेन्द्रघटयोराद्यो वणिङ्मध्यमो**
**गृध्रास्यो वृषभान्तिमश्च विहगः कर्क्यादिकोलाननम् ॥**[1]

सिंह-मेष-धनु-तुला-मिथुनराशिषु अन्त्यः, धनु-मेषयोरादिमः, कन्यामिथुनयोः मध्यश्च आयुधभृद्द्रेष्काणाः। वृश्चिकस्य मध्यः पाशद्रेष्काणः। मकरस्य प्रथमः निगलद्रेष्काणः। सिंहकुम्भयोः प्रथमः, तुलायाः मध्यश्च गृध्रास्यद्रेष्काणः। वृषभस्यान्तिमः पक्षिद्रेष्काणः।[2]

---

[1] फ.दी. – ३ वर्गभेदा. १३श्लो.

[2] गृध्रोऽपि पक्ष्येव, **शरभसमाङ्घ्रिः** इत्यभिधानात्। अन्यच्च **खगे दृगाणे बलसंयुतेन वा** इति होरायाः वियोनिजन्माध्यायोक्तपद्यस्य व्याख्याने **भट्टोत्पलस्तु** मिथुनद्वितीयः, सिंहप्रथमः, तुलाद्वितीयः, कुम्भप्रथमः पक्षी इत्याह। **रुद्रस्तावत्** मिथुनतुलयोर्मध्यमे सिंहकुम्भयोः प्रथमे पक्षिद्रेष्काण इत्याह।)

कर्कस्य प्रथमः कोलद्रेष्काणः[१] भवेत्।

- **मन्त्रेश्वरस्य मतेन** – फलदीपिकायाः प्रणेता मन्त्रेश्वरः द्रेष्काणरूपमेवमाह-

**कौर्प्याद्यः कर्कटान्त्यो झषचरममहिश्चाजगोमध्यसिंहा-**
**द्यल्यन्त्यं स्याच्चतुष्पादिह फलमधनक्रूरनिन्द्या दरिद्राः।**
**द्वन्द्वर्क्षे स्युर्दृगाणैरधमसमशुभान्यस्थिरे चोत्क्रमेण**
**प्राहुस्तज्ज्ञाः स्थिरर्क्षेष्वशुभशुभसमान्येव लग्ने फलानि॥**[२]

वृश्चिकस्य प्रथमः कर्कट-मीनयोरन्तिमस्सर्पद्रेष्काणः, मेष-वृषयोर्मध्यः, सिंहस्य प्रथमः, वृश्चिकस्यान्त्यश्च चतुष्पाद् द्रेष्काणः स्यात्। अत्रोक्तेषु कस्मिंश्चिदशुभद्रेष्काणगे लग्ने उत्पन्नाः निर्धनाः क्रूराः निन्द्याः दरिद्राश्च जायन्ते। अस्मिन्नेव श्लोके **द्रेष्काणः शुभ-सम-अशुभभेदात् त्रिधेति** पुनरन्यं विभागं प्रादर्शयत्। तन्नाम द्विस्वभावराशिषु प्रथमद्रेष्काणः अशुभः, द्वितीयः मध्यः, तृतीयः शुभश्च। स्थिरराशिषु प्रथमः अशुभः, द्वितीयः शुभः, तृतीयः समश्च। चरराशिषु उभयराशीनामुत्क्रमेण अर्थात् प्रथमः शुभः, द्वितीयः मध्यः, तृतीयः अशुभश्चेति शुभाशुभसमभेदान् चिन्तयेत्।[३]

- **वैद्यनाथस्य मतेन** – जातकपारिजातस्य प्रणेता वैद्यनाथः द्रेष्काणस्वरूपं विचारयन्नेवमाह -

**कुलीरमीनालिगता दृगाणाः मध्यावसानप्रथमा भुजङ्गाः।**
**अलिद्वितीयो मृगलेयपूर्वः क्रमेण पाशो निगडो विहङ्गः॥**[४]

कर्कस्य द्वितीयः, मीनस्य तृतीयः, वृश्चिकस्य प्रथमश्च सर्पद्रेष्काणः। वृश्चिकस्य द्वितीयः

---

[१] कोलः=सूकरः।

[२] फ.दी. – ३ वर्गभेदा. १४श्लो. ।

[३] वस्तुतस्तु बृहज्जातके दशान्तर्दशाध्याये लग्नदशायाः शुभाशुभनिरूपणार्थमुक्तं खलु यथा –
**उभयेऽधममध्यपूजिता द्रेष्काणैश्चरभेषु चोत्क्रमात्।**
**अशुभेष्टसमाः स्थिरे क्रमाद्धोरायाः परिकल्पिता दशा ॥**[३]
उभयराशिस्थद्रेक्काणैः (क्रमात्) अधम-मध्य-पूजिता, चरभेषु उत्क्रमात् च (स्यात्) । स्थिरे क्रमात् अशुभ-इष्ट-समाः होरायाः दशा परिकल्पिता । अयं क्रमः दशाफलचिन्तनार्थमेवेति न। किञ्च लग्नस्य शुभाशुभफलनिरूपणार्थमपि प्रयोक्तुं शक्य इति जानीयात्।

[४] जा. पा. – ५ आयुर्दाय. ५५ श्लो.

पाशः, मकरस्य प्रथमः निगडः, सिंहस्य प्रथमः पक्षी चेति संज्ञकाः द्रेष्काणास्स्युः।[१]

**कण्ठीरवाजघटकीटमृगाननाद्या मीनालिसिंहवणिगन्त्यगता दृकाणाः ।**

**क्रूरा भवन्ति कटकस्य सरीसृपस्य मध्यस्थितश्च बहुशः प्रवदन्ति सन्तः ॥**[२]

सिंह-मेष-कुम्भ-कर्क-मकरराशीनां प्रथमः, मीन-वृश्चिक-सिंह-तुलाराशीनां तृतीयः, कर्क-वृश्चिकयोः द्वितीयश्च क्रूरद्रेष्काणाः स्युः।

**कुलीरमीनादिगतौ दृकाणौ मीनाङ्गनामन्दिरमध्यगौ च ।**

**गोयुग्मयोरन्त्यगतत्रिभागौ भवन्ति षट् तोयचरा दृकाणाः ॥**[३]

कर्क-मीनयोः प्रथमः, मीनकन्ययोः द्वितीयः, वृष-मिथुनयोः तृतीयश्चेत्थं षड्द्रेष्काणाः **जलचराः** स्युः।

**मेषाश्विगोकुम्भमृगद्वितीयस्तुलाधरस्त्रीयुगपूर्वभागः ।**

**चापाङ्गनातोयधरान्त्ययाता दृकाणसंज्ञाः प्रभवन्ति सौम्याः ॥**[४]

मेष-धनु-वृष-कुम्भ-मकराणां द्वितीयः, तुला-कन्या-मिथुनराशीनां प्रथमश्च, धनु-कन्या-कुम्भराशीनामन्तिमश्च द्रेष्काणाः सौम्याः भवन्ति।

**मृगाजकर्क्यन्त्यगता दृकाणा वृषस्य चापस्य च पूर्वयातौ ।**

**नृयुग्मतौलीहरिमध्यगास्ते विमिश्रसंज्ञा इति संवदन्ति ॥**[५]

मकर-मेष-कर्कराशीनां तृतीयः, धनु-वृषभयोः प्रथमः, मिथुन-तुला-सिंहराशीनां द्वितीयश्चेत्याहत्याष्टौ द्रेष्काणाः विमिश्रसंज्ञका इति मनीषिणः वदन्ति।

- **मुहूर्त्तशास्त्रोक्तः विषद्रेष्काणः** - मुहूर्तपदव्यामन्नप्राशनमुहूर्ते विषद्रेष्काणस्य त्याज्यत्त्वमुक्तम्।[६] वरदीपिकाकारः गरल(विष)द्रेष्काणं विचारयन्नाह यथा-

---

[१] फलदीपिकापेक्षया विभागोऽत्र भिद्यते।

[२] जा. पा. – ९ मान्यब्दा. ११३ श्लो.

[३] जा. पा. – ९ मान्यब्दा. ११४ श्लो.

[४] जा. पा. – ९ मान्यब्दा. ११५ श्लो.

[५] जा. पा. – ९ मान्यब्दा. ११६ श्लो.

[६] मु. प. – १४ श्लो। षष्ठे मास्यशनं न सप्तम इह त्याज्यो हरेर्वासरो
ज्येष्ठाऽर्द्रायमकृत्तिकोरगमघाः पूर्वाविशाखासुराः ।
रन्ध्रेऽसृग्वपुषीन्दुरम्बुनि गुरुर्झेन्दू शुभे खेऽखिलाः
भौमक्षेत्रझषार्धरात्र**गरलद्रेकाण**जन्मोडु च ॥

**कीटेऽन्त्यो घटगोवीणातुलामीनेषु मध्यमः।**

**आद्योऽन्येषु दृगाणोऽसौ विषाख्यो मृत्युदर्शितः॥**[१]

वृश्चिके अन्तिमः, कुम्भ-वृष-मिथुन-तुला-मीनानां द्वितीयः, अन्येषु राशिषु (मेष-कर्क-सिंह-कन्या-धनु-मकराणाम्) प्रथमः द्रेष्काणः गरलसंज्ञकः।

- **उत्थितादिभेदाः** - प्रथमद्रेष्काणः उत्थितः, द्वितीयः शयितः, अन्तिमः उपविष्टः इति भेदत्रयम्। अनेनापेक्षिते स्थाने उत्थिताद्यवस्था ज्ञेया। होराकृष्णीयस्य वाक्यमिदम् –

**द्रेष्काणो भवनादावुत्थित इति कीर्त्यतेऽन्त्य उपविष्टः।**

**मध्ये शयितो ज्ञेयस्तेषु च भावास्तथा योज्याः॥**[२]

प्रश्नमार्गेऽप्युक्तं यथा –

**द्रेक्काणः प्रथमस्तु तिष्ठति तथैवास्तेऽन्तिमो मध्यमः**

**शेते सर्वग्रहेषु योज्यमखिलेष्वेतद्धि चोरादिषु।**[३]

- **द्रेष्काणानामाकृतयः** - होराकृष्णीये द्रेष्काणतः नष्टद्रव्यस्याकृतयः निर्दिश्यन्ते। आद्यद्रेष्काणस्थे ग्रहे लग्ने वा नष्टद्रव्यं चतुष्कोणं, मध्यद्रेष्काणे त्रिकोणम्, अन्त्यद्रेष्काणे वृत्तमिति च वदेत्।[४] तद्यथा –

**आदौ चतुरस्रमपि त्र्यंशं मध्ये ग्रहाः प्रकुर्वन्ति।**

**राश्यवसाने वृत्तं स्वरूपतुल्यं हि वा कुर्युः॥**[५]

- **खरद्रेष्काणः** - **खरेश्वरो मारकग्रहः** इत्युक्तिः प्रसिद्धा।[६] बृहज्जातके निर्याणस्य कारणमुक्तम् यथा-

**द्वाविंशः कथितस्तु कारणं द्रेष्काणो निधनस्य सूरिभिः।**

**तस्याधिपतिर्भवोऽपि वा निर्याणं स्वगुणैः प्रयच्छति॥**[७]

अनेन खरद्रेक्काणाधिपतेः तुल्यं निर्याणं वदेदित्यर्थः। खरद्रेष्काणस्तु यथेति

[१] मु. प. – १४ श्लो., वरदीपिकाव्याख्याने।

[२] हो. कृ. – २७अ. ३श्लो.

[३] प्र. मा. - २९अ. ४२श्लो.

[४] अथवा स्वरूपतुल्याकृतिरपि।

[५] हो. कृ. – १७अ. १श्लो.

[६] जातकपारिजातस्य कपिलेश्वरव्याख्याने स्मृतम्।

[७] बृ. जा. – २५ निर्याण. ११ श्लो.

जातकपारिजातकारः -

**विलग्नजन्मद्रेक्काणाद्यस्तु द्वाविंशातिः खरः।**

**सुधाकरोपगांशर्क्षाच्चतुःषष्ट्यंशको भवेत्॥** [1]

लग्नाद्वाविंशः द्रेष्काणस्तथा चन्द्रस्थितनवांशाच्चतुष्षष्ट्यंशकः खर इति संज्ञयाऽभिधीयते।[2] पूर्वोक्ताः विभागाः स्थिराः। किन्त्वयं विभागः षड्विंशत्सु द्रेष्काणेषु यः कोऽपि भवितुमर्हति। यतः लग्नचन्द्रयोरधीनत्त्वात्।

| **द्रेष्काणविभागप्रदर्शकं चक्रम्।** | | | | |
|---|---|---|---|---|
| **राशिः** | **द्रेष्काण-सञ्ज्ञा** | **अधिपः** | **पुं/स्त्री** | **निगड/ पाशादिविभागः** |
| मेषः | १ | कुजः (मेषः) | पुं | विषः, क्रूरः, उत्तमः, उत्थितः, चतुष्कोणम् |
| | २ | रविः (सिंहः) | स्त्री | चतुष्पात्, सौम्यः, मध्यमः, शयितः, त्रिकोणम् |
| | ३ | गुरुः (धनुः) | पुं | आयुधभृत्, विमिश्रः, अधमः, उपविष्टः, वृत्तम् |
| वृषभः | १ | शुक्रः (वृषः) | स्त्री | विमिश्रः, अधमः, साग्निकः, उत्थितः, चतुष्कोणम् |
| | २ | बुधः (कन्या) | पुं | चतुष्पात्, विषः, सौम्यः, उत्तमः, शयितः, त्रिकोणम् |
| | ३ | शनिः(मकरः) | पुं | विहगः, जलचरः, मध्यमः, उपविष्टः, वृत्तम् |
| मिथुनम् | १ | बुधः मिथुनम्) | स्त्री | अधमः, उत्थितः, चतुष्कोणम् |
| | २ | शुक्रः (तुला) | पुं | आयुधभृत्, विमिश्रः, मध्यमः, शयितः, त्रिकोणम् |
| | ३ | शनिः(कुम्भः) | पुं | आयुधभृत्, विषः, जलचरः, उत्तमः, उपविष्टः, वृत्तम् |
| कर्कः | १ | चन्द्रः (कर्कः) | पुं | सूकरः, विषः, क्रूरः, जलचरः, उत्तमः, उत्थितः, चतुष्कोणम् |
| | २ | कुजः(वृश्चिकः) | स्त्री | क्रूरः (सर्पः), मध्यमः, शयितः, त्रिकोणम् |

[1] जा. पा. – ५ आयुर्दाय. ५६ श्लो.

[2] बृहज्जातककारेण लग्नाद्वाविंशः द्रेष्काण एव खरत्त्वेन गृहीतः। किन्तु पारिजातकारेण चन्द्रनवांशाच्चतुष्षष्ट्यंशकोऽपि खरत्त्वेन गृह्यते।

| | | | | |
|---|---|---|---|---|
| | ३ | गूरुः (मीनः) | पुं | सर्पः, विमिश्रः, अधमः, उपविष्टः, वृत्तम् |
| सिंहः | १ | रविः (सिंहः) | पुं | गृध्रः, चतुष्पात्, विषः, क्रूरः (निगडः), अधमः, उत्थितः, चतुष्कोणम् |
| | २ | गुरुः (धनुः) | पुं | आयुधभृत्, विमिश्रः, उत्तमः, शयितः, त्रिकोणम् |
| | ३ | कुजः (मेषः) | पुं | आयुधभृत्, क्रूरः, मध्यमः, उपविष्टः, वृत्तम् |
| कन्या | १ | बुधः (कन्या) | स्त्री | विषः, सौम्यः, अधमः, उत्थितः, चतुष्कोणम् |
| | २ | शनिः (मकरः) | पुं | आयुधभृत्, जलचरः, मध्यमः, शयितः, |
| | ३ | शुक्रः (वृषः) | स्त्री | सौम्यः, उत्तमः, उपविष्टः, वृत्तम् |
| तुला | १ | शुक्रः (तुला) | पुं | सौम्यः, उत्तमः, उत्थितः, चतुष्कोणम् |
| | २ | शनिः (कुम्भः) | पुं | गृध्रः, विषः, विमिश्रः, मध्यमः, शयितः, त्रिकोणम् |
| | ३ | बुधः मिथुनम्) | पुं | आयुधभृत्, क्रूरः, अधमः, उपविष्टः, वृत्तम् |
| वृश्चिकः | १ | कुजः(वृश्चिकः) | स्त्री | सर्पः (सर्पः), अधमः, उत्थितः, चतुष्कोणम् |
| | २ | गुरुः (मीनः) | स्त्री | पाशः, क्रूरः (पाशः), उत्तमः, शयितः, त्रिकोणम् |
| | ३ | चन्द्रः (कर्कः) | पुं | चतुष्पात्, विषः, क्रूरः, मध्यमः, उपविष्टः, वृत्तम् |
| धनुः | १ | गुरुः (धनुः) | पुं | आयुधभृत्, विषः, विमिश्रः, अधमः, उत्थितः, चतुष्कोणम् |
| | २ | कुजः (मेषः) | स्त्री | सौम्यः, मध्यमः, शयितः, त्रिकोणम् |
| | ३ | रविः (सिंहः) | पुं | आयुधभृत्, सौम्यः, उत्तमः, उपविष्टः, वृत्तम् |
| मकरः | १ | शनिः (मकरः) | पुं | निगलः, विषः, क्रूरः (निगडः), उत्तमः, उत्थितः, चतुष्कोणम् |
| | २ | शुक्रः (वृषः) | स्त्री | सौम्यः, मध्यमः, शयितः, त्रिकोणम् |
| | ३ | बुधः (कन्या) | पुं | विमिश्रः, अधमः, उपविष्टः, वृत्तम् |
| कुम्भः | १ | शनिः (कुम्भः) | पुं | गृध्रः, क्रूरः, अधमः, उत्थितः, चतुष्कोणम् |
| | २ | बुधः(मिथुनम्) | स्त्री | विषः, सौम्यः, उत्तमः, साग्निकः, शयितः |

| | | | | |
|---|---|---|---|---|
| | ३ | शुक्रः (तुला) | पुं | सौम्यः, मध्यमः, उपविष्टः, वृत्तम् |
| मीनः | १ | गुरुः (मीनः) | पुं | जलचरः, अधमः, उत्थितः, चतुष्कोणम् |
| | २ | चन्द्रः (कर्कः) | स्त्री | विषः, जलचरः, मध्यमः, शयितः, त्रिकोणम् |
| | ३ | कुजः(वृश्चिकः) | पुं | सर्पः, क्रूरः (सर्पः), उत्तमः, उपविष्टः, वृत्तम् |

- **द्रेष्काणस्वरूपाणां प्रयोजनम् -**

होराशास्त्रोक्तपद्धत्या जातकफलनिर्देशार्थं, क्वचिन्मुहूर्तशास्त्रोक्तक्रमेण सुमुहूर्तमादेष्टुं, प्रश्नशास्त्रोक्तसरण्या फलनिर्णयार्थञ्च संवादार्थमिमानि द्रेष्काणस्वरूपाणि दैवज्ञोपकारकाण्युपकरणानि स्युः। गरलद्रेष्काणस्य, शुभाशुभमध्येति विभागस्य, चतुष्कोण-त्रिकोण-वृत्तानाञ्च प्रयोजनं पूर्वं विमृष्टम्। भट्टोत्पलस्तु द्रेष्काणस्वरूपप्रयोजनं निरूपयन्नाह यथा–

**द्रेष्काणाकारचेष्टागुणसदृशफलं योजयेद्वृद्धिहेतोः**
**द्रेष्काणे सौम्यरूपे कुसुमफलयुते रत्नभाण्डान्विते च ।**
**सौम्यैर्दृष्टे जयः स्यात् प्रहरणसमये पापदृष्टे च भङ्गः**
**सम्मोहो वाऽथ बन्धः सभुजगनिगडे पापयुक्ते पिपासुः ॥**[1]

सौम्यरूपे कुसुमफलयुते रत्नभाण्डान्विते च द्रेष्काणे उदिते जाते चिन्तनीयस्य विषयस्य वृद्धिं वदेत्। सौम्यैर्दृष्टे जयं वदेत्। प्रहरणाकारे पापदृष्टे च भङ्गं वा सम्मोहं वदेत्। सर्प-भुजग-निगडेषु बन्धं वदेत्। अत्र पापयुक्ते पिपासां वदेत्।

कल्याणवर्मा सारावल्याः ४९तमे अध्याये द्रेष्काणस्वरूपं स्पुटमचिचित्रत्। अध्यायान्ते तस्योपयोगं एवमवोचत्-

**इतीरितोऽयं स्वगुणस्वभावो द्रेक्काणजानां गुणविद्धिकल्पैः ।**
**द्रेक्काणभे वीर्यवति स्वदृष्टे द्रेक्काणकल्पं तु फलं विदध्यात् ॥** [2]

तन्नाम द्रेष्काणराशिः बलिष्ठे तदधिपेन दृष्टे वा द्रेष्काणस्वरूपोक्तं फलं समग्रं वदेत्। बृहज्जातकस्याश्रययोगाध्याये द्रेष्काणफलनिरूपणक्रमं यथाह –

[1] बृ. जा. - २५अ. ३६ श्लो. भ. व्या.।; अयं श्लोकः वराहमिहिराचार्यविरचितायाः योगयात्रायाः इत्याह भट्टोत्पलः।

[2] सारा. - ४९ अ. ३७ श्लो.

**कल्याणरूपगुणमात्मसुहृद्दृकाणे**

**चन्द्रोन्यगस्तदधिनाथगुणं करोति ।**

**व्यालोद्यतायुधचतुश्चरणाण्डजेषु**

**तीक्ष्णोऽतिहिंस्रगुरुतल्परतोऽटनश्च ॥**[१]

अर्थात् स्वकीये सुहृदि वा द्रेष्काणे स्थितश्चन्द्रः प्रशस्तगुणयुक्तं पुरुषं जनयति । चन्द्रद्रेष्काणाधिपः चन्द्रेण सह समः शत्रुर्वा तदा मध्यमरूपान्वितं गुणयुक्तं च जनयति।

सर्पद्रेष्काणस्थे चन्द्रे तीक्ष्णः, उद्यतायुधद्रेष्काणस्थे अतिहिंस्रः, चतुष्पाद्द्रेष्काणस्थे गुरुतल्परतः, पक्षिद्रेष्काणस्थे अटनश्च भवति ।[२] पूर्वोक्तातिदेशेन लग्नद्रेष्काणफलमपि चिन्त्यम् । फलदीपिकायां यथोक्तम् -

**कुर्यादात्मसुहृद्दृगाणगशशी कल्याणरूपं गुणं**

**श्रेयांस्युत्तमवर्गजस्त्वपरगस्तन्नाथजातान् गुणान् ।**

स्वत्रिंशांशगता ग्रहा विदधते तत्कारकत्वोदितं

**तत्रैकोऽपि सुहृद्ग्रहेक्षितयुतः स्वोच्चेऽर्थयुक्तं नृपम् ॥**[३]

जातकपारिजातोक्तिर्यथा -

**क्रूरद्रेष्काणजातः खलमतिरटनः पापकर्माऽपवादी।**

**दाता भोगी दयालुः कृषिसलिलधनस्तोयभागे विशीलः ।**

**सौम्यद्रेकाणजो यस्सुखधनतनयश्चारुरूपो दयालु-**

**र्जातो मिश्रे कुशीलः परयुवतिरतः क्रूरदृष्टिश्चलात्मा ॥**[४]

जन्मलग्नस्थद्रेष्काणात् फलं वाच्यम्। क्रूरद्रेष्काणजातः मूर्खः, पापकर्मा, अपवादी च जायते। जलचरद्रेष्काणजः दाता, भोगी, दयालुः, कृषिकर्मणा जलचरवस्तुना वा धनवान्

---

[१] बृ. जा. – १९ आ.यो.अ. ६श्लो.

[२] कर्कस्य द्वितीयतृतीयौ, वृश्चिकस्य प्रथमद्वितीयौ, मीनस्य तृतीयश्च सर्पः। मेषस्य प्रथमतृतीयौ, मिथुनस्य द्वितीयतृतीयौ, सिंहस्य द्वितीयतृतीयौ, कन्यायाः द्वितीयः, तुलायाः तृतीयः, मकरस्य तृतीयश्च उद्यतायुधः। मेषस्य द्वितीयः, वृषस्य द्वितीयतृतीयौ, कर्कस्य प्रथमः, सिंहस्य सर्वोऽपि भागः, तुलावृश्चिकयोस्तृतीयः, धनुमकरयोः प्रथमश्च चतुष्पाद्। मिथुनतुलयोः द्वितीयः, सिंहकुम्भयोः प्रथमः खगः/पक्षी। - इमे द्रेष्काणविभागाः भट्टोत्पलेन दर्शिताः।

[३] फ.दी. – ३ वर्गभेद.अ., १६श्लो.

[४] जा. पा. – ९ मान्यब्दा. ११३-११७ श्लो.

भवेत्। शीलरहितश्च स्यात्। सौम्यद्रेष्काणजः सुखेन धनेन पुत्रेण च युक्तो भवति। सुशरीरः दयालुश्च जायते। मिश्रसंज्ञके द्रेष्काणे जातः दुश्शीलः परस्त्रीभिस्सहितः क्रूरः अस्थिरमतिश्च जायते। फलदीपिकोक्तिर्यथा-

**द्रेक्काणेशे स्ववर्गे शुभखगसहिते स्वोच्चमित्रर्क्षगे वा**
तद्वत्त्रिंशांशनाथे बलवति यदि चेद्द्वादशांशाधिपे वा ।

होरानाथे **तथा चेन्निखिलगुणगणो नित्यशुद्धप्रवीणो**
**दीर्घायुस्स्याद्दयावान् सुतधनसहितः कीर्तिमान्राजभोगः॥**[1]

द्रेष्काणाधिपः स्ववर्गे स्वोच्चे स्वमित्रराशौ वा स्थितः शुभग्रहेण युक्तो वा तदा समस्तगुणानामाकरः, नित्यशुद्धः, कर्मसु कुशलः, दीर्घायुः, दयावान्, सुतेन धनेन च युतः, कीर्त्तिमान् राजभोगयुक्तश्च भवति। अत्र मुख्यं तत्वन्नाम द्रेष्काणराशिः बलयुतः, तत्तत्स्वामिना च दृष्टश्चेत् द्रेष्काणोक्तं फलं स्वरूपञ्च सम्पूर्णतः वदेत्।

चोरप्रश्ने द्रेष्काणस्वरूपमुपयुज्यत इति षट्पञ्चाशिकायामुक्तम्। तमेव प्रश्नमार्गकारः उद्धरति यथा -

अंशकाज्ज्ञायते द्रव्यं **द्रेक्काणैस्तस्कराः स्मृताः ।**
राशिभ्यः कालदिग्देशाः वयोज्ञातिश्च लग्नपात् ॥[2]

द्रव्यमंशकत**श्चोरान् द्रेक्काणैरादिशेत्सुधीः ।**
दिग्देशकालान् राशिभ्यो वयो जातिश्च लग्नपात् ॥[3]

**द्रेक्काणैस्तस्कराः स्मृताः** । तथा **चोरान् द्रेक्काणैरादिशेत्सुधीः** इत्युभाभ्यां प्रमाणाभ्यां चोराकृतिनिर्देशे द्रेष्काणस्वरूपमुपयुज्यत इति ज्ञायते। पुनः आर्यासप्तत्योद्धृतं श्लोकमुदाहरन् चोराकृतिनिर्देशक्रमं स्पष्टीकरोति प्रश्नमार्गाचार्यः -

**द्रेक्काणाः स्युर्यत्स्वरूपा विलग्ने तस्याधीशः खेचरो वापि यादृक् ।**
**वर्णे वेषे वेष्टिते चाकृतौ वा तुल्यस्तेन स्तेननिर्देश्य एव ॥**

[1] फ.दी. – ३ वर्गभेदा. १५श्लो.
[2] प्र. मा. - २९अ. ४ श्लो.
[3] प्र. मा. - २९अ. ५ श्लो.

**लग्नस्वामिसमानं रूपं जातिञ्च तस्करस्य वदेत्। इत्यार्यासप्ततिः॥**[१]

लग्ने बलिष्ठे लग्नद्रेष्काणाकृतियुक्तं शरीरं, वर्णः, वेषः, वस्त्रादिकञ्चेति समस्तं वस्तुजातं चोरस्य स्यादिति युक्त्या ऊह्यम्। तत्पुनस्स्पष्टीकृतं यथा –

**उद्यत्त्र्यंशसमाकृतिर्बलयुते लग्ने भवेन्मोषको।**[२]

मनुजाकाराः द्रेष्काणाः उत्तमान् चोरान्, वानराश्वशुनकादयः अधमांश्च चोरान् विज्ञापयन्ति। तदुच्यते यथा -

**द्रेक्काणे मनुजाकृतावुदयति ज्ञेया जना उत्तमा-**

**श्चोरा वानर-वाजि-कुक्कुर-वराहास्ये ससर्पेऽधमाः ॥**[३]

होराकृष्णीये यथा –

**मनुजसमानाकारा द्रेक्काणा उत्तमा नरा ज्ञेयाः।**

**वानर-तुरग-वराह-श्वमुख-सर्पाकृतावधमाः॥**

**श्वभ्राम्बुसमीपगताः स्थिताश्च चोराः प्रवासिनो ग्राम्याः।**

**द्रेक्काणसदृशरूपा ज्ञेया वस्त्रादिभूषणैर्युक्ताः॥**[४]

❀ **उपसंहारः** - होराकृष्णीये द्रेष्काणस्वरूपात्फलादेशक्रमः बहुषु स्थलेषु विचार्यते। द्रेष्काणविभागात् चोराकृतिवद्देवताकृतिमपि कुशलाः दैवज्ञाः चिन्तयन्ति। येषु स्थानेष्वाकृतिश्चिन्त्या तेषु द्रेष्काणाकृतिं युक्त्या योजयेत्। एवं यात्रायाः लाभालाभचिन्तायां, दशाफलचिन्तने, नष्टप्रश्ने, चोरप्रश्ने, देवताप्रश्ने वा द्रेष्काणस्वरूपात्फलानि निर्णीयन्ते।

[१] प्र. मा. - २९अ. ६-७ श्लो.

[२] प्र. मा. - २९अ. ३७ श्लो.

[३] प्र. मा. - २९अ. ४२श्लो.

[४] हो. कृ. – १७अ. १०-११श्लो.

# आकारानुसारं भूमेः शुभाशुभज्ञानम्

**डा. सुधांशुकुमार नन्दा**

संविदा-अध्यापकः, वास्तु-ज्योतिषविभागः

वैदिकदर्शनानुसारं मानवस्य मुख्यलक्ष्यं भवति पुरुषार्थचतुष्टयस्य प्राप्तिः। एतेषां चतुर्णां पुरुषार्थानां प्राप्त्यर्थं शरीरमनवुद्धीनामानुकुल्यम् अपरिहार्यम्। अस्य सम्भवः तदा भवति यदा प्रकृत्यानुकुल्येन निवासस्थलं (गृहं) निर्माय मानवः वसति। एतत्सर्वं तु वास्तुशास्त्रं विना न सम्भवति एव।

पुनः सर्वेषां प्राणिनां रचना पञ्चभूतादेव संजाता। तदर्थं यः यत्र निवसति तस्य स्थलस्यापि पञ्चभूतेन सह समन्वयः स्यात्। अर्थात् वासोपयोगि निर्माणस्थलं यदि प्रकृत्यानुकुल्यं (पञ्चभूतानुकुल्यं) न भवति तर्हि तत्र वासः सुखदायकः न भवति। यतोहि यत् पिण्डे तद् ब्रह्माण्डे इति न्यायेन भूः इव पिण्डोऽयमपि पञ्चभूतात्मकः। प्रकृत्यानुकुल्यं सुस्थलस्य चयनार्थमेव वास्तुशास्त्रस्य प्रवृत्तिः। एकस्मिन् गृहे भूपरीक्षणार्थं भूतत्त्वस्य, जलस्य समुचितदिशा निर्द्धारणाय जलतत्त्वस्य, अग्निसम्बधितकार्यस्य सुपरिचालनाय अग्नितत्त्वस्य, गृहे गवाक्षादीनां निर्वहणस्य सम्बन्धः वायुतत्त्वस्य एवञ्च ब्रह्मस्थानार्थं रिक्तं स्तलं, गृहस्य उच्चता निर्णयितुं च आकाशतत्त्वस्य व्यवहारः क्रियते। अस्मादेवकारणात् लोकोपयोगि शास्त्रत्त्वेनास्य प्रसिद्धिरपि वर्तते।

**वास्तुशास्त्रादृते तस्य न स्याल्लक्षणनिश्चयः।**

**तस्माल्लोकस्य कृपया शास्त्रमेतदुदीर्यते।।**

अर्थाद् वास्तुशास्त्रस्य सिद्धान्तान् विनान्यत् किमपि साधनं नास्ति येनेदं सुनिश्चितं भवेद् यद् भवनस्य निर्माणं यथार्थेन जातमस्ति नवेति। तदर्थं लोकस्य कृपया इदं शास्त्रं प्रस्तूयते।

किमपि वा कर्तुं मानवस्याधारः अपेक्षते। तथैव वास्तुशास्त्रदृष्या पश्यामश्चेत् शास्त्रस्यास्याधारः भूमिः। तस्याः भूमेः चयनं वास्तुशास्त्रदृष्या कथं किमर्थञ्च करणीयम् इत्यस्य विचारो अपि अत्र प्रस्तोष्यते। भूमिः इति शब्दः भू धातोः मिः प्रत्यये उत्पन्नः भवति। चयनशब्दस्तु चिञ् धातुतः स्वादिभ्यः श्नुः सूत्रेण श्नु प्रत्यययोगात् निष्पन्नः। कस्यापि

वस्तुनः चयनं तु तस्य रूप-रस-गन्ध-गुण-धर्म प्रभृतीनामाधरेण एव क्रियते। वास्तुशास्त्रे भूमिचयनम् नामा एका महत्वपूर्णा प्रक्रिया वर्तते। अत्र भूमेः प्लवत्वम्, आकारः, पार्श्वस्थवातावरणम्, वेधैः च भूखण्डस्य चयनं क्रियते। गृहस्यनिर्माणाय या भूमिः स्वीक्रियते सा यदि समीचिना नास्ति तर्हि तत्र स्थितस्य मानवस्य वहवः समस्याः सा भूमिः जनयति। यथा वत्थुविज्जा पुस्तकाधारेण

**गृहस्वामि-भयश्चैत्ये, वल्मीके विपदः स्मृताः।**
**धूर्तालय समीपे तु, पुत्रस्य मरणं ध्रुवम्।।**

इतः ज्ञायते यत्सुलक्षणा विहीना भूमौ यः वसति तस्य हानिरेवजायतेति। तदर्थं सर्वदा उत्तमाभूमेः चयनं शास्त्रोक्तप्रकारेण तस्योपदेशानुसारं च कृत्वा तत्र वासः कार्यः। क्षेत्रस्य शुभाशुभं ज्ञातुं या प्रक्रियाः उद्दिष्टाः तासु आकारानुरोधेन शुभाशुभं ज्ञानं, एका मुख्या प्रक्रिया वर्तते। इदानीं आकारानुगुण्यं क्षेत्रस्य शुभाशुभज्ञानस्य प्रकारः विचार्यते। वशिष्ठसंहितायां तु भूमेः षोडशभेदाः एवं प्रदर्शिताः सन्ति। यथा-

**विस्तीर्णं समभागञ्च संस्थितं परिकीर्तितम्।**
**चतुरस्त्रं चतुष्कोणं समभागं विभागतः।।**
**वृत्तमेतत् समाख्यातं वास्तुलक्षणकोविदैः।**
**चतुर्भिर्विभजेत् कोणैस्तद्वास्तुवृत्तमुच्यते।।**
**आयतं चतुरस्त्रं च मध्यकोष्ठे भवेत् फलम्।**
**यदि वर्तुलपीताभं स्थानं भद्रासनं विदुः।।**
**चक्रवक्रसमाकारे विजयं निम्नतोन्नतम्।**
**निम्मता चापकृष्टा च शकचापस्य कीर्तिता।।**
**त्रिकोणं शकटाकारं तद्वास्तुकृदिहोच्यते।**
**दीर्घदण्डमिति ख्यातं पवनं पवनात्मकम्।।**
**मुरजं मुरजाकारं बृहमध्यं प्रकीर्तितम्।**
**अश्वत्थपर्णवत् कुम्भो धनुकोणाकृतिर्धनुः।।**
**शूर्पं शूर्पनिभं ज्ञेयं गृहं गणितकोविदैः।।**

**अस्य फलम्,**

**आयते सिद्धयस्सर्वा श्चतुरस्त्रे धनागमः।**
**वृत्ते तु बुद्धिवृद्धिः स्याद्भद्रं भद्रासने भवेत्।।**
**चक्रे दारिद्र्यमित्याहुर्विषमे शोकलक्षणम्।**
**राजभीतिस्त्रिकोणे स्याच्छकटे तु धनक्षयः।।**
**दण्डे पशुक्षयं प्राहुः शूर्पे वासे गवां क्षयः।**
**कूर्म्भे तु बन्धनं पीडा धनुःक्षेत्रे भयं महत्।।**
**कुम्भाकारे कुष्ठरोगो भवत्येव न संशयः।**
**पवने नश्यति नेत्रं धनञ्च बन्धुक्षयो मुरजे।।**
**एवं भूमिविचारं कृत्वा वासं नरः कुर्यात्।**

अर्थाद् आयताकारक्षेत्रे वासे सति सर्वाः सिद्धयः समागच्छन्ति। चतुरस्त्रे अर्थात् चतुष्कोणाकारे क्षेत्रे धनागमः। अत्र चतुर्भुजस्येव समचतुर्भुजम्, विषमचतुर्भुजम् इति प्रकारद्वयं स्वीक्रियते। विषमचतुर्भुजरपेक्षया समचतुर्भुजः अधिकः शुभदायकः। वृत्ताकारे बृद्धिः, भद्रासने तु भद्रं नाम मङ्गलं, चक्राकारे दारिद्र्यं भवतीति आचार्यैः उच्यन्ते। वासभूमिः विषमाकारश्चेत् शोकप्रदायिका, त्रिकोणाकारा चेत् राजभयम्, शकटाकारे धनक्षयः, दण्डाकारे क्षेत्रे तु पशुक्षयः, शूर्पे वासे गवां क्षयः, कूर्मे तु बन्धनपीडा, धनुषाकारक्षेत्रे महद्भयं भवति। कुम्भाकारे क्षेत्रे वासे सति कुष्ठरोगः निःसंशयेन भवतीति। पवनाकारं क्षेत्रं तु नेत्रं नश्यति। मुरजाकारक्षेत्रे धनस्य बन्धोः च नाशो भवति। अनेन प्रकारेण भूमेः विचारं कृत्वा मानवः वासः करणीयः।

| क्रमाङ्कः | भूखण्डस्याकारः | फलम् |
|---|---|---|
| 1 | आयताकारः | सर्वसिद्धिप्रदः |
| 2 | वर्गाकारः | धनागमः |
| 3 | भद्रासनः | कार्यसिद्धिः |
| 4 | वृत्ताकारः | शरीरपुष्टिः |
| 5 | चक्राकारः | दरिद्रता |
| 6 | विषमवाहु | शोकप्रदः |

| | | |
|---|---|---|
| 7 | त्रिकोणाकारः | राजभयम् |
| 8 | शकटाकारः | धनक्षयः |
| 9 | दण्डाकारः | गोधननाशकः |
| 10 | पणवाकारः | नेत्रधननाशकारकश्च |
| 11 | मुरजाकारः | स्त्रीनाश |
| 12 | वृहन्मुखः | बन्धुनाशः |
| 13 | व्यजनाकार | अर्थहानिः |
| 14 | कूर्माकारः | बन्धनपीडादायकः |
| 15 | सूर्पाकारः | धननाशकः |
| 16 | धनुषाकारः | चोरभयम् |

शिल्पशास्त्रमिति पुस्तके षोडशवास्तुभूमेः राजमार्तण्डोक्त लक्षणं श्लोकद्वये एवमुक्तमस्ति यत्

**आयतं चतुरस्त्रं च वृतं(छत्रं) भद्रासनं तथा।**
**चक्रं विषमबाहुः स्यात्रिकोण शकटाकृतिम्।।**
**दण्डं पणवस्थानं मुरजश्च बृहन्मुखम्।**
**व्यजनं कूर्मपृष्ठं च धनुः शूर्पं च षोडशम्।।**
**एवं षोडशसंस्थानं वास्तुलक्षणं शुभाशुभम्।**
**चिन्तनीयं सदा विज्ञैरात्म श्रेयोभिलाषिभिः।।**

आयताकारः 2. वर्गाकारः 3. वृत्ताकारः 4. भद्रासनम् 5 . चक्राकारः 6. विषमभुजाकारः 7. त्रिकोणाकारः 8. शकटाकारः 9. दण्डाकारः 10. पणवस्थानं 11. मुरजाकारः 12. बहुमुखी 13. व्यजनाकारः 14. कूर्माकारः 15. धनुषाकारः 16. सूर्पाकारः।

**आयते सिद्धते सर्वं चतुरस्त्रे धनागमः।**
**छत्रे प्रीतिविवृद्धिश्च भद्रासने कृतार्थिनः।।**
**चक्रे दारिद्र्यरोगो च शोको विषमबाहुके।**
**राजभीतिस्त्रिकोणे स्यात् शकटे च धनक्षयम्।।**
**चौरा नश्यन्ति दण्डेश्च पणवे नेत्रनाशनम्।**

**सुमुरजो (तों) म्रियते भार्या बहिः (गृहदे सुखनाशनम्)।।**

**व्यजने वित्तनाशश्च धनलाभश्चकच्छपे।**

**चापे चौरभयं विद्याद्भास्करे (त्शूर्प्पे) च दरिद्रते।।**

**चित्रेण सह सामान्यरूपेण क्षेत्रपरिचयः -**

वर्गाकारः

यस्मिन् क्षेत्रे सर्वे भुजाः कोणाश्च समानाः, तद् वर्गक्षेत्रम्। क्षेत्रेऽस्मिन् प्रत्येकस्य कोणस्य परिमाणः 90 अंशात्मकम्। चत्वारः भुजाश्च समानाः भवन्ति। क्षेत्रमिदं शुभदायकम्, धनसम्पतिप्रदायकम्, उन्नतिदायकञ्च भवति। तथा च चित्रम्







**आयताकारः**

आयताकारक्षेत्रं समायतविषमायतक्षेत्रत्वेन द्विधा वक्तुं शक्यते। आयताकारक्षेत्रं समायतविषमायतक्षेत्रत्वेन द्विधा वक्तुं शक्यते। यत्र परस्पर सम्मुखभुजौ समानौ, उभयोर्मध्ये अन्तरमपि समानौ पुनश्च चत्वारः कोणाः समकोणाः(90) तदा तद् क्षेत्रं समायतक्षेत्रत्वेन अभिधीयते। एवं यत्र द्वौ भूजौ समानौ, समानान्तरे स्याताम् पुनश्च कोणाः विषमाश्चेत् विषमायतचतुर्भुजत्वेन स्वीक्रियते। पुनश्च दैर्घ्यं विस्तारं चाधारीकृत्यास्य क्षेत्रस्य विभागद्वयं क्रियते। प्रथमं पूर्वात् पश्चिमं यावत् वृद्धिः। पुनश्च द्वितीयक्षेत्रम् तु उत्तराद् दक्षिणं यावत् वृद्धिः।

1 . आयताकारः – पूर्वात् पश्चिमं यावत् वृद्धिरस्ति चेद् भूखण्डोऽयं शुभदायकम्, धनसम्पत्तिप्रदायकं, मान-प्रतिष्ठा तथा उन्नति प्रदायकञ्च भवति।

2. आयताकारः - उत्तरतः दक्षिणं यावद् वृद्धिः। क्षेत्रेऽस्मिन् यः वसति तस्य धनधान्यलाभः, बलवृद्धिः, सुखलाभः, सम्पदस्य च लाभः भवति ।







विषमायतक्षेत्रम् – क्षेत्रेऽस्मिन् सम्मुखौ भुजौ समानौ, सम्मुखौ कौणावपि परस्परौ समानौ। परन्तु अत्र समकोणाः न भवन्ति। वास्तुशास्त्रे चतुष्कोणाकारः, चतुर्भुजाकारो वा अस्य प्रसिद्धिः विद्यते। इदं क्षेत्रं सामान्यतः शुभत्वेन स्वीक्रियते।



**गोलाकारक्षेत्रम्**-अस्मिन् वृत्ताकारक्षेत्रं, गोलाकारक्षेत्रञ्च अन्तर्भवति। सूक्ष्मरूपेण दृष्टिः स्थापयामः चेत् वृत्तगोलयोः मध्ये सामान्यतया व्यत्यासयः अस्तीति ज्ञातुं शक्नुमः। सिद्धान्तज्यौतिषे तु अस्य स्वरूपं सम्यक् तया प्रतिपादितं विद्यते। तथा च वृत्तस्य परिभाषा–

**व्यासार्धान्तरिता केन्द्राद् या रेखा वक्रगाभवेत्।**

**समन्ततश्च तद् वृत्तं वलयं मण्डलं च तत्।।**

केन्दात् व्यासार्धचापवशेन या वक्ररेखा केन्द्रं परितः विधीयते सा रेखा वृत्तमुत्पादयति। तदेव वलयं मण्डलं वा कथ्यते। एवमपि वक्तुं शक्यते यद् क्षेत्रं नियतकेन्द्रबिन्दुतः समान्तराले कृतायाः परिधिरेखाया अन्तर्गतं तद् क्षेत्रं वृत्तमित्युच्यते।



गोलस्य परिभाषा - **विष्कम्भोपरिवृत्तार्द्धे भ्राम्यमाणे तु सर्वतः।**

**गोलक्षेत्राभिदं ज्ञेयं गोलविद्भिर्मुनीश्वरैः।।**



गोलाकारभूखण्डे गोलाकारगृहस्य निर्माणं शुभकरमिति यदुच्यते तत्तु व्यवसायिक प्रतिष्ठानार्थं न तु वासगृहनिर्माणार्थम्। आवासिकभवने तु सर्वदा वर्गाकारम् आयताकारम् एव शुभत्वेन स्वीक्रियते। गोलाकारक्षेत्रे तु ईशानकोणस्याभावः परीलक्षते, अन्ये कोणावपि खण्डिताः भवन्तीति हेतोः अस्य तथा शुभत्वं नाङ्गीक्रियते। संसदभवनम् (parliament), क्रीडाङ्गणम् (play ground) संयुक्तापणभवनम् (market complex) प्रभृतयः प्रायशः गोलाकाराः सन्ति। गोलाकारक्षेत्रे यस्य कस्यापि कार्यस्य निर्माणं यदि गोलाकारकं भवति तर्हि शुभं भवितुमर्हति।

**भद्रासनभूमिः**

भद्रासनभूमिः वर्गाकारवदेव भवति।परन्तु यदि वर्गाकारभूमेः मध्यभागः यदा समतलो भवति तदा तस्याः भद्रासनसंज्ञा भवति। एषाभूमिः शुभप्रदायिका भवति।



त्रिभुजाकारभूमिः

यद् क्षेत्रं त्रिसृभिः रेखाभिर्निर्मितं तत् त्रिभुजम्। यस्य क्षेत्रस्याकारः त्रिभुजवद् विद्यते तस्य त्रिभुजाकारक्षेत्रमिति कथ्यते। क्षेत्रमिदम् अशुभत्वेन स्वीक्रियते। अत्र यः निवसति तस्य अग्निभयम्, उन्नतेः बाधा, कदाचित् निवासकर्तोः सर्वकारपक्षतोऽपि बाधा जायते। दिगानुरोधेन त्रिभुजाकारभूखण्डस्य चित्रचतुष्टयमधः प्रदर्शितमस्ति।

उत्तराभिमुखत्रिकोणाकारक्षेत्रस्य चित्रम् -




पूर्वाभिमुखत्रिकोणाकारक्षेत्रस्य चित्रम्







(दक्षिणाभिमुखत्रिकोणाकारक्षेत्रस्य चित्रम्)

पश्चिमाभिमुखत्रिकोणाकारक्षेत्रस्य चित्रम् –




यस्मिन् कस्मिन् भागे वा त्रिकोणकारक्षेत्रस्य मुखं भवति चेदपि क्षेत्रमिदं सर्वदा अशुभकारकं भवति। यदि कश्चन त्रिकोणाकारे क्षेत्रे गृहं निर्मातुमिच्छति तर्हि ततः चतुर्भुजाकारं क्षेत्रं निष्कास्य गृहनिर्माणं कार्यम्। अवशिष्टे भागे तु यस्यां दिक् यस्य वृक्षस्य

तृणस्य वा रोपणं शास्त्रानुगुण्यं शुभकरमिति निर्दिष्टमस्ति, तदनुरोधेन वृक्षस्थापनं तृणस्थापनं वा कार्यम्। तथा क्रियते चेत् क्षेत्रमिदं मध्यमशुभकारकं भवति।

षड्कोणीयभूखण्डः एवम् अष्टकोणीयभूखण्डः -

भूखण्डे अस्मिन् षड्भूजाः भवन्ति। षड्कोणाकारभूखण्डत्वेन अस्य प्रसिद्धिः। इदं क्षेत्रं निवासार्थं शुभप्रदायकं भवति।





यस्मिन् भूखण्डे अष्टौ भूजाः, अष्टौ कोणाश्च भवन्ति। तस्य अष्टभूजाकारः भूखण्डः इति संज्ञा। पुनः इदमेव अष्टकोणीयभूखण्डत्वेनापि अभिधीयते। अत्र यः निवसति सः सुखं समृद्धिं च प्राप्नोति।

अनियमितभूखण्डः - यस्य भूखण्डस्य भुजाः कोणाश्च अनियतकाराः भवन्ति, तस्य अनियमितभूखण्डेति संज्ञा। क्षेत्रमिदं यजमानस्य निरन्तरतयासमस्याः तथा च आर्थिक दूरावस्तायाः कारणम् भवति। तदर्थम् अनियताकारस्य भूखण्डस्यत्यागः सर्वदा कार्यः।

रथाकारः

क्षेत्रमिदम् अशुभत्वेन स्वीक्रियते, अस्मिन् क्षेत्रे यः वसति तस्य मानसिक अशान्तिः सर्वदा भवति एवं च सः सुखशान्तिविहिनजीवनमपि यापयति। पुनः तस्य जीवने खाद्यशश्यानामाभावोऽपि जायते।



अण्डाकारः

अण्डाकारः भूखण्डः निवासार्थम् अशुभफलप्रदायकं धार्मिककार्यार्थञ्च शुभदायकं भवति। कदाचित् वासार्थं एतादृशी भूमिः मिलति चेत् तत्र वासकर्तुः हानिः जायते। धार्मिकस्थलस्य कृते भूखण्डोऽयं शुभत्वेन स्वीक्रियते।



पवनाकारः



यस्य क्षेत्रस्याकृतिः हस्तव्यजनसदृशं तस्यैव क्षेत्रस्य पवनाकारक्षेत्रमिति संज्ञा। क्षेत्रमिदं धनसम्पतेः पशुसम्पतेश्च विनाशकारकं भवति।

सिंहमुखी






यस्याः भूमेः सम्मुखभागस्य विस्तारः पृष्ठभागदधिकः सा भूमिः सिंहमुखीइत्युच्यते। अस्यां भूमौ वासः अशुभप्रदः परन्तु व्यापारार्थम् एषा भूमिः शुभदायिका भवति।

गोमुखी

सिंहमुखि भूखण्डस्य विपरीतं भवति इदं क्षेत्रम्। अर्थात् यस्याः भूमेः सम्मुखभागस्य विस्तारः पृष्ठभागादून्युनः सा भूमिः गोमुखी इत्युच्यते। अस्यां भूमौ वासः शुभप्रदः परन्तु व्यापारार्थम् एषा भूमि अशुभफलदायिका भवति।






एवं रूपेण क्षेत्रस्याकारानुसारं फलं ज्ञात्वा नरः वासं कुर्यात्।

सन्दर्भग्रन्थाः -

बृहद्वास्तुमाला

वास्तुरत्नावली

वास्तुशास्त्र में भूमि चयन

गोलपरिभाषा

रेखागणितम्

राजमार्तण्डः

वत्थुविज्जा

**शिल्परत्नम्**

# अष्टमङ्गलप्रश्नः

**डा. रमानन्द भट्टः एन्**

संविदाध्यापकः, वास्तु-ज्योतिषडिप्लोमविभागः

**मध्याटव्यधिपं दुग्धसिन्धुकन्याधवं धिया ।**

**ध्यायामि साध्वहं बुद्धेः शुद्ध्यै वृद्ध्यै च सिद्धये ॥**

अथ त्रिस्कन्धात्मके ज्योतिषशास्त्रे सन्ति षडङ्गानि । तेष्वन्यतमं भवति प्रश्न इति । प्रश्नो नाम क इति जिज्ञासायामुच्यते "**अविज्ञातप्रवचनं प्रश्नः**" इति । अत्र प्रायः पृच्छकैः अविज्ञाता अंशा एव निरूप्यन्ते इत्यतः अविज्ञातप्रवचनं प्रश्न इत्युच्यते । पृच्छकस्य अविज्ञाते विषये त्रैकालिकं ज्ञानं येन शास्त्रेण प्राप्यते तच्छास्त्रं प्रश्नः इति कथ्यते । पृच्छकैः पृष्टं विषयमाश्रित्य तत्कालग्रहस्थित्या आरूढादिना तद्विषयम्बन्धित्रैकालिकगुणावगुणा दैवज्ञेन निरूप्यन्ते इत्यतः प्रश्नोऽपि जातकवत् प्रामाणिकं भवति । तदुक्तम् –

**सम्प्रेर्यमाणस्त्ववशः शरीरी प्रसह्य दैवेन शुभाशुभेन ।**

**ज्योतिर्विदः सन्निधिमेति यस्मात् प्रश्नोऽप्यथो जन्मसमः फलेषु**[१] ॥

अयं च च प्रश्नः क्रमभेदेन विषयभेदेन च भिद्यते । क्रमभेदेन तु प्रधानरूपेण ताम्बूलप्रश्नः, अष्टमङ्गलप्रश्नः इति द्वौ भेदौ । विषयभेदेन च कुटुम्बप्रश्नः, देवप्रश्नः, सुरतप्रश्नः, भोजनप्रश्नः, भूपति(राज)प्रश्नः, सन्तानप्रश्नः, विवाह(दाम्पत्य)प्रश्नः, वृष्टिप्रश्नः, मुष्टिप्रश्नः, नष्टप्रश्नः, स्वप्नप्रश्नः, युद्धप्रश्नः, रोगप्रश्नः, आयुःप्रश्नः, मृगयाप्रश्नः, कूपप्रश्नः, जलप्रश्नः चेति नानाभेदाः सन्ति । सम्प्रति क्रमभेदेन प्रधानभूतम् अष्टमङ्गलप्रश्नक्रमं पश्यामः ।

अष्टमङ्गलकर्ता स्वयम् अथवा दूतद्वारा दैवज्ञमुपगम्य पृच्छां कुर्यात् । भाषायां समानार्थकौ चेदपि शास्त्रे प्रश्न-पृच्छयोरर्थौ भिद्यते । अत्र पृच्छा नाम "**प्रथमनिवेदनम्**" । तत्प्रथमनिवेदनं कथं कर्तव्यमिति चेदुच्यते –

**तिथौ शुभायां शुभदेऽनुकूले तारे दिने भानुशुभग्रहाणाम् ।**

**प्रष्टेप्सितं प्राभृतदानतुष्टं ज्योतिर्विदं प्रातरुपेत्य पृच्छेत् ॥**

[१] प्रश्नमार्गः – ०१.४६ ।

पृच्छकः अनुकूलनक्षत्रे रविसहितशुभग्रहाणां दिवसे प्रातः दक्षिणादिना सलक्षणं दैवज्ञं परितोष्य सकृदेव पृच्छेत् । सकृन्नाम एकवारमेव, अर्थात् एक एव प्रश्नः कर्तव्य इति[1] । दैवज्ञोऽपि पृच्छकेन सकृत्पृष्ट एव पृच्छकपृष्टे विषये आमूलचूलं कथयेत् । एतदर्थं दैवज्ञेन पृच्छासमये केचन अंशा ज्ञेया भवन्ति । तानाह -

**दैवज्ञेन समाहितेन समयो देशः स्ववायुर्दशा**
**प्रष्टुः स्पर्शनमाश्रितर्क्षहरितौ प्रश्नाक्षराणि स्थितिः ।**
**चेष्टाभावविलोकने च वसनाद्यन्यच्च तत्कालजं**
**पृच्छायाः समये तदेतदखिलं ज्ञेयं हि वक्तुं फलम्[2] ॥**

समाहितो दैवज्ञः पृच्छासमयम्, पृच्छादेशम्, आत्मश्वासगतिम्, पृच्छकस्य स्वस्य च शारीरिकमानसिक-अवस्थाः (व्यापाराः), प्रष्टुः स्पर्शनम्, पृच्छकस्थितराशिम्, पृच्छकस्थितदिशम्, प्रश्नाक्षराणि, पृच्छकस्य स्थितिम्, पृच्छकस्य चेष्टाः, तस्य भावान्, पृच्छकस्य अवलोकनम्, तस्य वसनादिकम्, आभरणादिकम् (अन्यच्च), तत्काले श्रूयमाणवीणादिध्वनिं च सम्यगवलोकयेत् । पुनश्च पृच्छकाधिष्ठितराशिमाश्रित्य आरूढनिर्णयमपि कुर्यात् । एवं प्रथमनिवेदनसमये पृच्छकेन ताम्बूलादिना निवेदितो दैवज्ञः तदाश्रित्य अथवा आरूढेन किञ्चित् फलं निरूपयेत् ।

पृच्छकेनाथवा दूतेन अभ्यर्थितो दैवज्ञः अष्टमङ्गलप्रश्नार्थं जीवकालहोरादिके शुभे समये स्वगृहात् निर्गच्छेत् । तदापि तत्कालजनिमित्तान्यवलोकयेत् । तथैव मार्गे प्रष्टुः गृहप्रवेशस्य समये च निमित्तानि चिन्तयेत् ।

अष्टमङ्गलप्रश्ने चिन्तनीयाः अंशाः –

पृच्छानिर्गममार्गमन्दिरगतिः प्रश्नक्रियासम्भवम्
सुत्रिस्फुटजाष्टमङ्गलफलारूढोदयेन्दूद्भवान् ।
आयुः खेटवशाच्च जातकवशात् सञ्चिन्त्य भावान् परान्
देवानामनुकूलतादि च वदेद्बाधाभिचाराद्यपि[1] ॥

---

[1] प्रश्नसमये पुनः पुनः राश्यानयनादिकं नास्तीत्यत एकवारमेव पृच्छेत् । दैवज्ञः सकृत्पृष्टः सन् सर्वं कथयेत् । अत्र सकृदेव पृच्छेत् इत्यत्र अन्यस्मिन् दैवज्ञे न पृच्छेत् इत्यर्थो नास्तीति मे मतिः ।

[2] प्रश्नमार्गः – ०२.१२ ।

अष्टमङ्गलप्रश्ने प्रश्नक्रियासम्भवः इत्ययमंशः प्राधान्यं भजते । अष्टमङ्गलसम्भारेषु एकत्रीकृतेषु एकस्य पृच्छकद्वारा आनयनं प्रथमानीतिरिति उच्यते । तत्कारयेत् । ततः दीपज्वलनम्, दीपलक्षणम्, चक्रलेखनं चेत्येते विचाराः चिन्त्यन्ते । अष्टमङ्गलद्रव्याणि [२] तत्र स्थापयेत् । ततः राशिचक्रे सग्रहदक्षिणामूर्तिपूजा, गुरूपदिष्टमन्त्रजपः, स्वर्ण-वराटिकाभिमन्त्रणम्, स्वर्णन्यासः इत्येतानि कृत्यानि कार्याणि ।

ततः कन्या कुमारो वा स्नात्वा वस्त्राद्यलङ्कृतः ।
राशिग्रहस्थितिज्ञानशून्यो वा कश्चनापरः[३] ॥

एवं कन्या वा कुमारः अथवा राश्यादिज्ञानशून्यः कश्चन दैवज्ञेन अभिमन्त्रितं स्वर्णं चक्रप्रदक्षिणपुरस्सरं दैवज्ञादेशानुगुणं दैवप्रेरणया चक्रे कस्मिंश्चिद्राशौ स्थापयेत् । स राशिरेव स्वर्णारूढराशिरित्युच्यते । तत्र स्वर्णस्य आभिमुख्यम्, उत्तानतादिकम्, प्लवत्वम्, नवांशश्च अवलोक्यः, तथैव स्वर्णन्यासकर्तुः चेष्टादिकमपालोच्यम् । स्वर्णन्याससमये एव दैवज्ञोऽपि अभिमन्त्रिता अष्टोत्तरशतं वराटिकाः स्थानत्रये विभजेत् । तत्कालनिमित्तानि, प्रष्टुः स्पर्शनादिकं चावलोकयेत् । ततः त्रिषु स्थानेषु विभाक्तासु वराटिकासु अष्टाष्टवराटिकाः त्यक्त्वा शेषं ज्ञात्वा, स्थानत्रयस्य शेषं पृथक् एकत्र विलिख्य स्थापयेत् । अस्य प्रक्रमस्यैव अष्टमङ्गलप्रश्नः इति नाम उक्तम् । अस्मात् बहुविधफलानि चिन्तनीयानि सन्ति ।

एवं स्वर्णारूढप्राप्तेः परं किञ्चित् फलं प्रोच्य, पूजां समापयेत् । ततः त्रिस्फुटादिकं संसाध्य दैवानुकूल्यं विचिन्त्य भावफलचिन्तनम्, पृच्छासमयस्य – प्रश्नसमयस्य च समयादिकमाश्रित्य, स्वर्णस्य च फलं निरूपयेत् । अत्र भावचिन्तनार्थं केवलं स्वर्णारूढराशेः फलं न चिन्त्यते । फलचिन्तनार्थं षडारूढराशयः सन्ति । ते च –

आरूढोदयलग्नांशछत्रस्पृष्टाङ्गराशयः ।
चन्द्राधिष्ठितराशिश्च चिन्त्याः षट् प्रश्नकर्मणि[४] ॥

अष्टमङ्गले तु, त्रिषु स्थानेषु अष्टभिः विभज्य पृथक्कृताभ्यः वराटिकाभ्यः फलविशेषाः विशिष्य निरूपणीयाः इति विशेषः । तदुक्तम् -

---

[१] प्रश्नमार्गः – ०२.११ ।

[२] काञ्चनं दर्पणं पुष्पमक्षताः फलसञ्चयः । ताम्बूलं वसनं ग्रन्थश्चाष्टमङ्गलमिष्यते ॥

[३] प्रश्नमार्गः – ०४.४६ ।

[४] प्रश्नमार्गः – ०८.०१ ।

वामस्थेन फलं भूतं वर्तमानं तु मध्यतः ।
दक्षिणस्थेन भावीनि फलानि च विचिन्तयेत्[1] ॥

त्रिषु स्थानेषु वामस्थेन भूतकालिकं फलम्, मध्यात् वर्तमानं फलम्, दक्षिणस्थेन भाविफलानि विचिन्तयेत् । पुनश्च एतैः रव्यादिग्रहान्, ध्वजादियोनीः, गरुडादिजन्तून्, पृथिव्यादिमहाभूतानि, तेषां फलान्यपि चिन्तयेत् ।

अर्कारजीवविच्छुक्रमन्दचन्द्राहयः क्रमात् ।
ध्वजधूमहरिश्वोक्षखरमातङ्गवायसाः ॥
तार्क्ष्यमार्जारसिंहश्वाह्याखुद्विपशशास्तथा ।
ध्वजसिंहौ मही दन्तिवृषौ जलमयौ मतौ ।
धूमो वह्निः खरो वायुः श्वकाकौ वियदात्मकौ[2] ॥

अष्टमङ्गलप्रश्ने त्रिधा विभक्तवराटिकासु अष्टाष्टशोधनात् त्रिषु स्थानेषु अवशिष्टवराटिकासङ्ख्यामाश्रित्य ग्रहादिनिर्णयः । तदेवम् –

| शेषम् | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ |
|---|---|---|---|---|---|---|---|---|
| ग्रहः | रविः | कुजः | गुरुः | बुधः | शुक्रः | शनिः | चन्द्रः | राहुः |
| योनिः | ध्वजः | धूमः | सिंहः | श्वा | वृषभः | खरः | गजः | काकः |
| जन्तुः | गरुडः | मार्जारः | सिंहः | श्वा | सर्पः | मूषकः | गजः | शशः |
| भूतम् | पृथिवी | अग्निः | पृथिवी | आकाशः | जलम् | वायुः | जलम् | आकाशः |

एतेषां पृथक् पृथक् फलानि उक्तानि । विस्तरभयादत्र न निरूप्यते । एतत्सर्वमवलोक्य दैवज्ञेन गुरून् ग्रहांश्च आराध्य फलनिरूपणं दैवज्ञेन कर्तव्यमित्युक्त्वा विरमामि विस्तरात् ।

**अष्टमङ्गलमित्युक्तं संक्षेपेण गुरूदितम् ।**
**गुरुभक्त्येश्वरं ध्यायन् वदेत्सत्यं भवेद्ध्रुवम्[3] ॥**

**ग्रन्थसूची –** प्रश्नमार्गः – प्रकाशकः कब्याडी श्रीनिवास आचार्यः – २००१ ।

[1] प्रश्नमार्गः – ०७.०१ ।
[2] प्रश्नमार्गः – ०७.४-६ ।
[3] प्रश्नमार्गः – ०७.४३ ।

# ग्रहाणां दृग्बलम् ।

**विद्वान् नागपति हेगडे**

अतिथ्यध्यापकः, ज्योतिषविभागः

**गुरून् गणपतिं दुर्गां वन्दे सूर्यहराच्युतान् ।**

**प्रसन्नमनसस्ते मे कुर्युर्विघ्ननिवारणम् ॥**

वेदोक्तकर्मानुष्ठानयोग्यकालविदानार्थं प्रवृत्तमिदं शास्त्रं पश्चात् तन्मार्गे कृतचिन्तनैर्मुनिभिः त्रिषु मार्गेषु बहुधा प्रवर्धितम् । तत्र कालनिर्णयार्थमपेक्षितानां ग्रहस्फुटानां तत्सम्बद्धग्रहणादीनां च गणितं सोपपत्तिकं निरूपितं सः सिद्धान्तस्कन्धः । यत्र तु रव्यादीनां ग्रहाणां चारेण तात्कालिकैः भूकम्पादि निमित्तैश्च समष्टेः फलं कथ्यते वास्तुशरीरलक्षणादीनां ज्योतिश्शास्त्राङ्गभूतानां विविदविषयाणां निरूपणं च क्रियते सः संहितास्कन्धः । यत्र चाधानकालिकीं जन्मकालिकीं प्रश्नकालिकीं वा ग्रहस्थितिमाश्रित्य प्रत्येकमपि व्यक्तेः शुभाशुभफलानि चिन्त्यन्ते सा होरा ।

अस्मिन् होरास्कन्धे विद्यमानेष्वनेकेषु विषयेष्वन्यतमः प्रसिद्धश्च षड्बलविचारः । षड्बलानि कानि इति चेत् उच्यते

"**क्रमेण दृक्स्थाननिसर्गचेष्टादिक्काल वीर्याणि च षड्बलानि**"[1] । इति ।

दृग्बलं स्थानबलं निसर्गबलं चेष्टाबलं दिग्बलं कालबलं चेति षड्बलानि । फलादेशे ग्रहाणां बलनिर्णयार्थम् इमानि षड्बलान्येव शरणीकरणीयानि दैवज्ञेन । किन्तु

"**सुरगुरुसितदृष्टे वित्तवान्स्यात्सुखी च ।**"[2]

"**लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेथवालोकिते ।**"[3]

"**होरा स्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा** "[4]

"**कुजः स्वर्क्षे शशिनि तनुगे मन्दमाहेयदृष्टे ।**"[5]

---

[1] जातकपारिजातः : अध्यायः - २ ग्रहनामस्वरूपगुणभेदाध्यायः । श्लोकसङ्ख्या – ३८ ।

[2] बृहज्जातकम् : अध्यायः - १३ चान्द्रयोगाध्यायः । श्लोकसङ्ख्या – १ ।

[3] बृहज्जातकम् : अध्यायः - २१ अनिष्टयोगाध्यायः । श्लोकसङ्ख्या – १ ।

[4] बृहज्जातकम् : अध्यायः - १ राशिप्रभेदाध्यायः । श्लोकसङ्ख्या – १९ ।

[5] बृहज्जातकम् : अध्यायः - ४ निषेकाध्यायः । श्लोकसङ्ख्या – १८ ।

इत्येवमादिभिः होरावाक्यैः शुभाशुभफलेषु केवलं दृष्टिवशादपि भविष्यमाणव्यत्ययः समुपवर्णितः ।

अथ कोऽयं दृष्टिक्रमः कः दृष्टा कश्च दृष्यः इति समुद्यमानानां प्रश्नानामुत्तरं लभ्यते वाराहीयबृहज्जातके यथा -

**"त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयन्ति चरणाभिवृध्दितः ।**

**रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः ॥"**[१] इति ।

अत्र त्रिदशयोः त्रिकोणयोः चतुरस्रयोः सप्तमस्य च समीक्षणे ग्रहाणां पादवृध्दिक्रमः उद्घोषितः । अर्थात् ग्रहाः त्रिदशौ भावौ तृतीयदशमभावौ पाददृष्ट्या त्रिकोणौ पञ्चमनवमभावौ अर्धदृष्ट्या चतुरस्रौ चतुर्थाष्टमभावौ पादोनदृष्ट्या अवलोकयन्ति । सर्वे ग्रहाः सप्तमभावं पूर्णदृष्ट्या पश्यन्ति । अत्र शनिगुरुकुजानां विशेषदृष्टिरपि कथिता । तद्यथा शनेः तृतीये दशमे च गुरोः पञ्चमे नवमे च कुजस्य चतुर्थे अष्टमे च पूर्णदृष्टिरभिहितः । जातकपारिजातेऽपि वैद्यनाथः इत्थमेवाभिप्रैति । तेनोक्तम् –

**"पादेक्षणं भवति सोदरमानराश्योरर्धं त्रिकोणयुगलेऽखिलखेचराणाम् ।**

**पादोनदृष्टिनिचयश्चतुरस्रयुग्मे सम्पूर्णदृग्बलमनङ्गगृहे वदन्ति ॥"** इति ।

पञ्चमे नवमे च ग्रहाणामर्द्धदृष्टिः कथिता । किन्तु तत्र गुरोः पूर्णदृष्टिरभिहिता । यतो हि पञ्चमं विद्यास्थानं तथा नवमं धर्मस्थानं वर्तते । राष्ट्रस्य प्रत्येकस्यापि व्यक्तेश्चोत्कर्षे ज्ञानधर्मकारकस्य राष्ट्रसचिवस्य गुरोः सर्वदा ज्ञानधर्मविषये सर्वातिशायि दायित्वमवश्यं भवेदेव । अतः पञ्चमे नवमे च गुरोः पूर्णदृष्टिः युक्तिपूर्णा एव । एवमेव चतुर्थाष्टमे ग्रहाणां पादोनदृष्टिरभिहिता । किन्तु कुजस्य पूर्णदृष्टिः कथिता । यतो हि सेनानायकस्य कुजस्य चतुर्थस्य गृहस्थानस्योपरि अर्थात् राष्ट्रचिन्तने राष्ट्रस्योपरि तथा अष्टमस्य छिद्रस्थानस्योपरि अर्थात् राष्ट्रचिन्तने राष्ट्रछिद्रत्वात् रक्षणे सर्वातिशायि दायित्वमवश्यं भवेदेव । अतः चतुर्थाष्टमे कुजस्य पूर्णदृष्टिः उचिता एव । तद्वत् अङ्गरक्षकस्य शनेः पराक्रमस्थानस्य तृतीयस्योपरि तथा कर्मस्थानस्य दशमस्योपरि पूर्णदृष्टिः भवेदेव । अतः एव गुरुकुजशनीनां विशेषदृष्टिः प्रतिपादिता ।

[१] बृहज्जातकम् : अध्यायः - २ ग्रहयोनिप्रभेदाध्यायः । श्लोकसङ्ख्या – १३ ।

ग्रहाणां दृष्टिः पूर्वोक्तेषु स्थानेष्वाद्यन्तं भवति इति चेन्न । खेटस्यैकस्य स्वस्थानात् तृतीये भावे स्वांशादि तुल्ये स्फुटे पाददृष्टि: । तस्माद्वृध्दिं प्राप्य तृतीयचतुरस्रभावसन्धौ अर्धदृष्टि: । तस्माद्वृध्दिं प्राप्य च्तुर्थ भावे स्वांशादि तुल्ये स्फुटे पादोनादृष्टि: । तत: पुन: ह्रासमाणा सा दृष्टि: पञ्चमभावे स्वांशादि तुल्ये स्फुटे अर्धं भवति । पुन: ह्रासं प्राप्य पञ्चषष्टभावसन्धौ शून्यतामुपैति । षष्टभावादारभ्य वर्धमाना या दृष्टि: सप्तमभावे स्वांशादि तुल्ये स्फुटे पूर्णा भविष्यति । तत: क्षीणगतामापन्ना या दृष्टि: अष्टमभावे स्वांशादि तुल्ये स्फुटे पादोना भवति । तस्मादपि ह्रासेन नवमभावांशे अर्धदृष्टिर्जायते । इयञ्च दृष्टि: दशमे पादपरिमिता भवतीति तेनाभिप्रेतं । अथ शनिगुरुमहीसुतानां विशेषदृष्टि: उपन्यस्त: । तत्र शने: तृतीयभावे पूर्णा दृष्टि: भवति । सा दृष्टि: ह्रासं प्राप्य चतुर्थे भावे पादोना भवति । दशमे भावे पूर्णा दृष्टिः । सा दृष्टि: ह्रासं प्राप्य एकादशे भावे शून्यं भवति । गुरोस्तु पञ्चमभावे पूर्णा दृष्टि: षष्टे शून्या भवति। नवमे विद्यमाना पूर्णा दृष्टि: क्षयवशात् दशमे पादपरिमिता भवति । अङ्गारकस्तु चतुर्थेऽष्टमे च पूर्णा दृष्टिश्चेत् तदग्रिमे पञ्चमे नवमे च सा दृष्टि: ह्रासं प्राप्य अर्धदृष्टिर्जायते ।

तद्गणनाप्रकारस्तु जातकपध्दतिविवक्षुणा केशवदैवज्ञेन प्रपञ्चितो यथा -

**“खैकाग्निद्विखवेदरामयमभूखाभ्राभ्रमेकादिभे**

**दृष्ट्रावर्जितदृश्यकस्य गुरुणा चेदष्टवेदे कृताः ।**

**मन्देनाङ्कयमेऽसृजा नगगुणेऽङ्का भादिजास्संस्कृताः**[१]

**भागघ्नक्षयवृद्धिखानललवेनाब्ध्युद्धृता दृग्भवेत् ॥**”[२] इति ।

अस्यार्थः । यो ग्रहः पश्यति सः दृष्टा । तेन दृष्ट्रा यदुपरि दृष्टिरानीयते सः दृश्यः । दृश्य एव दृश्यकः । दृष्ट्रावर्जितदृश्यकः दृश्यकग्रहस्फुटात् दृष्टास्फुटः शोध्य इत्यर्थः । तस्य एकमारभ्य द्वादशपर्यन्तं राशौ शेषे सति राश्यादिजाः भादिजाः(ध्रुवाङ्काः) खैकादयो अङ्काः यथाक्रमं स्युः । तद्यथा एकभे शून्याङ्कः द्विभे एक इत्यादि । स्पष्टार्थं दृष्टिध्रुवाङ्कचक्रं लिख्यते ।

[१] ’मन्देनाङ्कयमेऽसृजा नगगुणे दृष्टिर्ध्रुवास्संस्कृताः’ । इत्यपि पाठः वर्तते ।

[२] केशवीयजातकपद्धतिः : अध्यायः – २ दृष्टिसाधनाद्यायः ।

**ग्रहाणां दृष्टिध्रुवाङ्कचक्रम् ।**

| भानि | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ध्रुवाङ्काः | ० | १ | ३ | २ | ० | ४ | ३ | २ | १ | ० | ० | ० |

चेद्यदि गुरुणा दृष्टा वर्जितदृश्यकस्य अष्ट ८ वेदे ४ राशौ शेषे सति तथा शनिना दृष्टा वर्जितदृश्यकस्य नवर्क्षे ९ द्विभे २ शेषे तथा भौमेन दृष्टा वर्जितदृश्यकस्य सप्तभे ७ त्रिभे ३ शेषे सति च चत्वारोङ्काः स्थाप्याः न तु पूर्वोक्ताः । अन्तरमपि चतुर्भिरेव कार्यम् । न तु पूर्वोक्ताङ्कैः । गुरुशनिभौमानां विशेष दृष्टिध्रुवाङ्कचक्रम् पृथग्लिखितम् ।

**गुरुशनिभौमानां विशेष दृष्टिध्रुवाङ्कचक्रम् ।**

| भानि | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | ० |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| गुरुणा द्रष्टा | ० | १ | ३ | ४ | ० | ४ | ३ | ४ | १ | ० | ० | ० |
| शनिना द्रष्टा | ० | ४ | ३ | २ | ० | ४ | ३ | २ | ४ | ० | ० | ० |
| भौमेन द्रष्टा | ० | १ | ४ | २ | ० | ४ | ४ | २ | १ | ० | ० | ० |

ततो राशिध्रुवाङ्काग्रिमाङ्कयोरन्तरं दृष्टावर्जितदृश्यकस्यांशादिभिः गुणिताः या क्षयवृद्धिः प्राप्ता (अग्रिमे न्यूने क्षयः अधिके वृद्धिः) तस्याः खानललवेन त्रिंशदंशेन पूर्वोक्ता भादिजाङ्कास्संस्कृताः कार्याः । तद्यथा क्षये हीनाः वृद्धौ युक्ताः । ततश्चतुर्भिर्भक्ताः फलं रूपाद्यं दृष्टिर्ग्रहेषु परस्परं भावेषु च भवेत् ।

अस्य गणितस्य स्पष्टावगमनार्थं जातककौस्तुभस्योदाहरणमत्र दीयते । दृष्टा रविः ६/५/३९/४ । दृश्यश्चन्द्रः ०/१४/२३/४२ । दृष्टावर्जितः दृश्यकः ६/८/४४/३८ । अत्र राशिषट्कमस्ति । तत्र भादिजाङ्को वेदाः ४ अग्रे रामाः ३ अनयोरन्तरम् १ (क्षयः) । इदमन्तरं १ राश्यधस्थितभागादिभिः ८/४४/३८ गुणिताः अस्य त्रिंशता भक्तो लब्धं रूपादिः ०/१७/२९ । अग्रिमाङ्कस्य न्यूनत्वात् क्षयस्य सत्वादनेन भादिजाङ्को वेदाः ४ तस्मात् हीनाः ३/४२/३१ चतुर्भिर्भक्तः फलं ०/५५/३७ जाता रूपाद्यादृष्टिश्चन्द्रेऽर्कस्य ।[1]

[1] केशवीयजातकपद्धतेः चतुर्थश्लोकव्याख्याने जातककौस्तुभे प्रदर्शितोदाहरणम् ।

अथ विशेषदृष्ट्युदाहरणम् । दृष्टा गुरुः ३/२७/५२/१३ दृश्स्यश्चन्द्रः ०/१४/२३/४२ दृष्ट्रावर्जितदृश्यकः ८/१६/३१/२९ । गुरुर्दृष्टास्ति । अतो गुरुणाचेदष्टवेदे कृता इत्युक्तत्वाद् भादिजांकाश्चत्वारः ४ । अग्रे एकः १ । अनयोरन्तरम् ३ । अग्रिमाङ्कस्य न्यूनत्वात् क्षयः ३ भागैः १६/३१/२९ गुणितः ४९/३४/२७ । अस्य खानललवेन रूपादिना राश्यादिना १/३९/८ क्षयस्य विद्यमानत्वादनेन भादिजाङ्को ४ रहितः २/२०/५२ अब्ध्युधृतो लब्धं जाता रूपाद्या गुरुदृष्टिश्चन्द्रे ०/३५/१३ । एवं शनिभौमयोरपि विशेषदृष्टयस्साध्याः । एवं सर्वेषां ग्रहाणां परस्परदृष्टिः भावोपरि दृष्टिश्च साध्या ।[१]

एवं प्रधानग्रन्थेषु सूर्यादीनां सप्तग्रहाणां दृष्टिः तत्साधनप्रकारश्च प्रतिपादितश्चेदपि राहुकेत्वोः दृष्टिचिन्तनं न दृष्यते । किन्तु बृहज्जातकस्य ज्योतिव्याख्याने तदुक्तं यथा –

**"सुते सप्तमे पूर्णदृष्टिस्तमस्य तृतीये रिपौ पाददृष्टिर्नितान्तम् ।**
**घने राजगेहेऽर्धदृष्टिर्वदन्ति स्वगेहे त्रिपादं भवेच्चैव केतो ॥** "[२] इति ।

राहुः पञ्चमं सप्तमं च भावं पूर्णदृष्ट्या पश्यति । सः तृतीयषष्ठभावौ पाददृष्ट्यावलोकयति । तस्यार्धदृष्टिस्तु तृतीये दशमे चाभिहिता । स्वक्षेत्रे तस्य पादोनदृष्टिरिति तावदस्यार्थः । अत्रापि मतभेदः वरीवर्ति । तद्दर्शितं यथा –

**"सुतमदननवान्त्ये पूर्णदृष्टिः सुरारेर्युगलदशमराशौ दृष्टिमात्रत्रयार्हः ।**
**सहजरिपुचतुर्थेष्वष्टमे चार्धदृष्टिः स्थितिभवनमुपान्त्यं नैव दृष्यं हि राहोः ।** "[३] इति ।

अत्र "**दिग्भ्योधिकं पश्यति नो ग्रहेन्द्रः**"[४] इति सत्यपि प्रधानपक्षे "**पादार्धञ्च तदर्धञ्च पूर्णमाये व्यये तनौ** "[५] इत्यपि यवनोक्तिर्दृष्यते । जातकपारिजाते ऊर्ध्वादि दृष्टिक्रमः प्रस्तुतीकृतः । तद्यथा –

**"अथोर्ध्वदृष्टी दिननाथभौमौ दृष्टिः कटाक्षेण कवीन्दुसून्वोः ।**
**शशाङ्कगुर्वोः समभागदृष्टिरधोऽक्षिपातस्त्वहिनाथशन्योः ॥** "[६] इति ।

अनेन रविकुजयोः ऊर्ध्वदृष्टिरभिहिता । बुधशुक्रयोः कटाक्षदृष्टिरुक्ता । गुरुचन्द्रयोः

[१] केशवीयजातकपद्धतेः चतुर्थश्लोकव्याख्याने जातककौस्तुभे प्रदर्शितोदाहरणम् ।

[२] बृहज्जातकस्य ज्योतिव्याख्याने – अध्यायः २ – श्लोकसङ्ख्या १३ ।

[३] बृहज्जातकस्य ज्योतिव्याख्याने - अध्यायः २ - श्लोकसङ्ख्या १३ ।

[४] श्रीपतिपद्धतिः – अध्यायः २ - श्लोकसङ्ख्या ४ ।

[५] यवनोक्तिः ।

[६] जातकपारिजातः – अध्यायः २ - श्लोकसङ्ख्या ३२ ।

समभागदृष्टि: प्रतिपादिता । शनिराह्वो: अधोदृष्टि: कथिता ।

अत: जातफलमादिशता दैवज्ञेन दृष्टिगणितेन ग्रहाणां दृष्टिं सम्यग्विगणय्य एतत् अन्यबलेषु संयोज्य ग्रहाणां बलाबलं सम्यग्विऽचिन्त्य फलमलं प्रकटयेत् । तर्हि एव कृतफलादेशः सफलो भवतीति शम् ।

# श्रीमद्वाल्मीकिरामायणे शिक्षासन्दर्भाः

**आचार्यः गङ्गाधरपण्डा**

पूर्वकुलपतिः,

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी

वेदात्परमार्षकाव्यपरम्परायां श्रीमद्वाल्मीकिरामायणं स्वमहिमानं सर्वोच्चं बिभर्ति । रामायणस्यान्तःप्रमाणं स्वगरिम्णा प्रकाशयति -

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद् रामायणी कथा लोकेषु प्रचरिष्यति ॥[१]

रामायणं वेदस्यैवावतारः । परं ब्रह्म रामरूपेण त्रेतायामाविर्बभूव मेदिन्यां मर्यादामाध्यमेन लोकशिक्षणाय । अत एव वाल्मीकिना उच्यते -

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ॥

अयोध्यायां न कश्चन नास्तिकोऽविद्वान् चासीत् । सर्वे वेदेषु शास्त्रेषु च विचक्षणा बभूवुः ।

द्रष्टुं शक्यमयोध्यायां नाविद्वान् न च नास्तिकः ।
नाषडङ्गविदत्रास्ति नाव्रतो नासहस्रदः ॥ [२]

रामायणसमये राक्षसा अपि महान्तो विद्वांस आसन् । स्वयं रावणो विश्रवसः सुतत्वाद् वेदशास्त्रविशारदो भूत्वा स्वविद्यया भक्त्या च शिवं तुतोष । रावणकृतं शिवताण्डवस्तोत्रं परवर्तिकाले प्रसिद्धिं गतम् । बाल्मीकिरामायणे सुन्दरकाण्डे हनूमान् रक्षोगृहेषु वेदध्वनिं शुश्राव -

षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् ।
शुश्राव ब्रह्मनिर्घोषान् विरात्रे ब्रह्मरक्षसाम् ।[३]

**अध्ययनकालः**

---

[१] .वाल्मीकिरामायणम् 1.2.36-37

[२]. वाल्मीकिरामायणम् 1/6/8-15

[३] .वाल्मीकिरामायणम् – 5.18.2

धर्मशास्त्रानुसारं ब्राह्मणस्योपनयनं गर्भादष्टमे, क्षत्रियस्य गर्भादेकादशे, वैश्यस्य गर्भाद् द्वादशे भवन्ति । सुतरामुपनयनात्परं चतुर्णां रामादिभ्रातॄणां विद्याध्ययनं वसिष्ठेनाकारि-

उपनीता वसिष्ठेन सर्वविद्याविशारदाः ।
धनुर्वेदे च निरताः सर्वशास्त्रार्थवेदिनः ॥

एतन्महदाश्चर्यं भवति यस्माद् विद्या उपगता, यो वेदस्वरूपः सोऽपि लोकशिक्षणाय गुरुगृहे विधिवदधीते स्म । अध्ययनकाले समस्ता विद्याः तत्क्षणात् तं प्रपेदिरे । रामायणस्योऽयं प्रसङ्गः परवर्तिकाले रामचरितमानसे तुलसीदासेनाप्युपबृंहितम् –

गृरुगृहँ पढ़न गये रघुराई ।
अलपकाल विद्या सब पाई ॥
जाकी सहज स्वास श्रुति चारि ।
सो हरि पढ़ यह कौतुक भारी ॥ [१]

**अध्ययनस्य विषयाः**

रामायणकाले वर्णाश्रमव्यवस्था सुदृढा आसीत् । गुरुकुले स्वस्ववर्णानुसारेण अष्टादश विद्यानामध्ययनमध्यापनं भवति स्म । एता विद्याः सन्ति -

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥

षडङ्गानि यथा -

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।
छन्दसां लक्षणं चैव षडङ्गानि प्रचक्षते ।।

एतानि षडङ्गानि ऋग्यजुसामाथर्वाश्चत्वारो वेदाः, मीमांसा, न्यायशास्त्रम्, धर्मशास्त्रम्, पुराणम् इति आहत्य चतुर्दश विद्या स्थानानि भवन्ति । एतेषु चत्वार उपवेदा युज्यन्ते चेत् अष्टादशसंख्या विद्यानां भवति । उपवेदा यथा-

आयुर्वेद धनुर्वेदो वेदो गान्धर्व एव च ।

[१] रामचरितमानस, बाल 204/4-5

अर्थशास्त्रमिति प्रोक्तमुपवेदचतुष्टयम् ॥

रामायणे एतासां विद्यानामुपदेशः स्थलानुसारेण भवति । वसिष्ठस्य गुरुकुले सभ्रातृको रामोऽधीयान आसीत् । पुनश्च विश्वामित्रात् रामो धनुर्विद्यायाः विशेषज्ञानं प्राप्नोति। सा काऽपि अद्भुता आसीत् । बला - अतिबलानाम्ना एते विद्ये रामायणे प्रसिद्धे आस्ताम् ।

मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ।
न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः ।
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः ।।
न बाह्वोः सदृशो वीर्ये पृथिव्यामस्ति कश्चन ।[१]

वाल्मीकि: लवकुशौ शिष्यत्वेन स्वीकृत्य न केवलं वेदेषु पारङ्गतं कारयति, अपि तु वेदस्योपबृंहकरूपेण रामायणमपि पाठयति । सस्वरं कण्ठस्थीकरणप्रक्रिया प्रसिद्धा अनुसृता चासीत् ।

स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।
वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥[२]

उभावपि लवकुशौ गान्धर्वविद्यान्तर्गतसंगीतशास्त्रे अधिजगाते । रामायणस्य चतुर्विंशति सहस्राणि पद्यानि कण्ठस्थान्यासन् । उक्तं च -

वाचो विधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ।
*यथोपदेशं तत्त्वज्ञौ* जगतुस्तौ समाहितौ।।

**गुरुशिष्यपरम्परा**

रामायणे गुरुशिष्यपरम्परायाः नैकान्युदाहरणानि दृश्यन्ते । रामो भ्रातृभिः सह वसिष्ठगुरुकुलस्यान्तेवासी भवति, तथापि विश्वामित्रात् चमत्कारीं शक्तिमासादयति । वनवाससमये आश्रमाद् आश्रमं भ्रामं भ्रामं सुतीक्ष्णप्रभृतीनां मुनीनामुपदेशं प्राप्नोति ।

रामायणस्य वानरोऽपि महाज्ञानी भवति । हनुमान् ज्ञानिनामग्रगण्य इति उच्यते । भगवान् सूर्यस्तस्य गुरुः । गुरुरूपेण चित्वा यदा स अध्येतुं गच्छति तदानीं सूर्यो वदति

[१]. वाल्मीकिरामायणम् - 1.22.13-14

[२]. वाल्मीकिरामायणम् - 1/4/6

अहमुदयाचलादस्ताचलं यावत् सदैव चलायमानः । अस्थिरोऽस्मि । कथं वा अध्यापयितुं शक्नोमि । पवनतनुजोऽपि स्वप्रतिज्ञां न त्यजति । स प्रतिदिनं विपरीतगत्या सूर्यस्यानुधावनं कृत्वा व्याकरणादिविद्याऽध्ययनं चकार ।

असौ पुनः व्याकरणं ग्रहीषन् सूर्योन्मुखः प्रष्टुमनाः कपीन्द्रः ।
नह्यस्य कश्चित्सदृशोऽस्ति शास्त्रे , वैशारदे छन्दगतौ तथैव ॥[१]

यदा किष्किन्धाकाण्डे हनुमान् रामलक्ष्मणयोः पुरतः याति तदानीं तस्य वचः श्रुत्वा रामो वदति एतादृशवाग्मिता, सावलीलता, विनयकरम्बिता वाणी तस्य एव भवति य चतुर्भिर्वेदैः साकं व्याकरणस्य पारङ्गतो भवति । एवं प्रकारेण गुरुदक्षिणारूपेण स सूर्यपुत्रसुग्रीवस्य साचिव्यं स्वीकृत्य तदाज्ञया रामस्य सेवायां सीतान्वेषणे तत्परो भवति । अशोकवनिकायां सीतया सह संस्कृतेन वक्तुं तस्य सामर्थ्यमासीत्, परन्तु परिस्थितिमनुभूय प्राकृतम् अनुसरति ।

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ॥[२]

एकदा विनोदावसरे अन्यस्मिन् सन्दर्भे रामेण हनुमतः परिचयं पृष्टे सति स हरिसत्तमो ब्रूते –

देहबुद्ध्या तु दासोऽहं जीवबुद्ध्या त्वदशंकः ।
वस्तुतस्तु त्वमेवाहमिति मे निश्चिता मतिः ॥

**नारीशिक्षा**

रामायणस्य नारीपात्राणां चरितं यदि अनुशील्यते तर्हि तासां विद्वत्ता संस्कारश्च कथं चेदानीमपि प्रेरणास्पदं भवति तज्ज्ञातुं शक्यते । राज्याभिषेकात्पूर्वं यदा श्रीरामो मातृसदनं प्रविशति तदानीं कौसल्यां ब्राह्मणानाहूय क्षोमवाससा शरीरं पवित्रीकृत्य यज्ञं कारयन्तीं पश्यति -

सा क्षौमवसना दृष्टा नित्यं व्रतपरायणा ।
अग्निं जुहोति स्म तदा मन्त्रवत्कृतमङ्गला ।।[१]

[१]. वाल्मिकिरामायणम् – 7/36/45-46
[२] वाल्मीकिरामायणम् - 5/30/18

मन्त्रज्ञानेन सह तस्या औषधीनां महज्ज्ञानमासीत् । कीदृशमौषधं लोककल्याणकारि भवति, तस्य सेवनेन धारणेन च कीदृश उपकारो भवति तद् ज्ञात्री आसीत् कौसल्या-

औषधिं च सुसिद्धार्थां विशल्यकरणीं शुभाम् ।
चकार रक्षां कौसल्या मन्त्रैरभिजजाप च ॥[२]

रामायणस्यानुशीलनेन ज्ञायते यत् सीताऽपि विदुषी आसीत् । सा न केवलं वेदज्ञानं बिभर्ति अपि तु पौराणिककथां, लोकगाथां राजधर्मं लोकसंस्कृतिं च सम्यक् जानाति । तस्याः व्रतसम्पन्नं शुचितापूर्णमाचरणं कविवर्णयति -

दीक्षितं व्रतसम्पन्नं वराजिनधरं शुचिम् ।
कुरङ्गशृंगपाणिं च पश्यन्तीं त्वां भजाम्यहम् ॥ [३]

नित्यं देवकार्यं, पितृकार्यं, राजकार्यं यथाशक्ति निभालयति । सदैव कृतज्ञा चावतिष्ठते ।

देवकार्यं स्वयं कृत्वा कृतज्ञा हृष्टचेतना ।
अभिज्ञा राजधर्माणां राजपुत्रं प्रतीक्षति ॥ [४]

सुन्दरकाण्डे रावणेन सह तस्याः उक्तिं प्रत्युक्तिं शास्त्रचर्चां दृष्ट्वा रावणसदृशो विद्वानपि पराजितो भवति ।

बलिपत्नी ताराऽपि परमविदुषी इति विभाति स्म । साऽपि मन्त्रद्रष्टृरूपेण रामायणे वर्णिता । पत्युर्विजयं कामयित्र्या मन्त्रद्वारैव पत्युः स्वस्त्ययनं करोति ।

ततः स्वस्त्ययनं कृत्वा मन्त्रविद्विजयैषिणी ॥[५]

आर्षकाव्यस्येदं नामकरणं वाल्मीकिना रामायणमिति कृतं, परन्तु सीताया महनीयं चरित्रमत्र वर्णितम् । अनुशीलनेनास्य नाम सीतायनं यदि क्रियेत तर्हि शोभनं स्यात् । उक्तं च महाकविना - काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् ।[६]

**रामायणे मूल्यशिक्षा**

---

[१] वाल्मीकिरामायणम् - 2/20/15
[२] वाल्मीकिरामायणम् - 2/25/38
[३] वाल्मीकिरामायणम् - 2/16/23
[४] वाल्मीकिरामायणम् 4/16/12
[५] वाल्मीकिरामायणम् - 4/16/12
[६]. वाल्मीकिरामायणम् - 1/4/7

रामायणस्य मूल्याधारितां शिक्षां मनसि निधाय अर्वाचीनशिक्षाशास्त्रिणो मूल्यशिक्षाया अर्थमिदमामनन्ति । " Value Education means character and moral development, religious education, spiritual development. citizenship education, personal development, social and cultural development ".

अस्य कथनस्य बीजं कथं रामायणे विजृम्भते तस्य कतिपयाः दृष्टान्ताः प्रदीयन्ते – ईश्वर एव सत्यम् । धर्मः सत्यमनुसृत्य जीवति । सत्यबीजस्य प्ररोहणेन धर्मार्थकाममोक्षाङ्गभूतानि वेदोक्तकार्याणि दानयज्ञतपांसि भवन्ति । उक्तं च रामायणे –

सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः ।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥
दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च ।
वेदाः सत्यप्रतिष्ठानास्तस्मात् सत्यपरो भवेत्[१] ॥

मानवजीवनं तच्छरीरं केवलं भोगायतनं न भवति । दुःखं जीवनस्याङ्गभूतम् । दुःखेन विशीर्णो मानवो यदि कर्म न कुर्यात् तर्हि आयुर्वृथा गमिष्यति । एतत्सत्यं सुन्दरदृष्टान्तेन उपमालङ्कारव्याजेन रामायणे वर्णितमस्ति -

न विषादे मनः कार्यं विषादो दोषवत्तरः ।
विषादो हन्ति पुरुषं बालं क्रुद्ध इवोरगः ॥[२]

सर्वपरिस्थितिषूत्साहो नैव त्याज्यः । निरुत्साही जनः सदैव शोकपर्याकुलित: किमपि न कृत्वा मानवजीवनं वृथा नयति । पुनो मानवजीवनमागामिनि जन्मनि मिलिष्यति न वेति कः जानाति । अत एवोक्तमस्ति -

निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः ।
सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति ॥[३]

---

[१]. वाल्मीकिरामायणम् - 2/109/13-14
[२]. वाल्मीकिरामायणम् - 4/64/9
[३]. वाल्मीकिरामायणम् - 6/2/3

रामायणस्य एतादृश्यो भावनाः महाभारते धर्मरूपेण व्युपस्थिताः । रामस्य मर्यादापुरुषोत्तमस्वरूपं तत्कर्मण उदाहरणं नीत्वा महाभारते धर्मरक्षा एव मानवीयं मूल्यं भवतीति स्पष्टं प्रतिभातमस्ति ।

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद् धर्मं न त्यजामि मा नो धर्मो हतोऽवधीत् ॥[१]

यत्र कुत्रापि रामायणे मूल्यत्यागस्य भानं भवति तत्तु धर्मस्य रक्षायै इति मन्तव्यम् । अन्यथा व्याख्या न कर्तव्या ।

मूल्यशिक्षायाः सप्तपक्षाः शिक्षाशास्त्रिभिः स्थिरीकृताः । एतेषां पक्षाणां यदि एकत्रैव दिदृक्षा भवति तद् रामायणेऽन्वेष्टुं शक्यते -




यदि रामायणस्य परिशीलनं क्रियते तदा ज्ञातुं शक्यते यद् राम एव एते गुणा अवतिष्ठन्ति । रामस्य एकपत्नीव्रतं नैतिकतां, पितृसत्यपालने तस्य वनगमनम्, पत्न्याऽभावे स्वर्णमय्या सीतया यज्ञसंपादनम्, उत्तमचारित्र्यम्, युद्धात्पूर्वमङ्गदं दूतरूपेण प्रेषणेन तस्य सहिष्णुता, सर्वेभ्यः अभयदानमहिंसायाः, किष्किन्धायां लङ्कायां च शान्तिस्थापनमिति मानवीयमूल्यानां प्रातिनिध्यं करोति ।

**पर्यावरणशिक्षा**

[१]. महाभारतवनपर्व - 3/3/128

वाल्मीकिः पञ्चमहाभूतानां समरसतां स्थिरतां च स्थापयितुं तन्महत्त्वं विवृणुते । पारम्परिकदृष्ट्या पञ्चमहाभूतानामसन्तुलने पर्यावरणं स्वस्थं भवति । तस्मात् आकाशस्य स्वच्छतायां मेघो रसायनरूपो भवतीति वर्णितमस्ति ।

नवमासधृतं गर्भं भास्करस्य गभस्तिभिः ।
पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम् ॥ [१]

सूर्यकिरणैः समुद्रस्य लावणं जलं संगृह्य स्वगर्भे संस्थाप्य द्यौः पृथिवीवासिनां कृते रसायनं प्रसूते । इदानीम् अस्माकं दोषात् सा एव द्यौः विषाक्तं जलं (ACID WATER) एव वर्षति । अस्य एवाकाशस्य परिशुद्धतायै रामायणे प्रतिपदं यज्ञस्य विधानं भवति । यज्ञनष्टकर्तृणां विनाशाय विश्वामित्रदशरथाद् रामलक्ष्मणौ याचते । ताभ्यां रक्षसान् व्यापाद्य पुनो दण्डकारण्ये ऋषिसंस्कृतिं स्थापयित्वा यज्ञकार्यं प्रवर्तयति ।

पृथिव्या अंशभूताः मनुष्यादारभ्य वृक्षलतासरीसृपादयो भवन्ति । रामायणस्यारम्भ एव क्रौञ्चवधादेव । करुणा एव न केवलं रामायणस्य अपि तु परवर्तिकाव्यानां जननी भवति –

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ [२]

तमसातटे क्रौञ्चवधात् संतप्तस्य वाल्मीकेः श्लोकस्य शोकरूपता रामचरितमयकाव्यसम्पादिका सञ्जाता ।

एवं च पृथिवीपर्यावरणे तीर्थानामन्तर्भावो भवति । रामायणे पुष्कर-चित्रकूट-श्रृङ्गवेरपुरादीनां वर्णनं दृश्यते । तीर्थे तपस्तपनेन सुखाधिक्यं जायत इति पुष्करतीर्थमाहात्म्यं वर्णयता कविना उच्यते -

पश्चिमायां विशालायां पुस्करेषु महात्मनः ।
सुखं तपश्चरिष्यामः सुखं तद्धि तपोवनम् ॥ [३]

वर्णितेषु पुण्यस्थानेषु चित्रकूटस्थानं बहुदिनानि पत्न्या भ्रात्रा च सिषेवे यत्रात्रिप्रभृतय ऋषयः तीव्रां तपस्यां चक्रुः । उक्तं च रामायणे -

---

[१] वाल्मीकिरामायणम् - 4/28/3

[२] वाल्मीकि रामायणम् - 1/2/15

[३] वाल्मीकिरामायणम् - 1/61/3

चित्रकूट इति ख्यातो गन्धमादनसन्निभः ।
यावता चित्रकूटस्य नरः श्रृङ्गाण्यवेक्षते ॥
कल्याणानि समाधत्ते न पापे कुरुते मनः ।
ऋषयस्तत्र बहवो विहृत्य शरदां शतम् ।
तपसा दिवमारूढाः कपालशिरसा सह ॥[१]

किं बहुना । रामायणस्य तृतीयं काण्डमरण्यकाण्डनाम्नाभिहितमस्ति । सुरम्ये स्थाने अरण्यस्य शोभाभिभूतो रामः पञ्चवट्यामाश्रमं निर्मायावतिष्ठते । महर्षिणा अगस्त्येन प्रचोदितः –

इतो द्वियोजने तात बहुमूलफलोदकः ।
देशो बहुमृगः श्रीमान् पञ्चवट्याभिविश्रुतः ॥[२]

एवं च किष्किन्धाकाण्डे पम्पापुष्करिण्याः शोभा रामस्य दुःखं हरति । एतत्सरोवरवर्णने प्रकृत्याः कियती शोभा वाल्मीकिनाऽनुभूता तज्ज्ञातुं शक्यते ।

शोकार्तस्यापि मे पम्पा शोभते चित्रकानना ।
व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ॥
नलिनैरपि संछन्ना ह्यत्यर्थशुभदर्शिता ।
सर्पव्यालानुचरिता मृगद्विजसमाकुलाः ॥[३]

रामायणे नद्यो देवीरूपेण पूज्यन्ते । गङ्गायमुनासरयूतमसादीनां भृशं वर्णनमत्र दृश्यते । वनगमनसमये रामः प्रथमरात्रिं तमसातीरे एव यापयति ।

ततस्तु तमसातीरं रम्यमाश्रित्य राघवः ।[४]

वनवाससमये रामस्तीर्थस्थानानि आश्रमान् भ्रामं भ्रामं कालं नयति स्म । प्रयागतीर्थस्य महिमानं प्रतिपादयता तत्रोच्यते –

यत्र भागीरथीं गङ्गां यमुनाभिप्रवर्तते ।

---

१ वाल्मीकिरामायणम् - 2/54/29-31

२. वाल्मीकिरामायणम् 3/13/13

३. वाल्मीकिरामायणम् 4/1/7

४. वाल्मीकिरामायणम् 2/46/1

जग्मुस्तं देशमुद्दिश्य विगाह्य सुमहद् वनम् ॥ [१]

**राजनैतिकमनोविज्ञानसन्दर्भः**

सुन्दरकाण्डे अशोकवाटिकायां सीतादर्शनसमये हनूमतो हृदये विचारवीचीः समुद्वेजयति तन्मनोविज्ञानदृष्ट्या समीक्षणीयम् । हनुमन्मनसि समुदिताः तर्कवितर्कतरङ्गाः आधुनिकमनोविज्ञानिनां हृदयमावर्जयति । यद्यपि हनुमान् राक्षसान् सर्वान् व्यपादयितुं क्षमस्तथापि तर्कपूर्वकं व्यापारादात्मानमुपसंहरति । तर्कश्चायं वर्तते –

कामं हन्तुं समर्थोऽस्मि सहस्राण्यपि राक्षसान् ।
न तु शक्ष्याम्यहं प्राप्तुं परं पारं महोदधेः ॥
असत्यानि च युद्धानि संशयो मे न रोचते ।
कश्च निःसंशयं कार्यं कुर्यात् प्राज्ञः ससंशयम् ॥ [२]

इदानीमपि युद्धात्पूर्वं सन्धिविषये विमर्शो भवति । तथैव रामेण अङ्गदस्य संप्रेषणं, महाभारते श्रीकृष्णस्य प्रयासोऽधुना राजनीतेः प्रेरणास्रोतांसि भवन्ति ।

कदाचिद् दूतस्य रूपपरिवर्तनं समीचीनं भवति । राज्यकुशलक्षेमं ज्ञातुं दूताः नियुक्ताः भवन्ति । हनुमानपि स्वरूपं त्यक्त्वा दौत्यमाचरति ।

कपिरूपं परित्यज्य हनूमान् मारुतात्मजः ।
भिक्षुरूपं ततो भेजे शठबुद्धितमा कपिः ॥ [३]

अन्यत्र च रावणसमादिष्टाः शुकसारणशार्दूलनामानः चारा वानररूपं धृत्वा रामसेनामध्ये प्रविशन्तः विभीषणेन निवारिताः -

चारो राक्षसराजस्य रावणस्य दुरात्मनः ।
तां दृष्ट्वा सर्वतोऽव्यग्रां प्रतिगम्य स राक्षसः ॥ [४]

रावणश्चारकर्मण: महत्वं प्रतिपाद्य कथयति यत् स्वल्पेनापि प्रयासेन सन्धिं कर्तुं जेतुं वा प्रभवति –

[१]. वाल्मीकिरामायणम् 2/54/2
[२]. वाल्मीकिरामायणम् 5/30/34-35
[३]. वाल्मीकिरामायणम् - 4/3/2
[४]. वाल्मीकिरामायणम् - 6/20/2

चारेण विदितः शत्रुः पण्डितैर्वसुधाधिपैः ।
युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते ॥[१]

**काव्यशिक्षणम्**

भरतस्य नाट्यशास्त्रे अष्टानां रसानां चर्चा वर्तते । तादृशरसप्रसङ्गवैशिष्ट्यं रामायणे कुशलवाभ्यां गीयते –

रसैः शृङ्गारकरुणहास्यरौद्रभयानकैः ।
वीरादिभी रसैर्युक्तं काव्यमेतदगायताम् ॥[२]

परवर्तिकाले आलङ्कारिकैरस्य सन्दर्भस्योपबृंहणं कृत्वाऽलङ्कारशास्त्रं निरमायि । काव्यतत्त्वेन सह सङ्गीतशास्त्रस्यापि सूचना रामायणे प्रभूतं दृश्यते । लवकुशौ कथं सङ्गीतविशारदावास्तां तत् संसूचयता वाल्मीकिना उच्यते ।

तौ तु गान्धर्वतत्त्वज्ञौ स्थानमूर्च्छनकोविदौ ।
भ्रातरौ स्वरसम्पन्नौ गन्धर्वाविव रूपिणौ ॥[३]

एवं सुन्दरकाण्डे हनुमता यदा लङ्कानगर्यां भवनाद् भवनमवप्लुत्य सीता अन्विष्यते तदानीं प्रासादेषु पानभूमिषु रक्षःपत्नीनां सङ्गीतमूर्च्छना श्रूयते –

भेरीमृदङ्गाभिरुतं शङ्खघोषविनादितम् ।[४]

अपि च

नृत्येन चापरा क्लान्ताः पानविप्रहतास्तथा ।
मुरजेषु मृदङ्गेषु चेलिकासु च संस्थिताः ॥[५]

विदन्ति विदितवेदितव्या विद्वांसो यद् रामायणमादिकाव्यं भवति यत्र सीताचरितं वर्णयता वाल्मीकिना मर्यादापुरुषोत्तमस्य रामस्य गुणगणा दर्शिताः, तमधिकृत्य सप्तकाण्डेषु यद् यद् वर्णनं विहितं तत्र शिक्षासम्बन्धिनः सन्दर्भाः स्वत एव आयान्ति ।

[१]. वाल्मीकिरामायणम् - 6/29/21
[२]. वाल्मीकिरामायणम् - 1/4/9
[३]. वाल्मीकिरामायणम् - 1/4/10
[४]. वाल्मीकिरामायणम् - 5/6/12
[५]. वाल्मीकिरामायणम् - 5/11/5-6

रामचरितप्रतिपादनावसरे रामस्य गुणेषु आदर्शशिष्यस्य वसिष्ठविश्वामित्रादिगुरूणां प्रसङ्गेन आदर्शगुरूणाम्, तपोवनपुष्करिणीनां वर्णनेन पर्यावरणशिक्षायाः सीतानसूयादीनां वर्णनेन नारीचरित्रस्य उदात्तीकरणं सर्वत्र मूल्यशिक्षायां चर्चाः दरीदृश्यन्ते । एतेषां तत्वानां सामान्यं प्रदर्शनमेवास्मिन् शोधप्रबन्धे कृतं वर्तते ।

****

## सन्दर्भग्रन्थाः


1. पुराणविमर्श , आचार्य बलदेव उपाध्याय, चौखम्बा विद्याभवन, वाराणसी, 2010
2. Puranic Encyclopedia , Vetam Mani , Motilal Banarasi Dass , Delhi
3. रामचरितमानस, गीताप्रेस, गोरखपुर
4. Ramayana of Valmiki ( Sanskrit Texts and English Translation) Vol-1 to Vol-4, Parimal Publications , Delhi – First Edition 1998
5. वाल्मीकिरामायणम् , गीताप्रेस , गोरखपुर - 2000

# अनुशिक्षणव्यवस्था

## (TUTORIAL SYSTEM)

**आचार्य: चन्द्रकान्तः**

शिक्षाविभागाध्यक्षः

प्राचीनकालादारभ्य भारते शास्त्राध्ययनपरम्परायामनुशिक्षणपद्धति:नामोल्लेखेन विना निरन्तररूपेणानुष्टीयमाना वर्तते।परन्तु सा पद्धति: साक्षादनुशिक्षणं न प्रतिदर्शयति तथाप्यनुशिक्षणस्य जनने हेतुरभूदिति कथने न कस्यापि विप्रतिपत्ति:। कक्ष्याशिक्षणे शिक्षक: छात्राननन्विष्य,कक्ष्यां प्रति समानीयसर्वान् बोधयतीति सम्प्रदाय:।तदेवानुशिक्षणे कक्ष्यायामधीत्य छात्रा:ज्नानस्य परिष्कारार्थं स्वयं शिक्षकस्य समीपमायान्ति इति विशेष:।पाश्चात्यदेशेषु अस्यानुशिक्षणस्य क्रमश: विकास: व्यवस्थितरूपेण जातो परिलक्ष्यते।तत्र च क्रिस्तो: पूर्वमपि ज्येष्ठच्छात्रा: कनिष्ठच्छात्रान् बोधयन्त:निरीक्षमाणाश्चासन्नित्यवगम्यते।एष: सम्प्रदाय:न नूतन:न च केवलं पाश्चात्य: इत्यप्यवगम्यते।क्रिस्तो: पूर्वं ४६९-३९९ तमवर्षेषु जीवित: सोक्रेटिस् महोदय:सर्वदा सम्भाषणमाध्यममाश्रित्य बोधयति स्म:।स:सर्वदा प्रश्नान् पृष्ट्वा छात्रमुखादुत्तरं स्वीकुर्वन्नेव बोधयति स्म।ग्रीक्देशस्य छात्रा:अपि सर्वदा प्रश्नोत्तरप्रक्रियामिच्छन्त:स्वविचारानपि प्रकटयन्ति स्म।छात्रैरुपस्थापितविचारान् सोक्रेटिस् महोदय: विवेचयितुं सदा उत्सहते स्म।स च महोदय: विद्यार्थिनां मस्तिष्के विचारारोपणापेक्षया तेषां मनसि सुप्तरूपेण विद्यमानस्य सार्वत्रिकसत्यस्य बहिरानयनमेव बोधनमिति दृढं विश्वसिति स्म।अत: इदं तत्त्वं तन्नाम्नि एव प्रसिद्धमभूत्।आक्स्फर्ड् विश्वविद्यालयस्य प्रारम्भिककाले एक एव छात्र: एकस्य शिक्षकस्य समीपं गच्छति स्म।कालान्तरे विद्यार्थिनां संख्याया:आधिक्यकारणादेक:शिक्षक:छात्राणां लघुसमूहं बोधयेदिति नियम:समाश्रित:।परन्तु केम्ब्रिड्ज् विश्वविद्यालये एक: शिक्षक: द्वौ छात्रौ निरीक्षते स्म।क्रमश: इंग्लेण्ड्देशे महाविद्यालयानां संख्यापि अधिका समजायत।तस्मात्कारणात् विशेषबोधनव्यवस्थाया:उदय:समभूदित्यवगम्यते।

अष्टमशतके भारतस्योपरि मोहम्म्दीया: यदा आक्रमणमकार्षु: तदा अत्र भारते वैदिकशिक्षणसंस्थास्वपि बौद्धानां शिक्षणपद्धति: वैदिकशिक्षणपद्धतिश्चानुष्ठानक्रमे

आस्ताम्।तदनन्तरमिस्लामाक्रमणकारणात् मदरसाशिक्षणपद्धतिरपि समाविष्टा अभूत्। एतासु तिसृषु पद्धतीष्वपि छात्रस्येच्छानुसारं कमप्येकं विषयं स्वीकृत्य विशेषाध्ययनं कर्तुमवसरः आसीत्। अस्मिन् समये स्तरानुगुणच्छात्रामभावात् शिक्षणस्य ह्रासः जायमानः आसीत्।अपि च यदा वरिष्ठःशिक्षकः नायाति तदा ज्येष्ठःछात्रः शिक्षकस्य स्थानं पूरयन् कनिष्ठच्छात्रान् बोधयति स्म। इयं पद्धतिः लोकभाषायां "हिरेमणि" पद्धतिरिति प्रसिद्धा अवर्तत।

षोडशे शतके जर्मन् स्पेन् इत्यादिषु देशेषु अनुशिक्षणव्यवस्थां [ट्युटोरियल् सिस्टम्] नियमितरूपेण अन्वसरन्। स्कोट्लेण्ड्देशस्य एन्ड्रु बेल्महोदयःअष्टादशशतके ब्रिटीष्सैनिकानां कृते भारतीयविदेशीसैनिकानां कृते च मद्रास्नगरे [चेन्नै]विद्यालयमेकं स्थापयामास।एषः महोदयः १७९७ तमे वर्षे भारतीयशास्त्राणामध्यापने प्रयुक्तामेवानुशिक्षणपद्धतिं परिवर्त्य कांचिदेकां पद्धतिं,छात्राणां सहाध्यायिनां च कक्ष्यानिरीक्षणार्थमनुशासनसम्पादनार्थं नूतनपद्धतिरूपेण प्रायुनक्। बेल्महोदयस्यैनां नवीनां पद्धतिं इंग्लेण्ड्देशस्य प्रशिक्षकः जोसेफ् ल्यांकस्टर्महोदयः स्वीकृत्य लघुपरिवर्तनमपि विधाय ट्युटोरियल्पद्धतिरिति प्रत्यपादयत्।ततः बेल्-ल्यांकस्टर् पद्धतिमनेके शिक्षकाः अन्वसरन्।अपि च ते शिक्षकाः स्वशिक्षणसंस्थायाः ज्येष्ठच्छात्रेभ्यः एकं विषयं बोधयित्वा तान् ज्येष्ठान् छात्रान् कनिष्ठच्छात्रेभ्यः तमेव विषयं बोधयितुं सूचयामासुः।पुनरल्पेन परिवर्तनेन सह इमां पद्धतिं १८०० तमे वर्षे युरोप्खन्डस्य बहवो हि देशाः अनुसर्तुं समारभन्त। यदा बोधनवृत्तिमारब्धुं प्रशिक्षणमनिवार्यमिति ते ह्यविन्दन् तदा शिक्षाक्षेत्रे अधिकं धनं विनियोक्तुं निरणैषुः।तदनन्तरं अमेरिकादिषु पाश्चात्यदेशेषु "एकप्रकोष्ठविद्यालयगृहमिति [ओन् रूम् स्कूल् हौस् ]कामपि पद्धतिमन्वसरन्।

अनुशिक्षणस्य(ट्युटोरियल्) व्याख्या –

न्यूनातिन्यूनं चत्वारः छात्राः, अधिकाधिकमष्टौ छात्राः कियतः विषयान् विद्यालये अधीयते तेषां विषयाणां परिपूर्णावगत्यर्थं तत्त्द्विषयस्य शिक्षकान् सप्ताहे एकस्मिन् दिने एकस्मिन्नवधौ एकघण्टाकालं यावत् मिलेयुः।गतेषु दिनेषु पाठितविषयसम्बद्धानां सन्देहानां समाधानमवाप्य,लिखितायाः टिप्पण्याः वा लिखितस्य दत्तकार्यस्य परिष्कारमप्यवाप्य स्वकीयाधिगमस्तरं परिवर्धयेयुरित्यनुशिक्षणस्यार्थः।अनुशिक्षणकक्ष्यायामुपवेशनं वृत्ताकारेण

भवति अत: अनुशिक्षणं शिक्षाव्यवस्थायां कण्ठाभरणमिव शिक्षणस्य शोभां वर्धयतीति कथने नास्त्यतिशयोक्ति;।

**अनुशिक्षणस्यावश्यकता –**

ज्नानं य: अन्विषति स: गुरूणां वा बुधानां सविधे सततं प्रश्नान् पृष्ट्वा ज्नानं सम्पादयेदिति गीतोपदेश:। "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिन: तत्त्वदर्शिन:"॥इति।भ.गी.४.३४

भगवद्गीतायामेवान्ते श्रीकृष्ण: वदति यदेतावता यदुक्तं तत्सर्वमेकाग्रमनसा श्रवणेन मनस: अज्ञानं दूरमगाद्वा इति प्रश्नमप्यपृच्छत्। यथा हि

कच्चिदेतच्छ्रुतं पार्थ त्वैयैकाग्रेण चेतसा।कच्चिदज्ञानसंमोह: प्रनष्टस्ते धनञ्जय॥भ.गी.१८-७२

अर्थात् शिष्यस्य शास्त्रार्थग्रहणाग्रहणविवेकबुभुत्सया श्रीकृष्ण: पृच्छति। तदग्रहणे ज्ञाते पुन:ग्राहयिष्यामि उपायान्तरेणापि इति प्रष्टुरभिप्राय:। यत्नान्तरं चास्थाय शिष्यस्यकृतार्थता कर्तव्या इति आचार्यधर्म:प्रदर्शितोऽस्ति। अस्मात् किमर्थं विशेषेण अनुशिक्षणसदृशकक्ष्या: स्वीकर्तव्या इति शास्त्रीयं मार्गदर्शनं प्राप्यते। एतदनुसारं सर्वासु शैक्षिकसंस्थासु ज्ञानार्जनार्थं प्रविष्टा: सर्वेऽपि छात्रा: ज्ञानप्राप्त्यर्थं प्रामाणिकं प्रयत्नं कुर्यु:। एतदर्थं सर्वा अपि शिक्षणसंस्था: अनुकूलयुतं वातावरणं निर्मातुं सर्वविधप्रयत्नस्य कार्यान्वयनमनिवार्येण सम्पादयेयु:।

प्राय: छात्रा: पठितस्य विषयस्य दशप्रतिशतं(१०%), श्रुतस्य विषयस्य विंशतिप्रतिशतं (२०%), दृष्टस्य सन्दर्भस्य त्रिंशत्प्रतिशतं (३०%) च सर्वदा स्मर्तुमर्हन्ति।यदि श्रवणेन सह विषयस्य वा घटनाया: अवलोकनमपि कुर्वन्ति तर्हि पंचाशत्प्रतिशतं(५०%) विषयं स्मर्तुं समर्था भवन्ति। पुनश्च यदि छात्रा: अध्येयविषयसम्बद्धं क्रियाकलापं स्वत:: कृत्वा अधिगच्छन्ति तर्हि नवतिप्रतिशतं(९०%) स्मर्तुमर्हन्ति।अत: सर्जनात्मकक्रियाकलापेष्वात्मानं योजयितुमनुशिक्षणव्यवस्थाया:( ट्युटोरियल् ) संघटनमत्यन्तमावश्यकमस्ति।

भारतदेशस्य केषुचिद्विश्वविद्यालयेषु एव एषा व्यवस्था प्रायुङ्क्त।कुत्रचिदत्यल्पसमूहस्य कृते कुत्रचिद्विंशतेरधिकस्य छात्रसमूहस्य कृते एषा व्यवस्था प्रकल्पिताऽवर्तत। अपि च कुत्रचिच्छात्राणां सङ्ख्याया आधिक्यकारणात् शिक्षका: कक्ष्यायां

व्याख्यानप्रदानमेव समारभन्त। १९४८ तमे वर्षे राधाकृष्णन्महोदयस्याध्यक्षतायां विश्वविद्यालयायोग: प्राकल्पि। स चायोग:अनुशिक्षणव्यवस्थाया (ट्युटोरियल्) सङ्घटने विद्यमाना: न्यूनता: क्लेशांश्च परिशील्य तस्यां प्रगत्यर्थं परिवर्तनं समसूचयत् । एतन्महत्वं मनसि निधाय विश्वविद्यालयानुदानायोग:(यु.जी.सी)१९५६ नियमस्य (१९५६.नं.३)क्लौस् एफ्. उपविभागस्य .१. इत्यस्य २६ तमान्वितौ प्रदत्ताधिकारनुसारं २५\११\१९८५ तमे दिने कञ्चन विशिष्टं निर्णयमकार्षीत्। तदनुसारं प्रत्येकं व्याख्याता सप्ताहे न्यूनातिन्यूनं चत्वारिंशतद्कक्ष्या:(४०)स्वीकुर्यात् ।अपि च प्रयोगालयकार्यं येषां व्याख्यातृणां न भवति त एव केवलं छात्राणां लघुसमूहस्य कृते सप्ताहे घण्टाचतुष्टयमनुशिक्षणकक्ष्या: (ट्युटोरियल्)स्वीकुर्युरिति नियममकार्षीत् । एतस्मात् विविधराज्यसर्वकारा: पृथङ्नियममुपलभ्यमानव्याख्यातृणां सङ्ख्यानुगुणं प्राकल्पयन्। यथा कर्नाटकसर्वकार: प्रायोगिकविषयबोधका: घण्टाद्वयमन्ये च घण्टाचतुष्टयं बोधयेयुरिति १९९० तमे वर्षे एप्रिल् मासे निर्णयमकरोत्।

**अनुशिक्षणस्य लाभा:**[Benefits of Tutorial System]

1. अनुशिक्षणकक्ष्यायामत्यल्पा एव छात्रा भवन्ति इत्यत: शिक्षका:उत्तमाधिगमवातावरणं निर्मातुं शक्नुवन्ति।छात्रैस्सह आत्मीयं सम्बन्धं स्थापयितुं प्रभवन्ति। विषयसम्बद्धं सर्वविधं मार्गदर्शनं प्राप्तुं छात्रास्शक्नुयु:।

२. अनुशिक्षणकक्ष्याया: (Tutorial class) निर्णय: सप्ताहात्पूर्वमेव भवतीत्यत: शिक्षका: छात्रेभ्य: वास्तवानुभवप्रदानार्थमपेक्षिता: योजना: कृत्वा आगन्तुं सुलभं भवति।

३. छात्रा: गृहे सम्पादितस्य दत्तकार्यस्य विषये विशेषेण शिक्षकैस्सह चर्चां विधाय विस्तृतज्ञानं सम्पादयितुं समयमवसरञ्च प्राप्नुवन्ति।

४. छात्रा:अधीतेन विषयेण सम्बद्धं सामयिकं परिवर्तनं वा प्रगतिमनुसृत्य वास्तविकी: सङ्गती: ज्ञातुं समर्था भविष्यन्ति। पुस्तकं, नियतकालिकं, वृत्तपत्रं, वेब्सैट्, इत्यादीनामुपयोगस्य ज्ञानं प्राप्तुमर्हन्ति।

५. शिक्षका: वैयक्तिकावधानं विशेषेण स्थापयितुं शक्ता भवन्ति। अत: निश्चितपाठ्यक्रमं समये पूरयितुमपि शक्नुवन्ति।

६. अनुशिक्षणकक्ष्यायाः सर्वेऽपि छात्राःस्वपाठ्यक्रमेण सह सम्बद्धान् प्रश्नान् पृच्छन्तः, तदुपरि समाक्षिपन्तः,सन्देहान् प्रकटयन्तः समूहस्यान्यैस्सदस्यैस्सह चर्चां कुर्वन्तः,चर्चायां विविधाधारान् प्रस्तुवन्तः,विषयस्य परामर्शं विधास्यन्तीत्यतः छात्रेष्वन्तर्निहितचिन्तनशक्तेःप्रतिभायाःप्रतिपादनसामर्थ्यस्य च ज्ञानं शिक्षकः अनायासेन प्राप्तुमर्हतीति महान्लाभः शैक्षिकप्रक्रियायाःकृते सञ्जायते ।

७. शिक्षणस्य निर्दिष्टलक्ष्यं प्राप्तुं छात्राःशिक्षकस्य कालोचितसहयोगकारणात् समर्था जायन्त इत्यत्र नास्ति सन्देहः।अनेनावगम्यते यच्छैक्षिकप्रक्रियायाः स्तरोन्नयने गुणवत्ताधाने चेयमनुशिक्षणव्यवस्था अत्यन्तोपयोगवतीति ।

अनुशिक्षणव्यवस्थापनरीतिः

प्रत्येकेण छात्रेण सम्पादितस्य कार्यस्य लिखितानामुत्तराणाम् अभिव्यक्तीकृतानामभिप्रायाणाञ्च कृते काले समुचितं पुनर्बलनं शिक्षकः दद्यादेव । येन छात्राणां मनस्सु सुप्तरूपेण विद्यमाना भीतिः वा शङ्का निर्गमिष्यति । मुक्तभावेन छात्रःस्वाभिप्रायप्रकटनसामर्थ्यमप्यवाप्नोति । आकस्मिकरूपेण समागम्यमानानां परिस्थितीनाञ्च अभिमुखीकरणसामर्थ्यमवाप्य तादृशानां समाधानान्युपस्थापयितुं क्षमोऽपि जायते ।अभिप्रायप्रकटनं कथं कर्तव्यमिति कल्पनामवाप्नोति । अपि च विद्यार्थिषु स्पर्धात्मकमानसिकतां वर्धयितुमपेक्षितस्वरूपेण लघुसमूहं निर्माय चिन्तनार्थमधिकमवसरं कल्पयेत्प्रोत्साहयेच्चाध्यापकः।पठ्यविषयेण साक्षात्सम्बद्धं तत्पूरकञ्च विषयमवगमयितुमुचितान् प्रश्नान् पूर्वमेव शिक्षक; छात्रेभ्यः दद्यात् ।छात्रस्य नाम,तेनाध्येयविषयविवरणं सप्ताहात्पूर्व्मेव शिक्षकः सूचनाफलके स्थापयेत् ।अस्मात् छात्रः स्वानुभवानत्र योजयित्वा विवरीतुमथवा लिखित्वा दातुमप्यर्हति ।अहमस्मिन् विषये सम्यङ्वक्तुं लेखितुञ्च शक्नोमीति धैर्यमवाप्नुयात् । कासाञ्चित्परिकल्पनानां विशेषचर्चासमये विषयस्य स्थूलपरिचयं शिक्षकः कारयेत् ।विषयस्य गभीरं विवरणमुपस्थापयितुं तुलनात्मकमध्ययनं विधातुञ्च अवसरं प्रकल्पयेत् ।यदा कक्षायां चर्चा करणीया इति निर्धार्यते तदा विषयसम्बद्धमेकं प्रश्नं श्यामफलकस्योपरि स्पष्टतया शिक्षकः लिखेत् ।तदनन्तरं तत्समूहस्य छात्राःएकस्मिन् श्वेतपत्रे निमेषचतुष्टयं यावत्स्वमनोगतं विषयसम्बद्धं लिखेयुः ।पुनश्च निमेषचतुष्टयं पार्श्वस्थैस्सह चर्चयेयुः ।प्रत्येकं छात्रः चर्चायां भागग्रहणमनिवार्येण यथा

कुर्यात्तथा वातावरणं निर्मितं भवेत् ।अस्माच्छात्रा: चर्चार्थं स्वयं केचन प्रेरिता भूत्वा स्वानुभवान् विचारांश्च सोत्साहमुपस्थापयिष्यन्ति । अनेन छात्रेषु स्पर्धात्मक मनोभाव: वर्धते ।

एकस्यामनुशिक्षणकक्ष्यायां अष्टौ छात्रा: वर्तुलाकारेणोपविशेयु: ।एकस्मै छात्राय त्रिवारं विषयं मण्डयितुमवसर: पदेयो भवति ।शिक्षकं परित: छात्रा उपविशेयु: यस्मात् शिक्षक:समेषां छात्राणां मुखमवलोकयितुं शक्नुयात् ।एकवारं यदा प्रतिपादयति तदा लघुसूचिकां तस्य पुरत: स्थापयेच्छिक्षक: । एक: पर्याय: समाप्त इति सूचयति सा लघुसूचिका । प्रतिपर्यायमपि भाषितुं समय: पूर्वमेव निर्धारणीयो वर्तते । प्रत्येकं छात्र: न्यूनातिन्यूनमेकवारं भाषेत ।अन्ततो गत्वा सर्वेऽपि छात्रा: भाषेरन् ।अनेन सर्वे भाषणकौशलं प्राप्नुवन्ति ।

छात्रेभ्य:अभ्यासार्थं स्वीक्रियमाणकौशलानां विषये बोधयेदध्यापक: ।चिन्तनकौशलस्य ग्रहणकौशलस्य स्मरणकौशलस्य अनवगमे जाते सति क्रियमाणप्रक्रियाविशेषस्य च समग्रज्ञानं आदावेव दद्यात् अन्यथा समग्रानुशिक्षणप्रक्रियैव निष्फला भविष्यति । इत्थमनुशिक्षणमनुष्ठीयते चेच्छिक्षा गुणवत्तया युता भविष्यत्येवेति शिक्षाविदामभिप्राय: । एवञ्च इयं व्यवस्था प्राथमिकस्तरे विशिष्टं प्रभावं न जनयति, माध्यमिकस्तरे छात्रेषु कुतूहलं वर्धयति प्रयोजनवती च वर्वर्ति ।माध्यमिकस्तरोत्तरस्तरेषु सर्वतोभावेन लाभदायिनीति निश्चप्रचम् ।प्रशिक्षणे तु अनिवार्येणेयं कक्ष्या सञ्चालनीयैव वर्तते ।यतो हि प्रशिक्षणानन्तरं ते छात्रा:शिक्षका भविष्यन्ति ।समाजस्य परिवर्धकरूपेण परिवर्तकरूपेण आदर्शरूपेण च कार्यं कुर्यु: । अत: सर्वाङ्गीणविकासमुपलक्ष्य क्रियमाणे प्रशिक्षणे इयमनुशिक्षणव्यवस्था पाठ्यक्रमस्य अत्यन्तं प्रधानमङ्गं भूत्वा प्रशिक्षणक्षेत्रं प्रकाशयति ।

**उद्धरणानि-**

१.भगवद्गीता ४.३४

२.भगवद्गीता १८.७२

## सहायकग्रन्थसूची

१.उच्चतरमनोविज्ञान, २००९,रघुनाथ सफाया,विनोदपुस्तकमन्दिर आग्रा।

२.शैक्षिकविश्वकोश, २०१६,कर्नाटकमुक्तविश्वविद्यालय मैसूरु।

३.भारतीय आधुनिकी शिक्षा ,२०१०,डा. लोकमान्यमिश्र, मृगाक्षीप्रकाशन , लक्नो।

४. शिक्षा मे नवाचार और नवीन प्रवृत्तियां, २०००, भाई योगेन्द्र जित, विनोदपुस्तक मन्दिर आगरा।

५. भाषाशिक्षणे नूतनप्रवृत्तय: ,२०१६, शिक्षाशास्त्रविभाग,राजीवगान्धीपरिसर, शृङ्गेरी।

# अधिगममूल्याकलनम्

**डा. रामचन्द्रुल बालाजि**

आचार्यः, शिक्षाविभाग

संरचनात्मकाता छात्राणां अभिवृत्तिसाधकसिद्धान्तेषु प्रमुखः भवति । इदमेकं शात्रीयमध्ययनं भवति । अत्र Piaget, Vygotsky's, Bruner, Ausubel इत्यादयः संरचनात्मकोपागमस्य अभिवृद्धये यत्नमकुर्वन् ।

साधारणतया कक्ष्यासु अध्यापकाः प्रश्नान् पृच्छन्ति । तत्र समर्थाः छात्राः उत्तराणि प्रयच्छन्ति । ये उत्तराणि वक्तुं समर्थाः ते प्रतिभाशालिनः इति, अन्यान् मन्दाधिगमच्छात्राः इति सामान्यभावना भवति । प्रश्नानाम् उत्तराण्यपि प्रायः ज्ञानात्मकस्तरे एव भवन्ति । तदनन्तरस्तरस्य विषये यत्नः न भवति । सामान्यतया कक्ष्यासु छात्रैः गभीरचिन्तनं कर्तव्यमिति अध्यापकाः नैव चिन्तयन्ति । परन्तु संरचनात्मकशिक्षानीतौ छात्राणां कौशलानां विषयज्ञानस्य चिन्तनस्य अवबोधस्य च विकासाय प्रयत्नः भवति । एतेषां मते छात्राः स्वयं अधिगमप्रक्रियायां भागं गृहीत्वा स्वकीयानुभवद्वारा ज्ञानं प्राप्नुवन्ति । अत्र अधिगन्ता स्वयमेव विषयपरिज्ञानं प्राप्नोति इत्यतः अधिगन्तृषु साम्यं न भवति । प्रत्येकोऽपि स्वकीयसामर्थ्यानुगुणं ज्ञानसंरचनां करोति ।

कक्ष्यासु प्राथमिकज्ञानापेक्षया विशेषचिन्तनाय अवकाशः अत्र कल्प्यते । एकैकसमस्यायाः बहवः परिष्कारमार्गाः भवन्ति । तेषामाविष्करणं अत्र प्रधानं लक्ष्यं भवति । छात्राणां गभीरचिन्तनार्थम् अवकाशः कल्पनीयः इति संरचनावादिनां प्रधानाशयः अस्ति । मेनफाक्स नामकः स्वकीयमूलप्रतिबिम्बाः इत्यस्मिन् ग्रन्थे एवं प्रतिपादयति यत् छात्राणामुपरि अस्माकं विद्यमानपूर्वचिन्तनानि तेषां शक्तिसामर्थ्यानां निरोधकानि भवन्ति । यदि छात्रेभ्यः उत्तमः अवसरः परिकल्प्यते तेषां चिन्तनानि तैः कृतकार्याणि च दृष्ट्वा अस्माकम् आश्चर्यमेव भवति । अतः कक्ष्यायां छात्रेभ्यः गभीरचिन्तनाय विमर्शनात्मकरूपेण चिन्तनाय च अवसरः परिकल्पनीयः । तदर्थं बोधनाधिगमप्रक्रियायां षट् मुख्यकारकाणि भवन्ति । तानि –

1. सन्दर्भपरिकल्पनम् (Developing a situation)
2. समूहेषु विभजनम् (Dividing into groups)
3. सन्धानीकरणम् (Bridging)
4. प्रश्नकरणम् (Questioning)
5. प्रदर्शनम् (Exhibiting)
6. अधिगमप्रतिस्पन्दनम् (Reflection)

Biological science curriculum study (BSCS) इत्यस्य मुख्यपरिशोधकः Roger Bybee नामकः संरचनात्मकोपागमे पञ्च सोपानानि प्रदर्शितवान् । तानि five E's इति प्रसिद्धानि । यथा –

1. संलग्नता (Engage)
2. अन्वेषणम् (Explore)
3. विवरणम् (Explain)
4. विस्तृतीकरणम् (Elaborate)
5. मूल्याङ्कनम् (Evaluation)

संरचनात्मकोपागमे अध्यापकस्य पात्रं केवलं मार्गदर्शकरूपेण भवति । अपेक्षितवातावरणस्य परिकल्पनं छात्राणां कृते प्रोत्साहप्रदानं, छात्रमुखात् विभिन्नचिन्तनानां बहिरानयनं, समस्या परिहाराय स्वकीयचिन्तनानुसारेण परिहारोपायचिन्तनाय च प्रेरणादानम्, समस्या परिहारनिष्कर्षकथनार्थं प्रेरणम्, तार्किकचिन्तनाय अवसरकल्पनम् भवति ।

संरचनात्मकवादिनां मते मूल्याकलनं समग्ररूपेण भवति, न केवलं छात्रस्य उत्तरदानेन, किन्तु समग्रव्यक्तित्वविकासाय मूल्याङ्कनम् उत्तमसाधनरूपेण मन्यते । छात्राणां कृते विविधपरिष्कारमार्गान्वेषणाय प्रोत्साहः दातव्यः । एवं छात्रनिर्णयस्य निरूपणाय च प्रेरणा दातव्या । कक्ष्याप्रकोष्ठेषु छात्रैः दत्तस्य समाधानस्य विषये विवेचनं कर्तव्यं भवति । अध्यापकेन किं बोधितमित्यपेक्षया छात्रैः किम् अवगतम् इत्यस्मिन् विषये दृष्टिः स्थापनीया । एतादृशानां सर्वेषामुत्तममूल्याकलनं विना साधनं नैव सम्भवति । अतः उत्तममूल्याकलनस्य विषये अवधानं किञ्चिदपेक्षते ।

मूल्याकलनम् आङ्लभाषायां Assessment इति नाम्ना कथ्यते । Assessment इति पदं Assider इति लेटिन् भाषापदात् निष्पन्नम् । अस्य अर्थः भवति परीक्षणम् । छात्राणां प्रगतेः स्तरं ज्ञात्वा एकस्य निर्णयस्य प्राप्तिरेव मूल्याकलनं भवति । अनेन छात्राणां कृते किं बोधनीयम्? कथं बोधनीयम् ? इति स्पष्टता भवति ।

छात्राणां निष्पादनानां (Performance) परिज्ञानाय उद्दिष्टविविधकार्यक्रमाणां पद्धतीनाञ्च समूह् एव मूल्याकलनं भवति । मूल्याकलनपदं यद्यपि मूल्याङ्कनस्य समानार्थे प्रयुज्यते, परन्तु मूल्याङ्कनात् संकुचिते अर्थे मापनात् विस्तृतार्थे च मूल्याकलनं भवति इति कथने दोषः नास्ति । उदाहरणार्थं छात्राणां कृते विविधविषयेषु परीक्षाः भवन्ति । एतानि मापनानि भवन्ति । परीक्षानिर्वहणानन्तरं तद्वारा प्राप्तसमाचारानुसारं शैक्षिकनिर्णयाः क्रियन्ते । अत्र अन्तिममूल्यांकनस्य (Final Decision) पूर्वप्रक्रिया एव मूल्याकलनं भवति ।

**मूल्याकलनस्य निर्वचनानि**

1. जेरल्ड वालेस्, स्टिपिन्, तथा सि. लारेन्स इत्यादीनां कथनानुसरं निरन्तरं जायमानमूल्याङ्कनव्यूहानाम् अन्वयद्वारा छात्राणाम् उपलब्धेः ज्ञानप्रक्रिया एव मूल्याकलनं भवति ।

2. राबर्ट वि. लिन् तथा डेविड् मिल्लर महोदययोः अनुसरेण विभिन्नप्रकारकाणां मूल्याकलनसाधनानाम् उपयोगेन एकस्य व्यक्तिविशेषस्य उपलब्धिस्तरज्ञानप्रक्रिया एव मूल्याकलनं भवति ।

3. NCERT संस्थानुसरं विविधशैक्षिकांशानां छात्राणां अभिवृद्धिस्तरस्य च परिगणनप्रक्रिया एव मूल्याकलनं भवति ।

उपर्युक्तनिर्वचनानुसारं मूल्याकलनं प्रधानतया द्विविधं भवति ।

1. व्यक्तिनिष्ठमूल्याकलनम् (Subjective Assessment )
2. वस्तुनिष्ठमूल्याकलनम् (Objective Assessment)

**व्यक्तिनिष्ठमूल्याकलनम्**

शास्त्रीयाधारं विना केवलं व्यक्तेः मानसिकचिन्तनाधारेण निर्णयप्रकारः अत्र भवति । अत्र केवलं मनः एव प्रमाणं भवति । अस्मिन् मूल्याकलने मापनसाधनानाम् आवश्यकता

नास्ति । केवलं तेषां तेषां व्यक्तिविशेषाणाम् अनुभवद्वारा निरीक्षणद्वारा च क्रियमाणं मूल्याकलनं भवति । अतः कदाचित् इदम् एकरूपेण भवितुं नार्हति ।

**वस्तुनिष्ठमूल्याकलनम्**

**अस्मिन् मूल्याकलने निर्दिष्टसाधनानाम् उपयोगेन संगृहीतानां विश्वसनीयदत्तांशानाम् आधारेण मूल्याकलनं भवति । अत्र निर्दिष्टमापनानां सांस्कृतिक-वैज्ञानिक-सामाजिकांशानाम् आधारेण स्तरनिर्णयचिन्तनं भवति । अत्र प्रामाणिकानां मापनानाम् आधारेण आकलनं भवतीत्यतः अत्र वस्तुनिष्ठता विश्वसनीयता प्रामाणिकता च अधिकतया भवितुमर्हति ।**

**पुनः अन्यरूपेण चिन्तयामश्चेत् मूल्याकलनं त्रिप्रकारकं भवति । यथा –**

1. **अधिगमस्य मूल्याकलनम्** (Assessment of Learning)
2. **अधिगमाय मूल्याकलनम्** (Assessment for Learning)
3. **अधिगम एव मूल्याकलनम्** (Assessment as Learning)

**अधिगमस्य मूल्याकलनम्**

कक्ष्यायां निर्दिष्टलक्ष्यानुगुणं बोधनं क्रियते । बोधनानन्तरं क।ञ्चित् कालानन्तरं छात्रैः कियान् अधिगमः प्राप्तः इति ज्ञानार्थं परीक्षणं क्रियते । एतदेव अधिगमस्य मूल्याकलनं भवति । अनेन कक्ष्ययां बोधनं सफलं जातं न वा इति ज्ञातुं शक्यते । एकस्य पाठस्य समाप्त्यनन्तरं तस्मिन् पाठे छात्राणां ज्ञानस्य मूल्याकलनम् अत्र भवति । एवमेव एकस्य निर्णितस्य कालांशस्यानन्तरं कक्ष्यायां छात्राणां पुरोगतिविषये ज्ञानाय क्रियमाणं मापनम् एव अधिगमस्य मूल्याकलनं भवति । इयं तु बोधनान्तर्दशा भवति । प्रायः कक्ष्यायां सञ्चाल्यमाना एकक-मासिक-त्रैमासिक-षाण्मासिक-वार्षिकपरीक्षाः एतादृशमूल्याकलनस्य उदाहरणानि भवन्ति । अनेन मूल्याकलनेन निम्नाङ्कितानि प्रयोजनानि भवन्ति ।

1. बोधनसाफल्यासाफल्यज्ञानं भवति ।
2. छात्रकौशलानाम् आकलनं भवति ।
3. पाठशालाप्रगतेः ज्ञानं भवति ।
4. छात्राणां विकासं ज्ञातुं शक्यते ।
5. छात्राणां स्तरस्य श्रेणिकरणस्य च निर्णयः भवति ।

**अधिगमाय मूल्याकलनम्।**

इदं मूल्याकलनं बोधनात् प्रागपि भवितुम् अर्हति । बोधनसमये अपि एतन्मूल्याकलनं भवति । अनेन छात्राणां सामर्थ्यानां न्यूनतानां च मूल्याकलनं भवति । छात्राणां कृते किं बोधनीयम् ? बोदनरीतिः का भवितव्या ? इत्यादीनां निर्णयः भवति । अत एव अस्य लोपनिर्धारकमूल्याकालनम्, निर्माणात्मकमूल्याकलनम् इत्यपि वदन्ति । छात्राणां ज्ञानात्मक-भावात्मक-मानसिकचेष्ठात्मकक्षेत्रेषु मूल्याकलनमत्र भवति । सन्दर्भानुसारं पद्धतीनां व्यूहानाम् उपकरणानां च परिवर्तनाय इदमेकं साधनं भवति । छात्रवैयक्तिकभेदानुगुणं पाठ्यांशस्य निर्माणाय इदमुपयुक्तं भवति ।

**अधिगम एव मूल्याकलनम्**

अत्र अधिगम एव मूल्याकलनं भवति । विद्यालये परिकल्प्यमानबोधनाधिगमप्रक्रिया छात्राणां सर्वतोमुखविकासाय साहाय्यकरूपेण भवति । कक्ष्यायां, विविधपरिस्थितिषु च छात्रभागग्रहणवेलायां क्रियमाणं मूल्याकलनम् एव अधिगमरूपमूल्याकलनं भवति । उदाहरणार्थं छात्रैः चर्चासु भागग्रहणवेलायां छात्राः कथं व्यवहरन्ति ? कथं तेषम् अभिप्रायं प्रकटयन्ति ? कथं भागग्रहणं स्वीकुर्वन्ति ? इत्यादिविषयेषु अध्यापकस्य निरीक्षणद्वारा मूल्याकलनम् अत्र भवति । अत्र मूल्याकलनं अधिगमात् भिन्नं नैव भवति, अधिगम एव मूल्याकलनं भवति । एवम् अत्र मूल्याकलनम् अधिगमप्रक्रिया च युगपदेव भवतीति अत्र कश्चन विशेषः । अस्मिन् मूल्याकलने छात्राः आत्मनः सहभागिनां च सामर्थ्यासामर्थ्यविषयं स्वयमेव ज्ञातुं प्रभवति । अत्र छात्रः स्वयमेव स्वकीयकर्मणः विश्लेषणं कर्तुं प्रभवति । एतदृशमूल्याकलनं अधिगमस्य अविभज्यमानभागरूपेण भवति । इयम् एका संरचनात्मकप्रक्रिया भवति । छात्राणां नूतनाभिप्रायैः साकं स्वकीयाभिप्रायाणां योजनेन परस्परान्तरिकचर्चारूपेण अधिगमः भवति । अनेन छात्रैः किं ज्ञातम्? कथं ज्ञातम्? अधिगमे कारकाः के भवन्ति ? वैयक्तिकरूपेण उत समूहेन वा ? कथं वा अधिगन्तव्यम् ? अधिगमे जायमानानां समस्यानां परिहारः कथं भवितुमर्हति ? इत्यादीनाम् अंशानां ज्ञानं प्राप्यते ।

****

1. Assessment for Learning -Edited by Prof. G. Vishwanathappa, Neelkamal,New Delhi

2. Assessment for Learning – Dr.D.BAlaramulu and K Vithal, Jayaram Series, Hydrabad

3. Assessment for Learning – Prof.Ramakrishna & others, Neelkamal, New Delhi

4. शैक्षिक मापन एवं मूल्याङ्कन – गुप्त एस.पि एवं गुप्त अलका, शारदा पुस्तक भवन, इलाहाबाद

5. शैक्षिकमूल्याङ्कन – अस्थाना बिपिन अस्थाना निधि, अग्रवाल पब्लिकेशन्स, आगरा - 2

****

# अधिगमस्य आयामाः स्तराश्च

(Dimensions and Levels of Learning.)

**डा. हरिप्रसादः के.**

आचार्यः, शिक्षाविभागः

शिक्षा मानवं परिष्करोति, संस्करोति च । लक्ष्यप्राप्तये मानवम् उपकरोति । मानवे मानवत्वम् आनेतुं शिक्षा आवश्यकी । शिक्षायाः अभावे मानवः पशुरेव, "**विद्याविहीनः पशुभिः समानः**" । इयं शिक्षा अधिगमेन आसादनीया । कथमासादनीया इति चेत् उच्यते "**गुरुसुश्रूषया विद्या पुष्कलेन धनेन वा । अथवा विद्याया विद्या ....**" इति । अनया विद्यया/शिक्षया "**स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव । पुनर्ददता घ्नता जानता सङ्गमेमहि**"(ऋक्. ५/५१/१५) इति आर्षं लक्ष्यम् साधयेम । एनां शिक्षां किमर्थम् आसादयेम इत्युक्ते अन्यत्र ऋगियम् ब्रवीति - "**प्रति पन्थामपद्महि स्वस्ति गामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥**" इति । इत्युक्ते येन मार्गेण गच्छन् मनुष्यः सर्वाणि द्वेषपूर्णानि कार्याणि, दुष्टाः भावनाः च त्यजन्, समग्रम् ऐश्वर्यं प्राप्नोति, तं कल्याणकारिणं मार्गं वयं प्राप्नुयाम इति । अतः अधिगमेन आसादयितुं योग्या शिक्षा इत्यतः अधिगमस्य आयामान् स्तरांश्च लेखेऽस्मिन् विचारयाम ।

अधिगमस्य आयामाः इदमित्थमितिवत् निर्दिष्टाः कुत्रापि न प्रत्यपादिषत । एकैकोऽपि लेखकः एकैकरीर्या विषयेऽस्मिन् व्यलेखीत् । अनया दृष्ट्या अधोदत्ताः केचन आयामाः सुविचिन्तनीयाः ।

एकमेव वस्तु एकस्यां दिशि अवलोक्यमाने यथा दृश्यते तथा अपरस्यां दिशि न दृश्यते । तदेव वस्तु दूरे यथा दृश्यते तथैव समीपे न दृश्यते । वस्तु एकमेव अस्ति । किन्तु तस्य स्वरूपं दिक्-इत्यादिभेदेन भिन्नभिन्नरूपेण दृश्यते । इत्थम् एकस्य एव वस्तुनः द्रष्टृदिगादिभेन भिन्नभिन्नरूपेण अवस्थितिः एव तस्य वस्तुनः आयामः इति उच्यते । एवं मूर्तानां वस्तूनां विषये यथा विभिन्नाः आयामाः भवन्ति तथैव अमूर्तानाम् अपि वस्तूनां विभिन्नाः आयामाः भवन्ति । यथा सौन्दर्यम् इत्येषः एकः अमूर्तः पदार्थः । वृद्धायाः सौन्दर्यं वृद्धेन एकया रीत्या गृह्यते, यूना अन्यरीत्या, बालेन तद्भिन्नरीत्या इति वयं जानीमः ।

अधिगमः इत्येषः पदार्थः अमूर्तः अस्ति एतस्य अपि एवमेव विभिन्नाः आयामाः सन्ति । एते आयामाः अगणिताः भवन्ति । एतेषु कांश्चन आयामान् साम्प्रतं चिन्तयाम -

**अधिगमस्य आयामाः**

१. अधिगमविषये धनात्मक-अभिवृत्तेः विकासः(Developing positive attitudes about learning)

अधिगमः इत्युक्ते अध्ययनम् इत्यर्थः । अध्ययनेन विद्या प्राप्यते । विद्याविहीनः पशुभिः समानः । अतः पशुत्वं अपहाय मानवत्वमवाप्तुं विद्या समुपार्जनीया । अध्ययनं कर्तव्यम् । एतदध्ययनम् अस्माकं सर्वाङ्गिकविकासाय भवति इति वयं सर्वे जानीमः । यावज्जीवमधीते विप्रः इति उक्त्या इदं ज्ञायते यत् अध्ययनम् आजीवनं प्रचलति इति । अध्ययनं कञ्चन स्तरं यावदेव भवति इति न मन्तव्यम् । अतः अधिगमः आत्मनः विकासाय जायमाना निरन्तरप्रक्रिया इति विचारः छात्रस्य मनसि भवेत् । इयमेव अधिगमविषयिणी धनात्मकाभिवृत्तिः इत्युच्यते । अधिगमविषयिणी ऋणात्मकाभिवृत्तिः अपि ज्ञातव्या, यया धनात्माकाभिवृत्तिविषयकः सम्प्रत्ययः सुदृढः भवति । ऋणात्मकाभिवृत्तिः इत्थं भवति –

"नाध्येतव्यम्" "अध्ययनेन को लाभः ?"

"इतोऽपि अधीत्य किं वा कर्तव्यम् अस्ति ?"

"अधिकमधीयते चेत् उन्मत्तता आयाति"

"एतावद् अध्ययनं पर्याप्तम्" "बह्वेव साम्प्रतम् अधीतम्"

"आजीविकाप्राप्तये अध्ययनमेव वस्तुतः अध्ययनम् भवति"

"धनिकाः एव केवलम् अध्येतुं प्रभवन्ति"

"मम अध्ययनाय को वा साहाय्यम् आचरेत् ?"

"मम अध्ययनस्य वयः सम्प्रति अतिक्रान्तमस्ति"

"मम अध्ययनं समाप्तम्"

"इतोऽपि अध्ययनं न समाप्तं वा इति सर्वे पृच्छन्ति"

"सौविध्याभावात् अध्ययनं स्थगितवान्"

"पुस्तकानि अन्नं न प्रयच्छन्ति" इत्येवमादिरूपेण । अतः ईदृशीं ऋणात्मकाभिवृत्तिं दूरीकृत्य धनात्मकाभिवृत्तिः आसादनीया । विद्यमानसौविध्यानुगुणं यावदध्येतुं शक्यते

तावत् अवश्यम् अधीयीय इति भावना स्यात् । शैक्षिकम् ऋणं वा छात्रवृत्तिं वा स्वीकृत्य अधिकाधिकं अधीयीय इति भावनायाः विकासः भवेत् । कुत्रचित् उद्योगं कुर्वन्नेव पत्राचारादिमाध्यमेन वा अधीये इति अभिवृत्तिः स्वस्मिन् उत्पादनीया । प्रमाणपत्रमेव निमित्तीकृत्य विद्यायायाः अर्जनं भवति चेत् प्रमाणपत्रमात्रं प्राप्येत । प्रमाणपत्राभावेऽपि अध्येतुम् शक्याः बहवो हि विषयाः भवन्ति येषामध्ययनाय कोऽपि प्रवर्तितुम् अर्हति ।

अधिगमस्य विषये आदौ धनात्मक-अभिवृत्तिः भवति चेदेव तत्सम्पादयितुं जायमाना प्रवृत्तिः सफला भवति । अधिगमस्य विषये धनात्मक-अभिवृत्तिः भवति चेदेव ऋणात्मकचिन्तनात् दूरे स्थित्वा अधिगमाय मनोबलं साकल्येन विनियोक्तुं कश्चन शक्नोति ।

२. **ज्ञानस्य सम्पादनम् एकीकरणञ्च** (Acquiring and integrating knowledge) -

ज्ञानस्य सम्पादनं पूर्वज्ञानसम्बद्धतया भवति । इत्युक्ते नवीनं ज्ञानं, सर्वात्मना केनापि विषयेण असम्बद्धं न प्राप्यते । प्राप्यमाणमपि ज्ञानम् बहूनां नूतनज्ञानानां सम्बन्धं प्रापयितुं योग्यं भवति । इत्थं वर्तमानं ज्ञानं पूर्वज्ञानेन यथा सम्बद्धम् अस्ति तथैव नूतनज्ञानानां प्राप्त्यर्थं विद्यमानः मार्गसमुच्चयः(avenues) अस्ति । एवं पूर्वज्ञानस्य भाविज्ञानस्य च सङ्घटनाय वर्तमानज्ञानं सम्पादनीयं भवति । अतः छात्रस्य वर्तमानज्ञानसम्पादनाय पूर्वज्ञानस्य सम्बन्धाः आविष्कर्तव्याः । एवमेव भाविज्ञानानां सङ्केताः प्रदर्शनीयाः । अनेन सुदृढं वर्तमानज्ञानं सञ्चितं भवति ।

३. **ज्ञानस्य विकासः विभावनञ्च/विद्योतनम्** (Extending and refining knowledge)[१] -

प्राप्तस्य ज्ञानस्य विकासः कथं भवति ? यदा तस्य वास्तविकप्रपञ्चे उपयोगः क्रियते तदा विकासः भवति । भाषाशिक्षणसन्दर्भे, ज्ञातानां भाषानियमानाम् आधारेण कक्ष्यायां प्रयोगाभ्यासः, वास्तविकप्रपञ्चे उपयोगः च क्रियते चेत् भाषाविकासः भवति । एवमेव

[१] For learning to be effective and meaningful, students should be provided with opportunities to use **knowledge** in practical situations.
Processing **knowledge** for greater understanding can be done through activities designed to help them apply that **knowledge.**

अन्येषां विषयाणाम् अपि विकासः चिन्तनीयः । वास्तविकप्रपञ्चे उपयोगः न क्रियते चेत् पर्युषितफलमिव ज्ञानमपि निष्प्रयोजकं भवति । उच्चाधिगमाय प्राप्तस्य ज्ञानस्य यदा मन्थनं क्रियते तदा अपि विकासः भवति । अतः श्रुतयः श्रवणात्परं मननं विदधति । अत्र श्रवणम् इत्युक्ते विषयस्य अध्ययनम् इति मन्तव्यम् । पुरा वेदाध्ययनं श्रवणमाध्यमेन एव भवति स्म इत्यतः श्रवणमेव अध्ययनं/अधिगमः आसीत् । साम्प्रतं अध्ययनं केवलेन श्रवणेन न सम्भवति । पठनलेखनभाषणैः अपि अधिगमः भवति । पठनेन अधिगमः भवति इति तु सत्यम् । लेखनेन कथम् ? भाषणेन च कथम् ? एतत् कौशलद्वयमपि ग्रहणकौशलं नास्ति । लेखनकौशलं भाषणकौशलं च अभिव्यक्तिकौशलं इत्युच्येते । अभिव्यक्तिकौशलेन अधिगतस्य विषयस्य अभिव्यञ्जनमात्रं क्रियते किल ? इति चेन्न । अभिव्यक्तिकौशलेन अपि अधिगमः जायते एव । सुष्ठु कथम् अभिव्यञ्जनीयम् ? अभिव्यञ्जनवेलायां वैकल्यं कुत्र जायते ? वैकल्यनिवारणं कथं कर्तव्यम् ? इत्याद्यधिगमः भाषणेन लेखनेन च जायते एव । श्रवणात् परं मननम् तत्र विहितम् । तथैव अत्रापि अध्ययनात्परं ज्ञानस्य विकासाय मननं कर्तव्यम् । मननं मानसिकव्यापारः भवति । एषः मानसिकव्यापारः एव चिन्तनं वर्तते । अतः ज्ञानस्य विकासाय प्राधान्येन छात्राः प्राप्तं ज्ञानम् उपयोक्तुं प्रवर्तेरन् । तस्य ज्ञानस्य मन्थनं कर्तुं च प्रवर्तेरन् ।

### ४. सार्थकरूपेण ज्ञानस्य उपयोगः(Using Knowledge meaningfully)[१]

प्रमुखलक्ष्यत्वेन छात्राणां पुरतः साधयितुं ज्ञानम् एव आवश्यकं इति यदा अनुभूयते तदा छात्राः सम्यक् अध्येतुं प्रवर्तन्ते । सिसाधयिषितेषु विषयेषु ज्ञानस्य उपयोगः नास्तीति मन्यते चेत् अध्येतुं न प्रवर्तते । उदाहरणार्थम् उच्यते - यदा स्नातकस्तरः सम्पद्यते तदा बहवो हि छात्राः अध्ययनं परित्यजन्ति । अग्रे अध्येतुम् अवसरः अस्ति चेदपि केचन अध्ययनं न अनुवर्तयन्ति । तेषां लक्ष्यं(उद्योगः, विवाहः, स्नातकप्रमाणपत्रम् ...) तावता

[१] Students learn best when they need knowledge to accomplish a goal they consider important. Six kinds of thinking processes can be used to encourage students to use knowledge meaningfully: 1. Decision-making 2. Problem-solving 3. Invention 4. Experimental inquiry 5. Investigation 6. Systems analysis

साधितं भवति इति तत्र कारणं भवति । प्राप्तस्य ज्ञानस्य सार्थकरूपेण उपयोगः कर्तव्यः । अस्माकं लक्ष्यं साधितं चेत् पश्चात् नाध्येतव्यम् इति न स्यात् । अधोलिखिताः षट्-प्रकारिकाः चिन्तनप्रक्रियाः छात्रज्ञानस्य सार्थकोपयोगाय उपयोक्तुं शक्यन्ते -

**निर्णायस्वीकरणम्** Decision-making

निर्णयस्वीकरणं इत्येत् उन्नतं बौद्धिकं विवेकपूर्णं कार्यम् अस्ति । सन्दिग्धपरिस्थितिषु समुचितनिर्णयस्वीकरणं सामान्येन कर्तुं न शक्यते । यः तादृशसामर्थ्यवान् भवति स एव श्रेष्ठत्वं भजते । कस्मिन् अपि क्षेत्रे विपदि वा भवतु, विकल्पेषु वा भवतु, उत्कर्षाय वा भवतु, आत्मरक्षायै वा भवतु, पराक्रमणाय वा भवतु, साफल्यं तु उचितेन निर्णयेन एव भवति । यथा – स्वर्णमन्दिरे आतङ्कवादिनः सन्ति इत्यतः सैन्यमुपयुज्य तदुपरि आक्रमणम् यद्विहितं तत् इन्दिरागान्धीवर्यायाः उचितः निर्णयः आसीत्, तथैव सिखमतावलम्बिनां श्रद्धकेन्द्रस्य उपरि विहितस्य अस्य आक्रमणस्य परिणामतः सर्वे सिखजनाः रुष्टाः सन्तीति ज्ञात्वापि सिख-अङ्गरक्षकाणाम् अपरित्यागः अनुचितः निर्णयः आसीत् यस्य च परिणामः दुस्सहः अवर्तत ।

**समस्यासमाधानम्** Problem-solving

समस्याः अस्माकं जीवने कार्यक्षेत्रे वा सर्वदा भवन्त्येव । तासां निवारणाय उत्तमा बुद्धिशक्तिः आवश्यकी । इयं बुद्धिशक्तिरेव ज्ञानं इति व्यवह्रियते । समस्यासमाधानाख्यं ज्ञानं अस्माभिः सम्पादनीयम् । तत्तु अधिगमेन एव भवति ।

**आविष्करणम्** Invention

ज्ञानस्य सार्थकोपयोगाय आविष्कारकबुद्धिरपेक्ष्यते । अभावे सति आविष्कारकबुद्धिः जागरिता भवति । आविष्कारकबुद्धिर्भवति चेत् ज्ञानस्य सार्थकोपयोगः भवति । यथा - स्थातुम् एकं पृतिव्यतिरिक्तं स्थानं दत्वा तदुचिते दण्डचक्रे दीयेते चेत् दण्डचक्राभ्यां अहं भूमिमेव कम्पयितुम्/उन्नेतुं प्रभवामि इति न्यूटन् उक्तवान् आसीत् । न्यूटन् इत्यस्य आविष्कारकबुद्धिः आसीत् इत्यतः गुरुत्वयुक्तस्य अपि वस्तुनः उन्नयनं कथं कर्तुं शक्यते इत्यत्र सः तस्य ज्ञानं सार्थकरूपेण उपयोक्तुं शक्नोति स्म ।

**प्रायोगिकं विचारणम्** Experimental inquiry

सामान्यं विचारणं तु कौतुकशमनाय केवलं भवति । प्रायोगिकं विचारणं कार्यकारणसम्बन्धविश्लेषणपुरस्सरं वैधता, विश्वसनीयता, पुनःपरीक्षणयोग्यता इत्यादिगुणैः युक्तं वैज्ञानिकगुणोपेतं विचारणं भवति । एतादृशविचारणाय छात्रज्ञानस्य सार्थकोपयोगः भवति ।

**अन्वेषणम्/आन्वीक्षणम्** Investigation

इयं तथ्यानां काचित् सुबद्धा अन्वेषणप्रक्रिया, कस्याः अपि घटनायाः कस्यापि प्रकरणस्य वा कार्यकारणसम्बन्धम् आविष्कृत्य प्रदर्शयति । एषा अन्वेषणाख्या चिन्तनप्रक्रिया छात्रज्ञानस्य सार्थकोपयोगाय भवति ।

**प्रणालीविश्लेषणम्** Systems analysis

पारस्परिकसम्बन्धयुक्तानां अवयवानां समूहः प्रणाली इत्युच्यते । तत्र प्रणाल्यां पारस्परिकान्तःक्रियायाः कश्चन निश्चितः क्रमः आश्रितो भवति । इत्युक्ते प्रत्येकमपि अवयवः अवयवान्तरेण सह आदृतप्रणाल्या एव व्यवहरति । स्वयं च प्रत्येकमप्यवयवः स्वोद्दिष्टं कर्म कुर्वन्नेव सम्पूर्णप्रणाल्याः लक्ष्यसिद्ध्यर्थं निश्चितक्रमेण प्रवर्तते । अत्र प्रणाल्यां विद्यमानानां अवयवानां मध्ये सम्बन्धः विच्छिद्यते चेत् , पारस्परिकान्तःक्रियायाः क्रमः परिवर्तते चेत् , कोऽप्यवयवः निष्क्रियो वा भवति चेत् प्रणाल्याः परिणामः विपरीतो भवितुमर्हति, दूषितो भवितुम् अर्हति, शून्यपरिणामो वा भवितुमर्हति । अतः प्रणाल्याः सफलतायै तद्गतानां अवयवानां मध्ये क्रमबद्धा पारस्परिकान्तःक्रिया भवेत् । सर्वोऽप्यवयवः निश्चितक्रमे अवयवान्तरेण सह सम्बन्धं स्थापयेत् । कोऽप्यवयवः निष्क्रियो न भवेत् ।

**प्रणालीविश्लेषणम्** इत्युक्ते प्रणाल्याः अवयवानां, अवयवसङ्घटनानां, अवयवानां कार्यप्रवृत्तेश्च पार्थक्येन वा साकल्येन वा विश्लेषणम् इत्यर्थः । Identification of elements, their organization and their functioning or performance individually or as a whole and constraints.

**मनसि निष्पादकप्रवृत्तेः विकासः** (Developing productive habits of mind.)[१]

---

[१] Teachers can help students develop the mental habits that will enable them to learn on their own. Instruction to foster habits of mind includes both short-term and long-term practices. Here are some suggested classroom behaviours

**सार्थकरूपेण ज्ञानस्य उपयोगाय मनसि निष्पादकप्रवृत्तिः भवेत् । निष्पादकप्रवृत्तेः विकासाय कक्ष्यागतव्यवहाराः कीदृशाः भवेयुः ? अधोलिखितरूपेण एते कक्ष्यागतव्यवहाराः भवेयुः ।**

१. **तार्किकचिन्तनम्** (Think critically) – **कर्तुं** छात्राः **प्रवर्तनीयाः**

२. **स्पष्टसमग्रावलोकनम्**( Be and see accurately. Be open-minded) कर्तव्यम्, उन्मुक्तमानसिकता च स्यात् ।

३. **सर्जनात्मकचिन्तनम्** (Think creatively) भवेत् ।. **परिस्थितेः अवलोकनाय नवीनरीतयः अन्वेषणीयाः** (Find new ways of looking at a situation)

४. **स्वस्य चिन्तनप्रक्रियायाः स्वेनैव नियन्त्रणम्/चालनम्**(regulate) **कर्तव्यम्** ।

**अधिगमस्य स्तराः**

**अधिगमस्य पञ्च स्तराः प्रसिद्धाः ।**

१. **स्मृतिस्तरः**

**अस्मिन् स्तरे अध्येता अध्ययनेन केवलं अध्येयविषयान् स्मरति । इत्युक्ते अध्येयविषयस्य अर्थम् अवगच्छति इति नास्ति । अध्येयविषये चिन्तनं मननं वा कर्तुमर्हति इति नास्ति । तद्बलेन अध्येयविषयं व्याख्याति इत्यपि नास्ति । इत्युक्ते अत्र छात्रः विषयं अर्थज्ञानेन विनैव मस्तिष्के आरोपयति । अधिगमस्य अयं प्राथमिकस्तरः भवति । शिशुः प्रथमक्षणे श्रुतस्य पदस्य अर्थं न अवगच्छति । किन्तु सः पदं जानाति । इत्युक्ते पदं स्मर्तुम् अर्हति । पदार्थं तु "शक्तिग्रहं व्याकरणोपमान...." इत्याद्यनुगुणं निमित्तान्तरेण एव अवगच्छति न तु केवलं शब्दश्रवणेन । अतः अस्य स्तरस्य अधिगमस्य लक्ष्यमपि विषयस्य स्मरणमात्रमेव भवति ।**

**छात्राः अस्मिन् स्तरे पदानां, वाक्यानां, सूत्राणां, संख्यानां, कारिकाणां, पद्यानां, मन्त्राणां वा अधिगमेन तत्तद्विषयस्य स्मृतिमात्रं प्रयोजनं लभन्ते । अत्र विषयस्मरणार्थं बुद्धिः**

and practices: 1. Think critically. Be and see accurately. Be open-minded. 2. Think creatively. Push the limits of one's knowledge. Find new ways of looking at a situation. 3. Self-regulate. Be aware of one's own thinking. Evaluate the effectiveness of one's own actions

विकसिता भवेदिति नास्ति । चिन्तनादिशिक्तिः विकसिता भवेदिति नास्ति । अतः पदादीनां तात्पर्यार्थादिकं जानीयुरित्यपि नास्ति । प्राथमिकस्तरे एवमेव शिक्षा प्रवर्तते । एतस्य अयं अभिप्रायः नास्ति यत् लघुबालानां स्तरः स्मृतिस्तरः इति वा निम्नवयोवतां स्मृतिस्तरः इति वा भवति इति । अयं स्मृतिस्तरः स्नातकोत्तरच्छात्राणाम् न भवति इत्यपि न मन्तव्यम् । स्नातकोत्तरस्तते विद्यमानाः अपि छात्राः बहून् विषयान् स्मृतिस्तरस्य अधिगमेन अधीयते । अतिलघुबालाः अपि चिन्तनस्तरस्य अधिगमं प्राप्नुवन्ति । समस्यासमाधानं इति उन्नतस्तरस्य अधिगमः भवति चेदपि कोह्लरस्य सुल्तानाख्यः वानरः एतत् साधितवान् । बालाः अपि कदाचित् अत्यन्तं बुद्धिशक्तियुक्तं कार्यं साधयन्ति ।

२. **अवबोधस्तरः**

एषः उत्तरवर्तिस्तरः अस्ति । स्मृतिस्तरे गृहीतस्य शब्दस्य वाक्यस्य वा अर्थः ज्ञातः भवति इति निश्चयः नास्ति । तस्य स्तरस्य उद्देश्यमपि अर्थज्ञानं नास्ति । विषयस्य ग्रहणमात्रं भवति । किन्तु अवबोधस्तरे शब्दस्य वाक्यस्य वा अर्थज्ञानपुरस्सरमेव छात्रः अधीते । इत्युक्ते स्मृतिस्तरे शब्दज्ञानं प्राप्यते । अवबोधस्तरे शब्दस्य अर्थस्य च ज्ञानं प्राप्यते । अवबोधः इत्युक्ते अर्थज्ञानम् इत्यर्थः । एषः अववबोधस्तरः सामान्यतः प्राथमिकस्तरात् उपरितनः भवति । एषः स्तरभेदः अधिगमदृष्ट्या एव अस्ति, न तु वयसः दृष्ट्या, न वा विषयदृष्ट्या । इत्युक्ते अत्यन्तं लघुः शिशुः अपि बहूनां शब्दानां श्रवणेन अर्थं अवगच्छति एव । किन्तु शब्दैः प्रतिक्रियां दातुं न शक्नोति । तावता सः श्रुतानां शब्दानां अर्थं न ज्ञातवान् इति नार्थः । एवमेव विद्यावारिधिरिति उपाधिं प्राप्यापि वयमेव बहूनां अश्रुतपूर्वाणां शब्दानां श्रवणेन अर्थम् अवगच्छामः इति नास्त्येव ।

शिक्षाव्यवस्थायां तावत् आदौ शब्दज्ञानाय विषयाणां प्रस्तुतिः भवति, पश्चात् अर्थज्ञानाय, पश्चात् अनुप्रयोगात्मके स्तरे अधीतस्य विषयस्य प्रयोगाय, तदनन्तरं चिन्तनविकासाय, पश्चात् प्रतिफलनस्तरे नूतनविषयादिसर्जनाय इति मन्तव्यम् ।

३. **अनुप्रयोगात्मकस्तरः**

अस्मिन् स्तरे छात्रः विषयं अवगत्य प्रयोक्तुं आरभते । स्मृतिस्तरे छात्रः शब्दस्य अनुकरणं करोति । अत्र अर्थस्य प्रयोगदृष्ट्या अनुकरणम् करोति । इत्युक्ते ज्ञातानां शब्दानां वाक्यानां विषयाणां वा स्वीयेषु व्यवहारेषु उपयोगं कर्तुं छात्रः शक्नोति ।

### ४. चिन्तनस्तरः

अस्मिन् स्तरे छात्रः अधीतस्य विषयस्य युक्तायुक्ततां, उचितानुचितततां, उपयोगितां, महत्वं, अर्थव्याप्तिं, विमर्ष्टुं सामर्थ्यं अवाप्नोति । अधीयमानस्य विषये चिन्तनं यदा करोति तदा पूर्वोक्तानि युक्तायुक्तचिन्तनादिकार्याणि सिध्यन्ति । एषः स्तरः सामान्यतः माध्यमिकस्तरात् ऊर्ध्ववर्ती भवति ।

### ५. प्रतिफलनस्तरः

एषः अधिगमस्य अत्युन्नतः स्तरः भवति । अस्मिन् स्तरे छात्रः नूतनं किञ्चित् सृजति, आविष्करोति, रचयति, निर्माति, प्रदर्शयति, प्रस्तुतीकरोति.... । स्तरेऽस्मिन् सम्पादितस्य सामर्थ्यस्य निकषोफलं लक्ष्यते । प्रायः एषः स्तरः स्नातकस्तरात्परं, क्वचित् च उच्चमाध्यमिकस्तरे एव दृष्टिपथमायाति । क्वचित् कालान्तरे ।

### सन्दर्भाः


1. Assessent of Learning, S.K.Mangal, Shubhra Mangal, PHI Learning Pvt. Ltd
2. Bloom's Taxonomy Levels of Learning: The Complete Post (kodosurvey.com)
3. Dimensions Of Deep Learning: Levels Of Engagement And Learning - ASCD
4. (PDF) Dimensions of Learning | raing use - Academia.edu
5. Dimensions Of Learning (slideshare.net)

# मूल्यशिक्षायाः सम्प्रत्ययः

**डा.वेङ्कटरमण एस्. भट्टः**

सहाचार्यः, शिक्षाशास्त्रविभागः

मानवव्यवहाराणां निर्धारकतत्त्वानि सन्ति मूल्यानि । मानवैः कथं जीवनं यापनीयमिति मूल्यानामस्तित्वैः ज्ञायते । मानवैः कथं प्रवर्तितव्यमिति मूल्यानि एव प्रमाणयन्ति । 'रामादिवत् वर्तितव्यं न रावणादिवत्'[1] इति तु उपदिशन्ति काव्यानि । एवमुक्तौ जीवनस्य निर्वहणे आदर्शानां च अनुपालने मूल्यानि एव कारणानि भवन्ति । भगवति श्रीरामे यानि मूल्यानि विलसन्ति तादृशैः मूल्यैरेव अस्मादृशानां जीवनं स्वर्णमयं भवति । रावणे विद्यमानैः मूल्यैः स्वकीयजीवनस्यैव नाशः सञ्जात इति सर्वेऽपि लोकाः संविद्रते । आङ्ग्लभाषायां मूल्यमिति पदस्य Value इति कथ्यते । आङ्ग्लभाषायाः Value इति पदं ल्याटिन् भाषायाः Velera इति धातोः निष्पन्नम् । अस्यार्थः बलवत्त्वं शक्तिमत्त्वं वा ।

तस्यायमाशयोऽस्ति यत् कस्यापि वस्तुनः क्रयः इति कथ्यते, स च क्रयः तन्मूल्यं वा वस्तुनः गुणावगुणत्वेन निर्णीयते । यः वस्तुविशेषः अधिकगुणवान् अस्ति सः अधिकमूल्यवान् भवति । इत्थमेव मानवजीवनस्यापि तद्गतगुणवत्तया मूल्यत्वमङ्गीक्रियते । मूल्यम् अपेक्ष्याणां सम्प्रत्ययः न तु केवलापेक्षेति – क्लुकहान् -A Value is a conception of the desirable and not something that's merely desire (Kluckhon, 1951). मूल्यं नाम कस्यापि गुणवत्त्वैव, या च तदीयप्रशंसात्वम् आदरणीयताञ्च द्योतयति ।प्रधानमूल्यानि व्यक्तेः व्यवहारं प्रभावयन्ति तज्जीवनञ्च निर्दिशन्ति।

मूल्यानि तत्प्रारम्भस्तरे वैशिष्ट्यवैविध्येन आवश्यकतासंवेगाभिरुचीनां रूपे दृश्यन्ते । यदीमानि व्यक्तिजीवने निश्चितानि भूत्वा परिनिष्ठितानि भवन्ति तथा सामाजिकानुमोदनं प्रामाणिकताञ्च अवाप्य मूल्यत्वेन परिगण्यन्ते । अभिरुचयः, आनन्दाः, अपेक्ष्याः, प्राथम्यानि, कर्तव्यानि, नैतिककर्तव्यानि, कामनाः, आकाङ्क्षाः, आवश्यकताः इतरे

[1] विश्व.साहित्य. पृ.सं. ४

**च सामाजिकाभिविन्यासस्य नैतिकता एव मूल्यानि** । Interests, Pleasures, likes, Preferences, duties, moral obligations, desires, wants, needs and many other moralities of Social orientation. – Robin M. Willioms, 1968

कवयोऽपि निर्दिशन्ति यत् जन्मना कर्मणा वयसा वा गौरवं नास्ति चेत् तन्मनुष्यनिष्ठगुणैः तस्य मूल्यं वर्धते । तथाहि –

**न हि जन्मनि ज्येष्ठत्वं ज्येष्ठत्वं गुण उच्यते ॥**

**गुणाद् गुरुत्वमायाति दुग्धं दधि घृतं यथा ॥**[1]

श्लोकस्यास्य तात्पर्यमिदमस्ति यत् जन्मना न कोऽपि ज्येष्ठः भवति । 'जन्मना जायते जन्तुः संस्कारात् द्विज उच्यते' इति न्यायेन संस्कारवशात् सर्वेऽपि ज्येष्ठः उत्कृष्टो वा भवति । तर्हि ज्येष्ठत्वं नाम किम्? गुणात् ज्येष्ठत्वमिति व्यपदिश्यते । 'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः' इत्युक्तदिशा सर्वेषु अपि गुणाः पूज्याः भवन्ति । गुणविशिष्टाः व्यक्तिविशेषाः समाजे सर्वत्र गौरभाजः भवन्ति इत्युक्ते नातिशयोक्तिः स्यात् । गुणादेव स्थानं गौरवं मर्यादाञ्चावाप्नोति मनुष्यः । यतोहि दुग्धं प्रथमं रूपम् । तस्य संस्कारकरणेन दधि समुपजायते । पुनः दध्नः संस्कारकरणेन घृतमुत्पद्यते । एतेषु त्रिषु पदार्थेषु घृतमेव परमोत्कृष्टमस्ति । समाजे घृतस्यैव अधिकं मूल्यमस्ति । अतः अस्मत्पूर्वजैरपि जीवनस्य यापनं कृत्वा गहनञ्चाध्ययनं विधाय अत्युत्कृष्टः अनुभवः आसादितः वर्तते । यत् शाश्वतं तदेव हितमिति अनुभवसिद्धं तेषाम् । अन्ते जीवनस्य परमं मूल्यन्तु आत्मावलोकनमिति तैः अभिज्ञातम् । आपस्तम्बमहर्षिभिः भणितमस्ति यत् 'आत्मलाभान्नपरं विद्यते' इति । तदेव बृहदारण्यके आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः'[2] इति निगदितम् ।

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ॥**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥**[3]

---

[1] शि.सामा.आ. ए.पि.सच्चिदानन्दः, पृ.सं. ५०

[2] बृह.उप – २.४.५.

[3] मनुस्मृतिः – २.२२.

प्राचीनकाले भारतीयशिक्षकाः स्वीयविवेकेन पाण्डित्येन वैचक्षण्येन च लोकानां कृते आदर्शमार्गदर्शकास्समभूवन् इत्यत्र उपर्युक्तं मनुवचः एव परमम्प्रमाणम् । पृथिव्यामस्यां प्रादुर्भूताः सर्वेऽपि मानवाः श्रेष्ठजन्मनां सकाशात् चारित्र्यशिक्षणम् अधिगच्छेयुः । श्रेष्ठाः जनाः, दार्शनिकाः, चिन्तकाः, ऋषयः, महापुरुषाः तत्त्वज्ञानिनश्च यथा स्वजीवनं यापयामासुः तादृशं जीवनम् अस्माभिरपि यापनीयमित्याशयः ।

गीतायामप्युक्तं यथा –

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥**[१]

श्रेष्ठाः पुरुषाः यथा आचरन्ति तथैव अन्येऽपि आचरन्ति । यद्यत् प्रमाणमिति कृत्वा दर्शयन्ति श्रेष्ठाः तद्वत् समस्तलोकसमुदायः अनुतिष्ठति । 'आचारहीनं न पुनन्ति वेदाः' इति आर्षवचनमपि अस्य उपोद्बलकत्वेन तिष्ठति । If character is lost everything is lost इति आङ्ग्लभाषायाः वचनमपि इदमेव सूचयति । तत् सच्चारित्र्यं किञ्चन विशिष्टं मूल्यमिति मन्यामहे ।

आसुरीं सम्पदं परित्यज्य दैवीसम्पदां सम्प्राप्तिः मानवीयमूल्यमिति प्राचीनभारतीयानां शिक्षाविदामाशयः । ईश्वरीयगुण एव दैवी सम्पदिति व्यपदिश्यते । मानवेषु ईश्वरीयगुणानामवाप्तिरेव स्यात् । मानवेषु दैवत्वसम्पादनमेव उपनिषच्छिक्ष्यायाः परमम् उद्देश्यं वर्तते । दैवीसम्पदामवाप्तिरेव जीवनमूल्यमिति शक्यं गदितुम् । तेषां गुणानाम् उपदेशः भगवद्गीतायां समुपलभ्यते –

**अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः ।**
**दानं दमश्च यज्ञश्च स्वाध्यायास्तप आर्जवम् ॥**[२]
**अहिंसा सत्यमक्रोधः त्यागश्शान्तिरपैशुनम् ।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥**[३]
**तेजः क्षमा धृतिः शौचम् अद्रोहो नातिमानिता ।**

---

[१] भगवद्गीता- ३.२१.

[२] भगवद्गीता- १६.१.

[३] भगवद्गीता- १६.२.

**भवन्ति सम्पदं दैवीम् अभिजातस्य भारत ॥**[1]

भयाभावः अभयमित्युच्यते । अन्तःकरणस्य सम्पूर्णनैर्मल्यं सत्त्वसंशुद्धिरिति पदेन कथ्यते । तत्त्वज्ञानाय ध्यानयोगे निरन्तरस्थितिरेव ज्ञानयोगव्यवस्थितिरिति अभिधीयते । दानं त्रिविधं सात्त्विकं राजसं तामसञ्चेति । अत्र सात्त्विकं दानं विवक्षितमस्ति । दानप्रदानमेव कर्तव्यमस्ति । अनेन दानप्रदानकर्तव्यभावेन प्रत्युपकारमनपेक्ष्य यः देशकालपात्रं मनसि निधाय ददाति तद्दानं सात्त्विकमिति गीताचार्येण प्रत्यपादि यथा –

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥**[2]

इन्द्रियाणां नियन्त्रणमेव दमनमित्यभिहितम् । भगवतः गुरुजनानाञ्च पूजाकरणमेव यज्ञ इति कथितम् । यज् धातुः देवपूजासङ्गतिकरणदानेषु अर्थेषु विद्यते । अतः पूजादिकरणमभिहितमत्र । अग्निहोत्रादि उत्तमकर्मणां समाचरणमित्यर्थः । वेदशास्त्रादीनां पठनं पाठनं च स्वाध्यायशब्देन कथ्यते । निरन्तरं भगवतः नामसङ्कीर्तनं गुणसङ्कीर्तनमेव तप इति निगद्यते । स्वधर्मपरिपालनाय कष्टं सोढ्वा कर्तव्यकरणमेव आर्जवमिति प्रोच्यते । मनसा वाचा कर्मणा च अन्येभ्यः अहिताचरणं न क्रियते चेत् सा अहिंसा इति उच्यते । यथार्थभाषणं प्रियभाषणं वा सत्यमिति कथ्यते । आत्मनः कृते कश्चित् अपकारं कृतवान् चेदपि तदुपरि कोपराहित्यप्रकटनमेव अक्रोधः इत्युच्यते । कर्मसु कर्तृत्वस्याभिमानं त्यागः । अन्तःकरणेषु चाञ्चल्यराहित्यं शान्तिः । कस्यापि न निन्दनमेव अपैशुनम् । सर्वेषु प्राणिषु कारणरहितदयाभावः, विषयैस्सह इन्द्रियाणां संयोगे सति तेषु अनासक्तिः, कोमलभावः, लोकविरुद्धकर्मसु शास्त्रविरुद्धकर्मसु च लज्जा व्यर्थचेष्टायाः अभावश्च अत्र प्रोक्ताः । तेजः क्षमादयः दैवीसम्पदः प्रभावेण जातस्य पुरषस्य लक्षणानि प्रोक्तानि ।

अस्माकं प्राचीनाः ग्रन्थाः सर्वेपि मूल्यैः एव संविलितास्सन्ति । मूल्यानि कुत्र सन्तीति तेषु अन्वेषणीयानि न भवन्ति । अस्माकं भगवद्गीता, उपनिषदः, वेदाः, काव्यानि, रामायणं, महाभारतम् इत्यादयः ग्रन्थाः मूल्यशिक्षामेव उपदिशन्ति । तेषाम् उदाहरणानि

---

[1] भगवद्गीता- १६.३.

[2] भगवद्गीता- १७.२०

कानिचन परिशीलयामश्चेत् ज्ञायते । 'मा गृधः कस्यस्विद्धनम्'[१] इति ईशावास्योपनिषदः वाक्यमस्ति । कस्यापि अन्यस्य धनस्य विषये आशां न करोतु । धनं वस्तु द्रव्यमाभरणं वा भवतु 'परद्रव्येषु लोष्ठवत्' इति भावः भवेत् इति अभिप्रायः । 'न वित्तेन तर्पणीयो मनष्यः'[२] धनं कदापि मनुष्यं न तोषयति । अतः धनमेव जीवनं नास्ति । धर्माचरणाय परिवारपोषणाय च धनमर्जनीयम् । यदि धनाशा महती भवति तेन आत्मनः सन्तोषः न भवति । यतोहि आशायाः आन्तं नास्ति । अतः धनार्जनेनैव तृप्तिर्नभवति मनुष्यस्य ।

**सत्येन लभ्यस्तपसा ह्येयेष आत्मा ।**
**सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ॥**[३]

सत्यं तपः ज्ञानं ब्रह्मचर्यञ्च यः प्रत्यहं सेवते सः अवश्यं जीवनस्य सार्थक्यं प्राप्नोति इति आशयः ।

सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ।[४]

आहत्य मूल्यं नाम नैतिकव्यवहारस्याचारसंहितानां मानेन मापितं भवति, यच्च संस्कृतेः निष्पन्नं परम्परया सम्पोषितम् अन्तःकरणेन संरक्षितञ्च भवति । सर्वोत्तमजीवनशैली इति शक्यं वक्तुम् ।

जान् जे. काणे महोदयः कथयति – मूल्यं ते आदर्शाः विश्वासाः मानकानि वा मन्यन्ते येषां समाजेन वा समाजस्य अधिकांशसदस्यैर्वा आत्मसात्क्रियते" ।

केषाञ्चित् मूल्यानां राष्ट्रिय-शैक्षिक-अनुसन्धानम् एवं प्रशिक्षणपरिषदा 1970 तमे वर्षे एकस्यां गोष्ठ्यां महत्त्वमङ्गीकृत्य तेषां विकासाय उपोद्बलकं दत्तम् । तानि मूल्यानि निम्नोक्तानि सन्ति ।

1. श्रमस्य महत्त्वम्
2. सामाजिकजागरूकतायाः उत्तरदायित्वस्य भावनानां विकासः

---

[१] ईशावास्योपनिषत् - १
[२] कठोपनिषत् – १-२७
[३] मुण्डकोपनिषत् – ३-१-५
[४] तैत्तिरीयोपनिषत्. शि. – ११-१

3. परधर्मसहिष्णुता
4. निर्भयता
5. सत्यवादिता
6. पवित्रता
7. सेवा
8. अहिंसा

एवं विधानि मूल्यानि महत्वपूर्णानि वर्तन्ते, तेषामनादरः मानवसभ्यतयोः विनाशाय कल्पते ।

परिशीलितग्रन्थाः –


1. साहित्यदर्पणः, विश्वनाथः ।
2. शिक्षायाः सामाजिकाधारः, सच्चिदानन्दः ए.पि.
3. भगवद्गीता
4. मन्त्रमन्दारः, शेषगिरिभट्टः, गुञ्जगोड
5. Human Value in Vedas and Upanishats, Dr.S.Ramasvami and Vidwan S.Rajagopala Sharma
6. मनुस्मृतिः

# संस्कृतशिक्षणस्य सामान्यानि उद्देश्यानि महत्त्वं च

डा. गणेश ति. पण्डितः
सहायकाचार्यः, शिक्षाशास्त्रविभागः

अथ **जन्तूनां नरजन्मदुर्लभम्** इति वाक्यं विदितमेव समेषां विदुषाम्। नरजन्मप्राप्तवतां भूषणं तु विद्यैव। विद्यायाः सङ्क्रान्तिस्तु भाषामाध्यमेन एव सम्भवति। न केवलं विद्यायाः सङ्क्रान्तये अपि तु संसारस्यास्य सर्वविधक्रियाकलापानां सङ्क्रान्तये मूलभूता भाषैका अपेक्ष्यत एव। तत्र हि भारतस्य मूलभूता भाषा नाम संस्कृतभाषैव। भारतीयभाषासु मूलभाषा (Root Language) इति प्रकीर्तिता भाषा अपि संस्कृतभाषा एव। एवमेतस्याः भाषायाः वैशिष्ट्यं व्यापकत्वं च स्वतः एव सिद्ध्यति। विशिष्टायाः व्यापिकायाश्च संस्कृतभाषायाः शिक्षणमपि विशिष्टमेव। एतदनु संस्कृतशिक्षणस्य सामान्यानि उद्देश्यानि अपि बहुधा सम्भवन्ति।

संस्कृतभाषाशिक्षणस्य उद्देश्यानां विज्ञानावसरे भाषायाः भाषिकपक्षः साहित्यिकपक्षश्चेति पक्षद्वयम् आदौ विज्ञेयम् अस्ति। भाषिकपक्षस्यापि पुनः रूपद्वयमस्ति ज्ञानात्मकपक्षः कौशलात्मकपक्षश्चेति। अनयोः पक्षयोः सिद्धपक्षः साध्यपक्षः इत्यपि क्रमशः नामान्तरम् अस्ति। सिद्धपक्षो नाम भाषायाः संरचनात्मकपक्षः। अयं पक्षः ध्वनिवर्णवाक्यानुच्छेदादिभिः भाषिकतत्वैः सम्बद्धः अस्ति। वर्णोच्चारणस्थानानि स्वरव्यञ्जनादीनि सन्धिसमासकारकप्रत्ययादीनि भाषिकतत्वानां मध्ये एव अन्तर्भवन्ति। अतः अमीषां भाषिकतत्त्वानां ज्ञानप्रदानं संस्कृतभाषाशिक्षणस्य सामान्योद्देश्येषु एव अन्तर्भवति। भाषायाः साध्यपक्षः नाम भाषायाः अनुप्रयोगक्षमतायाः पक्षः। भाषायाः अनुप्रयोगाय भाषाकौशलानि आत्मसात्कर्तव्यानि। व्यक्तिगतव्यवहारे सामाजिकव्यवहारे च भाषाकौशलानि प्राथम्यं भजन्ते। तत्र हि श्रवणभाषणपठनलेखनानि इति चत्वारि भाषाकौशलानि सन्ति। एतेषु चतुर्षु श्रवणपठनकौशलयोः ग्राह्यात्मककौशलम् इति नाम। भाषणलेखनयोः अभिव्यक्त्यात्मककौशलम् इति व्यवहारः। बालाः एतेषु चतुर्षु कौशलेषु दक्षाः नूनं भवेयुः। अतः भाषाकौशलेषु दक्षतासम्पादनं संस्कृतभाषाशिक्षणस्य सामान्योद्देश्येषु एव अन्तर्भवति ।

भाषायाः अपरः मुख्यपक्षो नाम साहित्यिकपक्षः। वाङ्मयपक्षः इत्यपि वक्तुं शक्यते। निर्दिष्टभाषायां निर्दिष्टरूपेण व्यक्तः भावः विचारश्च साहित्यमिति कीर्त्यते। ज्ञानराशेः सञ्चितकोषः एव साहित्यमित्यपि प्रोच्यते। साहित्यस्य अथवा साहित्यिकपक्षस्य ज्ञानात्मकं साहित्यं सौन्दर्यबोधात्मकं साहित्यमिति पुनः रूपद्वयमस्ति। ज्ञानात्मकसाहित्यं तथ्यात्मकं सूचनात्मकं च साहित्यमित्यपि कीर्त्यते। दर्शनविज्ञानवाणिज्यगणितेतिहासादयो विषयविशेषाः ज्ञानात्मकसाहित्यकोटौ अन्तर्भवन्ति।

द्वितीयस्य अर्थात् सौन्दर्यबोधात्मकस्य साहित्यस्य सर्जनात्मकसाहित्यम् ललितसाहित्यम् इति च नामान्तरम् अस्ति। गद्यपद्यनाटकाख्यायिकासङ्गीतादीनि सौन्दर्यबोधात्मककोटौ अन्तर्भवन्ति। अत्रापि ज्ञानात्मकतथ्यानि नूनमेव सन्ति। अतः एव केचन साहित्यस्य भावपक्षः कलापक्षः इति पक्षद्वयं कल्पयन्ति।मानवस्य विचाराः अनुभूतयश्च भावपक्षे पुनस्तेषामेव विचाराणां अभिव्यञ्जनपद्धतिं भाषां शैलीं च कलापक्षे निक्षिपन्ति। सङ्ग्रहेण वक्तव्यं चेत् बालेषु संस्कृतभाषायाः भाषिकपक्षस्य साहित्यिकपक्षस्य च विकाससम्पादनमेव संस्कृतशिक्षणस्य सामान्यम् उद्देश्यमस्ति ।

आधुनिकधारायां संस्कृतशिक्षणं प्राथमिके माध्यमिके उच्चे च स्तरे दीयते। सामान्यतः षष्ठ्यां सप्तम्यां अष्टम्यां च कक्ष्यायां बालाः संस्कृताध्ययनम् आरभन्ते । बाल्यावस्थायाः अन्तिमघट्टे किशोरावस्थायाः प्रारम्भघट्टे च वर्तमानाः बालाः एव अस्मिन् स्तरे दृश्यन्ते। अतः अयं स्तरः अत्यन्तं प्रधानः वर्तते। प्रत्येकस्मिन् अपि स्तरे उद्देश्यानि भिन्नानि सम्भवन्ति। क्रमशः यथा -

1. **प्राथमिकस्तरे संस्कृतशिक्षणोद्देश्यानि -**

१. संस्कृतवर्णमालायाः परिचयप्रदानं बोधनं च।

२. संस्कृतभाषायां बालानाम् अभिरुचेः संवर्धनम् ।

३. छात्रेषु सरलसंस्कृतभाषायां लिखितानां गद्यखण्डानां शुद्धतया पठनक्षमतोत्पादनम् ।

४.सरलसंस्कृतश्लोकानां शुद्धोच्चारणक्षमतोत्पादनम्।

५.नित्योपयोगिनां नीतिपूर्णानां च संस्कृतसुभाषितानां कण्ठस्थीकरणाय प्रेरणाप्रदानम्।

६. संस्कृतपाठ्यपुस्तकेषु समुल्लिखितानां पाठ्यांशानां स्वपट्टिकासु शुद्धतया लेखनक्षमतोत्पादनम् ।

७. सरलसंस्कृतेन भाषणक्षमतायाः संवर्धनम् इत्यादीनि।

**2. माध्यमिकस्तरे संस्कृतशिक्षणस्य सामान्यानि उद्देश्यानि-**

१. संस्कृतभाषायाम् आसक्त्युत्पादनम् ।

२. श्लोकानां वाक्यानां च परिशुद्धरूपेण पठनकौशलस्य विकासः।

३.छन्दोलङ्काराणां सामान्यज्ञानप्रदानपुरस्सरं तत्र छात्राणाम् अभिरुचिसम्पादनम् ।

४.भावग्रहणाभिव्यञ्जनकौशलयोः उद्विकाससम्पादनम्

५. विभिन्नगद्यप्रकाराणां परिचयप्रदानाम्।

६.आध्यात्मिकभौतिकजगतोः सामान्यपरिचयप्रदानम् ।

७.नीतिश्लोकानां सुभाषितानां कण्ठस्थीकरणाय प्रेरणाप्रदानम्।

८.मातृभाषातः संस्कृतेन पुनः संस्कृततः प्रादेशिकभाषायां मातृभाषायां वा अनुवादार्थं प्रचोदनम्।

९.वाङ्मयमुखेन रसानुभूतिसम्पादनम् ।

१०. माध्यमिकस्तरीयबालानां कल्पनाशक्तेः सर्जनात्मकशक्तेश्च विकासः इत्यादीनि।

**3. उच्चस्तरे संस्कृतशिक्षणस्य सामान्यानि उद्देश्यानि यथा -**

१. संस्कृतभाषायां विशेषाभिरुचेः संवर्धनं पोषणञ्च ।

२. स्पष्टतया संस्कृतवाङ्मयस्थानां भावानां ग्रहणाभिव्यञ्जनाय अपेक्षितस्य कौशलस्य विकासः।

३.संस्कृतवाङ्मयस्थानां विभिन्नप्रकारकाणां गद्यपद्यरूपकाणां मध्ये विद्यमानयोः गुणवैषम्ययोः ज्ञानप्रदानम् ।

४.कथाकविताप्रबन्धादीनां लेखनप्रवृत्तेः प्रोत्साहनम्।

५. रसध्वनिवृत्त्यादीनां तत्त्वानां विभेदज्ञानसंवर्धनम् ।

६.छात्राणां समीक्षात्मकप्रवृत्तेः विमर्शात्मकशक्तेश्च जागरणम्।

७.बालेषु शोधप्रवृत्तेराविर्भावाय अपेक्षितस्य वातावरणस्य सर्जनम्।

८. भाषात्रये अनुवादसामर्थ्यसम्पादनम्।

९. सन्ततं सरलसंस्कृतेन सम्भाषणाय प्रचोदनम् ।

१०. ग्रन्थकर्तुः कवेर्वा भावावगमनपुरस्सरं स्वतन्त्रचिन्तनशक्तेः उद्विकासाय साहाय्यकरणम् ।

११. संस्कृतेन निबद्धानां वेदेतिहासपुराणकाव्यकथादिषु पठनप्रवृत्तेः विकासः।

१२. विविधशास्त्राणां सामान्यपरिचयदानम् इत्यादीनि ।

यद्यपि इतोऽपि अनल्पानि उद्देश्यानि सन्ति संस्कृतवाङ्मयस्य तथापि दिङ्मात्रमिह उल्लिखितम्। शिष्टानि पाठकैः स्वयमपि ऊहयितुं शक्यानि ।

संस्कृतशिक्षणम् यथा आधुनिकधारायां प्रवर्तते तथा परम्परागतधारायामपि प्रवर्तते एव। परमपुरुषार्थस्य मोक्षस्य वा विचारः अत्र शिक्षणे सहजतया परिदृश्यन्ते।

एवं संस्कृतशिक्षणस्य स्तरानुरूपाणि वयोनुरूपाणि देशाचारानुरूपाणि च उद्देश्यानि बहूनि सन्ति इति शिवम् ।

## परिशीलितग्रन्थसूची

१. प्रौढरचनानुवादकौमुदी - २०१८(२३) डा.कपिलद्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी

२. संस्कृतवाङ्मय का इतिहास - १९६७ (०७) श्री बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान, लखनऊ

३.संस्कृतशिक्षणम् -२०११(०१) डा. उदय शङ्कर झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी

४. हिन्दी शिक्षण -२०२० (१३) , निरंजन कुमार सिंह, राजस्थान हिन्दी अकादमी, जयपुर

५. संस्कूत शिक्षण - २०११ (संशोधित) रामशकल पाण्डेय, श्री विनोद पुस्तक मन्दिर, आगरा

# सूक्ष्मशिक्षणे प्रश्नकौशलम्

**डा. दयानिधि शर्मा**

सहायकाचार्यः, शिक्षाविभागः

शिक्षणाधिगमप्रक्रियायां वैज्ञानिकप्रविधेः महत्त्वपूर्णं स्थानं वर्तते । ज्ञानस्य प्रसारः क्रियात्मकरूपेण अस्मिन् युगे उत्तमरीत्या भवेत् । अनेन सह रुचिकरं शिक्षणं तु छात्राणां विषयबोधनार्थम् आवश्यकं वर्तते । युगेन सह बहूनि परिवर्तनानि सर्वत्र अद्यत्वे दृश्यन्ते । एतानि परिवर्तनानि शिक्षाक्षेत्रे अपि समागतानि । पारम्परिकशिक्षणपद्धतिः बहुकालात् आरभ्य शिक्षाजगति प्रवर्तते । आधुनिकशिक्षणपद्धतौ बहवः विषयाः सन्ति । तेषु 'सूक्ष्मशिक्षणम्' इति एका महत्त्वपूर्णा पद्धतिः इति अङ्गीकृता । शिक्षाक्षेत्रे आधुनिककाले अयं प्रमुखः उपकारकः शिक्षणविषयः प्रविधिरूपेण मतः । शिक्षणं रुचिकरं कर्तुं साम्प्रतिके काले शिक्षाशास्त्रविशारदैः अयं महत्त्वपूर्णः उपायः कल्पितः ।

**सूक्ष्मशिक्षणस्य अर्थः** (Meaning of Microteaching)

सूक्ष्मशिक्षणम् एकः शिक्षकप्रशिक्षणप्रविधिः (Teacher Training Technique) वर्तते । एतस्य अनुप्रयोगः शिक्षणे वैशिष्ट्यम् आनेतुं भवति । एतादृशं शिक्षणं प्रत्येकं कौशले नियन्त्रिताभ्यासाय महत्त्वपूर्णं वर्तते । अस्मिन् प्रसङ्गे एलनईवमहोदयौ इत्थं भणतः " सूक्ष्मशिक्षणं कश्चन नियन्त्रितकार्याणां समूहः वर्तते यः कस्मिन् अपि निश्चिते व्यवहारे बलं प्रदर्शयति तथा च नियन्त्रितपरिस्थितिषु शिक्षणाभ्यासं दिशति "। एतत् शिक्षणं शिक्षणाभ्यासस्य पूर्वकार्यक्रमः विद्यते ।

**सूक्ष्मशिक्षणस्य संक्षिप्तेतिहासः** (Brief History of Microteaching)

स्टेनफोर्ड ग्रेजुएट् स्कूल् ऑफ़ एजूकेशन् इत्यस्य प्रोफेसर ड्वाइट एलन (Dwight Allen) महोदयः एतस्य सहकर्मिणश्च मिलित्वा सूक्ष्मशिक्षणस्य आरम्भं कृतवन्तः । 1968 तमे वर्षे एतस्य सम्प्रत्ययस्य मूर्तरूपम् अमेरिकादेशे अवलोकितम् । अध्यापनस्य जटिलत्वं न्यूनीकर्तुम् अयं सम्प्रत्ययः बहु उपयोगी मतः । प्रो. एलनमहोदयेन सह डा. बुश, एचीसन् , हेरी गेरीसन् , क्लेन् वेश् , गुडकाइण्ड् , कालनवेच् महोदयश्च एनं प्रविधिं विस्तृतक्षेत्रं प्रति नीतवन्तः । भारतदेशे अयं प्रविधिः शोधकार्याय 1970 तमे वर्षे व्यवहारे समागतः ।

अस्मिन् क्षेत्रे विविधशिक्षणसंस्थासु विश्वविद्यालयेषु च यत्नः सञ्जातः । बहुभिः शिक्षाविद्भिः अपि अस्मिन् क्षेत्रे कार्यं कृतम् । विशिष्टरूपेण सेण्टर फार एडवांस्ड स्टडी इन एजूकेशन् महाराजा सयाजी विश्वविद्यालयः बडौदा इत्यस्य डा. बी. के. पासीवर्यः महत्त्वपूर्णः वर्तते तेन सूक्ष्मशिक्षणविषये बहुकार्यं कृतमस्ति । कालान्तरे पासीवर्यः देवी-अहिल्याविश्वविद्यालयस्य शिक्षासङ्कायप्रमुखः सञ्जातः । इतोऽपि चण्डीगढ-मद्रास-कलकत्तादिषु सूक्ष्मशिक्षणविषये बहुकार्यं (शुक्ल. 1986) सञ्जातम् ।

**सूक्ष्मशिक्षणस्य सोपानानि** (Steps of Microteaching)

- एकस्मिन् समये सूक्ष्मशिक्षणं प्रत्येकं कौशले नैपुण्यं विकासयति (Develops mastery of one teaching skill at a time)
- लघुः विषयः (Small topic)
- शिक्षणसमयः : 5 निमेषाः (Teaching Time : 5 Minutes)
- कक्षायाः आकारः : 10 - 12 छात्राः, एकः पर्यवेक्षकश्च । (Class Size 10 -12 peers and a supervisor) छात्राः उपयुक्तरीत्या कुर्वन्तः सन्ति न वा इति सः पर्यवेक्षकः द्रक्ष्यति । (Correctly doing or not he/she will see)
- प्रस्तुतीकरणस्य रिकार्डिंग (Recording of the presentation)
- प्रतिपुष्टिः - छात्रैः पर्यवेक्षकेण च ( Feedback given by students and supervisor)

**प्रक्रिया** (Process)

सूक्ष्मशिक्षणस्य प्रक्रिया एव सूक्ष्मशिक्षणम् अवगन्तुं साहाय्यमाचरति । अस्मिन् क्रमे सूक्ष्मशिक्षणस्य प्रक्रिया अधोलिखिता वर्तते ;

(1) **स्पष्टीकरणं प्रदर्शनञ्च** (Explaination and Demo)

शिक्षकप्रशिक्षकः (Teacher Educator) अत्र छात्राणां/छात्राध्यापकानां (Trainee-Teachers) कृते सूक्ष्मशिक्षणस्य एकं सूक्ष्मपाठं प्रदर्शयति । सः / सा पाठस्य विषयमपि स्पष्टीकरोति ।

(2) **योजना , कार्यान्वयं प्रतिपुष्टिः च** (Planning, Execution and Feedback)

छात्राः / छात्राध्यापकाः सर्वप्रथमम् एकस्य सूक्ष्मपाठस्य योजनां सज्जीकुर्वन्ति । तदनन्तरेषु पञ्चनिमेशेषु ते पाठस्य कार्यान्वयनं कुर्वन्ति । अस्मिन् काले सहाध्यायिनः एकः पर्यवेक्षकश्च कक्ष्यायाम् उपस्थिताः भवन्ति । पश्चात् परस्परं सर्वे चर्चां कुर्वन्ति , प्रतिपुष्टिं च यच्छन्ति । प्रत्येकं कौशले इयमेव प्रक्रिया भवति ।

(3) पुनःकरणं निरन्तरता च (Re-doing and Continuing)

अत्र पुनः योजनानिर्माणं (Re-plan) पुनः चर्चा (Re-discussion) तथा च प्रतिपुष्टिः (Feedback) एते त्रयः अंशाः अन्तर्भवन्ति । यावत् पर्यन्तं छात्रः/छात्राध्यापकः (Trainee Teacher) पारङ्गतः (Master) न भवति तावत् पर्यन्तम् अयं क्रमः वारं वारम् अनुस्त्रियते ।

**सूक्ष्मशिक्षणस्य प्रक्रियायाः चक्रम्** (Cycle Process of Microteaching)

भारतदेशे प्राविधिकक्षेत्रे बहु विकासः सञ्जातः । परन्तु , उच्चशिक्षायाः गुणवत्ताविषये तु न्यूनताः एव दृश्यन्ते । बहवः महाविद्यालयाः उच्चशिक्षायाः विकासाय केवलं मात्रात्मकं विकासमेव (सम्पा. अग्रवाल , ले. एफ. जी. अल्टबाख , 2018) कुर्वन्ति स्वीकुर्वन्ति च । तत्र शिक्षणविधिषु अपि नूतनाः प्रयोगाः न दृश्यन्ते । आधुनिकप्रयोगाः तु न सन्ति एव । पाठ्यक्रमे आधारभूतः स्तरः नास्ति । अयं सूक्ष्मशिक्षणक्रमः अपि एलनमहोदयानाम् अवदानमेव । तेषां महोदयानां सूक्ष्मशिक्षणस्य प्रक्रियायाः चक्रम् इत्थं वर्तते ;



**सूक्ष्मशिक्षणस्य आवश्यकता** (Need of Microteaching)

सूक्ष्मशिक्षणस्य अद्यत्वे महती आवश्यकता वर्तते । आवश्यकताः बिन्दुरूपेण अत्र प्रदर्श्यन्ते ;

- वास्तविककक्ष्यायां व्यापकशिक्षणं कर्तुं तत्परः (Ready to teach Macro-lesson in Actual Class)
- शिक्षणे आत्मविश्वासवृद्धिः उत्साहवृद्धिश्च (Develops Enthusiasm and Confidence to Teach)
- प्रत्येकं शिक्षणकौशले नैपुण्यं / पारङ्गत्वम् (Mastery of each Teaching Skill)

**कौशलानि** (Skills)

सूक्ष्मशिक्षणे बहूनि कौशलानि वर्तन्ते तेषु विन्यास-प्रेरणं , विषयप्रस्तावनकौशलं (Set Induction Skill), प्रश्नकौशलम् (Questioning Skill), श्यामपट्टकौशलं (Black Board Skill), पुनर्बलनकौशलं (Skill of Re-inforcement), व्याख्याकौशलम् उदाहरणकौशलञ्च प्रमुखानि विद्यन्ते । पासीमहोदयेन 'बिकमिंग बेटर टीचर, माइक्रोटीचिंग अप्रोच' इति ग्रन्थे 13 कौशलानि (पाल, 2015) वर्णितानि सन्ति । तेषु अनुदेशनोद्देश्यलेखनं , पाठपरिचयः , प्रश्नसहजता , अन्वेषणप्रश्नः , व्याख्या , दृष्टान्तकला , उद्दीपनपरिवर्तनम् , अशाब्दिकसङ्केताः , पुनर्बलनं , छात्राणां सहभागिता , श्यामपट्टलेखनं , पाठसमापनं , छात्रव्यवहारप्रत्यभिज्ञानञ्च महत्त्वपूर्णानि कौशलानि वर्तन्ते ।

**प्रश्नकौशलम्** (Skill of Questioning)

'राष्ट्रियशिक्षानीतिः' स्पष्टरूपेण भणति यत् शिक्षकशिक्षायाः (Teacher Education) क्षेत्रे आवश्यकं परिवर्तनम् आनेतव्यम् । अस्मिन् विषये उच्चतरगुणवत्तासामग्री वर्धनीया , अनेन सह शिक्षणशास्त्रे प्रशिक्षणस्यापि महती आवश्यकता अनुभूयते । इयं शिक्षकशिक्षा शनैः शनैः 2030 पर्यन्तं बहुविषयकमहाविद्यालयेषु विश्वविद्यालयेषु च सम्मिलिता भविष्यति । तत्रापि 5.24 बिन्दौ शिक्षणशास्त्रे शैक्षिकप्रौद्योगिक्यः प्रयोगः (राष्ट्रियशिक्षानीतिः 2020, पृ० 36) विशिष्टरूपेण निर्दिष्टः । तत्फलेन शिक्षणक्षेत्रे आधुनिकविधीनां प्रयोगः श्लाघनीयः वर्तते ।

उपर्युक्तक्रमेण शैक्षिकप्रविधेः प्रयोगस्तु अवश्यमेव करणीयः । अस्मिन् प्रसङ्गे सूक्ष्मशिक्षणस्य बहूनि कौशलानि कक्ष्याशिक्षणे उपयुक्तानि सन्ति । अत्र प्रश्नकौशलस्य विषयः प्रतिपादनीयः विद्यते । सूक्ष्मशिक्षणे प्रश्नकौशलस्य बहवः अंशाः भवन्ति । तेषां सर्वेषाम् अंशानां परिज्ञानं शिक्षकप्रशिक्षकस्य (Teacher Educator) कृते भवेत् । यदा छात्राध्यापकस्य (Trainee Teacher) अवधानम् आक्रष्टुं यत्नाः क्रियन्ते तदा शिक्षणप्रक्रियायां प्रश्नकौशलस्य (शर्मा , 1992) आवश्यकता भवति ।

**प्रश्नकौशलस्य प्रक्रिया (Process of Questioning Skill)**

यस्मिन् वाक्ये प्रश्नवाचकं रूपं भवति तदेव प्रश्नः इति उच्यते । प्रश्नकरणं सफलसम्प्रेषणस्य मुख्यः आधारः वर्तते ।

A question is any sentence which has an interrogative form. Questioning is fundamental to successful communication. It is the key to gain more information in the teaching-learning process.

**प्रश्नकरणस्य प्रयोजनम् (Purpose of Questioning)**

प्रश्नकरणस्य प्रयोजनम् इत्थं वर्तते ;

* छात्राणां भागग्रहणार्थम् (For the Participation of Students)
* समीक्षात्मकरूपेण सक्रियरूपेण विचारार्थं छात्राणाम् उत्साहवर्धनम् (To encourage students to think critically and creatively)
* छात्रेषु जिज्ञासायाः रुचेश्च विकासार्थम् (To develop interest and curiosity)
* 'छात्राः विषयवस्तु अवगच्छन्ति' इत्यस्य परिज्ञानार्थम् (To know the students understanding about content)
* छात्राणाम् अवधानस्थिरीकरणम् (To maintain concentration of students)

**प्रश्नानां प्रकाराः (Types of Questions)**

सूक्ष्मशिक्षणे प्रश्नकौशले प्रश्नानां प्रकाराः अधोलिखिताः वर्तन्ते ;

(1) तथ्यात्मकप्रश्नाः (Factual Questions)

एतादृशप्रश्नाः पूर्णतः तथ्येषु आधारिताः भवन्ति । यथा 'स्वतन्त्रतायाः प्राक् देशे कः शासनं कृतवान् ? अयं प्रश्नः स्मृति-आधारितः (Memory Based) विद्यते ।

(2) बद्ध-अवसिताः प्रश्नाः (Closed-ended Questions)

एतेषां प्रश्नानां व्याख्यानं / विश्लेषणं (Explain) न भवति । केवलं समीचीनं (Yes) असमीचीनम् (No) इत्येव उत्तरं / समाधानं भवति ।

(3) मुक्त-अवसिताः प्रश्नाः (Open-ended Questions)

अत्र छात्रः व्यनक्ति (Express), पुनश्च कारणसम्बद्धान् अंशान् वदति । कथं (How), किमर्थं (Why) चेति ।

(4) निम्नस्तरीयप्रश्नाः (Lower order Questions)

एतेषां प्रश्नानां समाधानार्थं न्यूनः संज्ञानात्मकस्तरः (Requires less cognitive level) एव पर्याप्तम् । एते प्रश्नाः ज्ञानाधारिताः (Knowledge Based) अवबोध-आधारिताश्च (Understanding Based) भवन्ति । स्मरणक्षमतायाः (Ability of Memory) परीक्षणार्थम् एतादृशाः प्रश्नाः आवश्यकाः । उदाहरणार्थम् : 'ताजमहल्' कुत्र स्थितम् ? (Where is Tajmahal Situated?)

(5) उच्चस्तरीयप्रश्नाः (Higher order Questions)

उच्चस्तरीयप्रश्नानां कृते समीक्षात्मकं चिन्तनं (Critical Thinking) सर्जनात्मकं चिन्तनं (Creative Thinking) च सर्वदा भाव्यम् ।

(6) मर्म्मान्वेषणप्रश्नाः (Probing Questions)

प्रश्नस्य इयं प्रक्रिया छात्रं विषयस्य मर्म्मान्वेषणं प्रति प्रेरयति । अत्र प्रश्नं पृष्ट्वा अध्यापकः प्रश्नस्य उत्तरं न वदति परन्तु उत्तरं प्रति छात्रं प्रेरयति । प्रश्नस्य सरलीकरणं कृत्वा अध्यापकः छात्रं दिशति ।

**अध्यापकस्य अपेक्षितः व्यवहारः (Desirable Behaviour of a Teacher)**

प्रभावपूर्णरूपेण प्रश्नान् प्रष्टुं शिक्षकः बहून् उपायान् विविधग्रन्थानाम् अध्ययनं च कुर्यात् । अस्मिन् विषये ठाकुर श्याम नारायण कॉलेज ऑफ एजूकेश एण्ड रिसर्च, बोम्बई इत्यस्याः संस्थायाः शिक्षाविभागीया प्रोफेसर् अंजूचपलोत महोदया एवं वदति यत् अस्माभिः

अत्र प्रोफेसर् मार्टरमहोदयस्य एप्पल (APPLE) इति सङ्केतमाध्यमेन प्रश्नकरणस्य विषये विचारः करणीयः । यथा ;

A – प्रश्नकरणम् (Ask Question) - पाठनात् पूर्वमेव प्रश्नाः शिक्षकेण सज्जीकरणीयाः (Questions should be prepared in advance by Teacher)

P – विरामः (Pause) - प्रश्नानां समाधानं दातुं छात्राणां कृते किञ्चित् समयः दातव्यः (Give learner 3/5 seconds to think about question to respond)

P – ग्रहणम् (Pick) - छात्राणां नाम ग्रहीत्वा प्रश्नाः प्रष्टव्याः । छात्राणां पूर्णा उपस्थितिः कक्ष्यायां पाठनावसरे अवश्यमेव भवेत् । (Pick the learner by calling his/her name to answer the question. Make sure 100% participation of the Students)

L – श्रवणम् (Listen) - छात्रेण प्रदत्तम् उत्तरं सावधानेन श्रोतव्यम् । अस्मिन् समये छात्रेण सह नेत्र-सम्पर्कः साधनीयः । अग्रे प्रेरयितुम् उत्साहवर्धनार्थं किञ्चित् वक्तव्यम् । (Listen to the answer given by Student, have eye contact with the learner and use encouraging remarks)

E – निरूपणं / स्पष्टीकरणम् (Expound) - यदा छात्रस्य उत्तरम् अनुपयुक्तं वर्तते तदा अन्येभ्यः छात्रेभ्यः प्रश्नः दातव्यः । तदानीमेव स्पष्टीकरणं कृत्वा छात्रः बोधनीयः । अध्यापकेन उत्तरं न वक्तव्यम् । पुनः पुनः प्रेरयित्वा उत्तरं प्राप्तव्यम् । (Generate a dialogue based on the learner's response. If the learner's response was incorrect, redirect the question back to other learners)

**अध्यापकस्य अनपेक्षितः व्यवहारः (Undesirable Behaviour of Teacher)**

प्रश्नकरणे अध्यापकस्य अनपेक्षितः व्यवहारः सर्वदा त्याज्यः । अत्र अधोलिखिताः अवधेयाः अंशाः वर्तन्ते ;

❋ अनुपयुक्ता भाषा न भवेत् (पुरोहित, व्यास एवं शर्मा, 2013)

उदाहरणानि : (1) भवान् कुत्र निवसति ? (x)

भवान् कस्मिन् नगरे निवसति ? √

(2) Who teaches mathematics ? (x)

Who teaches you mathematics ? √

❋ आम् (Yes) न (No) इति प्रकारकाः प्रश्नाः न भवेयुः ।

Is this a Pencil ?

किम् इदम् एकं पुस्तकम् अस्ति ?

❋ ऊह्यः प्रश्नः (Elliptical Question) न भवेत् । यथा ;

भवतः पितुः नाम ....................

Your father's name is.................

❋ प्रतिध्वनिः प्रश्नः (Echo Question) न करणीयः । यथा ;

गान्धीवर्यस्य विषये बोधयति तदानीमेव पृच्छति 'गान्धीवर्यः कः आसीत् ? (Teacher explains about Gandhiji and immediately asks, who was Gandhiji ?)

❋ बहुविचारप्रश्नाः (Double barrelled Questions) न भवेयुः । विचारद्वयं यत्र प्रवर्तते तादृशः प्रश्नः बहुविचारप्रश्नः । (Question having more than one thought) मक्षिका कान् रोगान् कथं प्रसारयति ?

❋ सन्दिग्धार्थः प्रश्नः (Ambiguous Question)। अस्पष्टः सन्दिग्धश्च प्रश्नः न भवेत् । एतादृशाः प्रश्नाः विषयवस्तुसम्बद्धाः न भवन्ति । इमे प्रश्नाः त्याज्याः सन्ति ।

**सूक्ष्मशिक्षणकौशलम् (Microteaching Skill)**

प्रश्नकौशलस्य पाठ-योजना (Lesson Plan of Skill of Questioning)

| | |
|---|---|
| नाम : | दिनाङ्कः: |
| Name : | Date : |
| विषयः : | प्रकरणम् : |
| Subject : | Topic : |

(1) संस्कृतसाहित्ये कविकुलगुरुः कः वर्तते ?

(2) कालिदासस्य ग्रन्थाः के सन्ति ?

(3) शकुन्तलायाः वर्णनं कस्मिन् ग्रन्थे वर्तते ?

(4) वृक्षाणां नवपल्लवेषु तस्याः प्रीतिः कीदृशी ?

(5) कालिदासस्य प्रकृतिचित्रणस्य किं वैशिष्ट्यम् ?

(6) कालिदास्यस्य ग्रन्थेषु वर्णितस्य पर्यावरणस्य महत्त्वं निरूपयत ।

(7) इतरकाव्यग्रन्थेन सह कालिदासस्य कस्यापि एकस्य काव्यग्रन्थस्य पर्यावरणविषये तौलनिकम् अध्ययनं कुरुत ।

(8) पाश्चात्यकाव्यग्रन्थानामपेक्षया कालिदासस्य काव्यानां पर्यावरणविषये किं वैशिष्ट्यम् ?

(9) पर्यावरणजागरूकतायाः विषये कालिदासस्य ग्रन्थानां छात्रसमूहे चर्चां कुरुत ।

(10) विविधकाव्यग्रन्थेषु प्रणीतानां प्राकृतिकतत्त्वानां मानवजीवनेन सह कः सम्बन्धः ? विमृशत ।

(अध्यापकः छात्राणां कृते किञ्चित् समयं पुनर्बलनं च यच्छति : Teacher takes appropriate pause for the Students to answer and also reinforces the Students)

**सन्दर्भाः (References) :**


1. अग्रवाल, पवन (सम्पा.)(2018). भारतीय उच्च शिक्षा के पाँच दशक, फ़िलिप जी. अल्ट्बाख़ के निबंधों का संकलन , 'उच्च शिक्षा एवं आधुनिकीकरण : भारत का मामला, सेज : नई दिल्ली, पृ० 35 – 49

2. उपाध्याय, आर. वशिष्ठ, एस ; सिंह, एच. (1992). संस्कृत एवं सूक्ष्म शिक्षण प्राविधिकी, भारतीय विद्या संस्थान : वाराणसी, पृ० 152 – 189

3. पाल, हंसराज (2015). उच्च शिक्षा में अध्यापन एवं प्रशिक्षण की प्रविधियाँ, हिंदी माध्यम कार्यन्वयन निदेशालय : दिल्ली विशविद्यालय, पृ० 94 – 97

4. पुरोहित, जे., व्यास, एच., शर्मा, एम-एम. (2013). भावी शिक्षकों के लिए आधारभूत कार्यक्रम, राजस्थान हिंदी ग्रन्थ अकादमी : जयपुर, पृ० 224 – 236

5. राष्ट्रीय शिक्षा नीति (2020). 5.22, 5.24 शिक्षक शिक्षा का दृष्टिकोण, पृ० 36

6. शर्मा, ए. आर. (1992). एजूकेशनल टेक्नॉलॉजी, विनोद पुस्तक मंदिर : आगरा, पृ० 115 – 116

7. शुक्ल, एन. एन. (1986). शिक्षक प्रशिक्षण में महत्त्वपूर्ण तकनीकी – सूक्ष्म अध्यापन, शैक्षिक तकनीकी विशेषांक-2, पृ० 51 – 57

8. https://youtu.be/8kJXEi9sOyI

# अनुरूपितशिक्षणम्

**डा.नारायणवैद्यः**
सहायकाचार्यः, शिक्षाविभागः

नित्यं कक्ष्यायां अध्यापनावसरे छात्राध्यापकेन स्वस्य अध्यापनकौशलस्य परिवर्तनं कर्तव्यं भवति । अन्यथा छात्राः अध्यापकस्य वर्तनं स्वतः अनुकुर्वन्ति । अतः छात्राध्यापकः स्वस्य पाठनशैलीं परिवर्तयेत् । छात्राध्यापकस्य व्यवहारपरिवर्तनेन कक्ष्यायां नावीन्यमायाति । अतः कौशलानि निश्चित्य अभ्यासम् आदौ छात्राध्यापकः कुर्यात् । कौशलानाम् अभ्यासार्थं विविधाः प्रशिक्षणविधयः प्रविधिशास्त्रविशेषज्ञैः विकसिताः सन्ति । विश्वविद्यालयस्य प्रशिक्षणविभागेषु प्रशिक्षणमहाविद्यालयेषु च प्रयुक्तान् कांश्चन लोकप्रसिद्धान् विधीन् चित्रमाध्यमेन प्रदर्श्यते ।




उपर्युक्तेषु शिक्षणप्रविधिषु अनुरूपितशिक्षणम् अन्यतमम् अस्ति । किं नाम अनुरूपितशिक्षणम् ? अनुरूपितशिक्षणं शिक्षणस्य प्रशिक्षणस्य च प्रविधिः अस्ति । अनेन प्रविधिना साभिनयं छात्राध्यापकः कक्ष्यायाम् अनुभूयमानसमस्यां शिक्षकरूपेण निरीक्षकरूपेण छात्ररूपेण च भागग्रहणं कृत्वा अवगच्छति । समाधानोपायान् अपि जानाति

। अनेन शिक्षणकौशलानां विकासः अपि भवति । अस्य प्रविधेः उपयोगः छात्राध्यापकेषु अध्यापनकौशलविकासाय क्रियते ।

अनुरूपितशिक्षणे भूमिकानिर्वाहार्थम् अवसरः दीयते । भूमिकानिर्वाहार्थं कृत्रिमपरिस्थितेः निर्माणं क्रियते। भूमिकानिर्वाहेन विशिष्टसम्प्रेषणकौशलस्य विकासः जायते । कृत्रिमपरिस्थितौ एव समुचितशिक्षणानुभवान् ज्ञातुं शक्नोति । कृत्रिमाभ्यासेन स्वाभाविकव्यवहारान् अपि अधिगच्छति । अनेन अभिलषितव्यवहारपरिवर्तनं प्रष्टुं समर्थो भवति छात्राध्यापकः ।

क्रूकशैंकमहोदय: अनुरूपितशिक्षणप्रविधेः विकासमकरोत् । असौ 1968 तमे वर्षे अस्य प्रविधे: विकासमकरोत् । अस्यैव प्रविधे: भूमिकानिर्वहणं, कृत्रिमशिक्षणम्, उपचारात्मकविधिः, आगमनात्मकवैज्ञानिकविधिः इत्यादीनि अवान्तरनामानि क्रूकशैंक इत्याख्येन प्रदत्तानि । इदं शिक्षणं काल्पनिकं भवति । किन्तु सत्यस्योपरि आधारिता काचित् कृत्रिमा घटना भवति । कृत्रिमघटनायाः साहाय्येन वास्तविकं सम्मुखीकर्तुं क्षमता विकसिता भवति । अत्मबलम् अपि वर्धते अध्यापकस्य ।

एवं कक्षाशिक्षाणे भूमिकानिर्वहणमाध्यमेन अध्यापक: पाठयति चेत् छात्रेषु रुचिरुत्पद्यते । इदं कौशलं छात्र: अध्यापक: च संभूय प्रशिक्षणं विना अपि कक्षायां तत् तत्पात्रनिर्वणं कृत्वा प्रदर्शयितुं शक्नुत: ।

**अनुरूपितशिक्षणस्याभिप्रायाः**

- अनुकरणस्य समुचितरीत्या प्रतिनिधित्वं भवति यथार्थस्थितिः इति डी. जी.रायन्सवर्यः कथयति ।[१]
- यदा छात्राध्यापकाः विशिष्टानुकरणसामग्रीणाम् उपयोगं कृत्वा वांछितानुक्रियाः कुर्वन्ति तदा अनुरूपितस्थिपरिस्थितेः निर्माणं क्रियते इति विंगमहोदयः वदति ।[२]

[१] . https://wbsu.ac.in/wp-content/uploads/2020/08/Sem-4-TE-Simulated-Teaching-AM.pdf Page No - 3

[२] . https://mgkvp.ac.in/Uploads/Lectures/15/3351.pdf Page No - 4

- अनुकरणशिक्षणम् कृत्रिमरूपेण वास्तविकस्थितेः निर्माणम् अस्ति । अत्र प्रतिभागिनः स्वस्य वर्तमानस्य वा भविष्यस्य वा कार्येण सह सम्बद्धानां समस्यानां समाधानस्य अनुभवं प्राप्तुं शक्नुवन्ति इति क्रूकशैंकवर्यः निरूपयति ।[१]
- अनुकरणं नाम वास्तविकतायाः नियन्त्रितप्रतिपादनम् इति फिंकवर्यः प्रतिपादयति ।[२]

उपर्युक्तपरिभाषाणाम् अवलोकनेन ज्ञायते यत् वांछितानुक्रियाः सम्पादयितुम् अनुरूपितशिक्षणम् उपयुक्तं भवति इति । किन्तु अत्र कृत्रिमरीत्या वास्तविकस्थितेः निर्माणं कृत्वा भविष्यत्काले अध्यापनसन्दर्भे अनुभूयमानसमस्यानां समाधानाय अनुभवात्मकं ज्ञानं प्रदातुं शक्यते । अतः अनुरूपितशिक्षणे यथार्थस्य नियन्त्रितनिरूपणार्थम् अवसरः लभ्यते । अस्मिन् प्रविधौ अनुकरणस्य बलेन अध्यापनव्यवहारस्य परिष्काराय अभ्यासाय च महत्त्वं दीयते । अतः आङ्गिकाभिनय: अनुकरणम्, संवेगानां प्रकाशनं च सम्यक्तया अवगन्तुं शक्यते ।

**अनुरूपितशिक्षणस्य सोपानानि**

**प्रथमचरणम्**

**भूमिकानिर्धारणम्** - अस्मिन् चरणे छात्राध्यापकानां कृते क्रमशः शिक्षकस्य छात्रस्य पर्यवेक्षकस्य च भूमिका निश्चिता भवति । तदनु छात्राध्यापकः भूमिकानिर्वहणं करोति ।

**द्वितीयचरणम्**

**अभ्यासार्थं कौशलस्य निर्णयः** - भूमिकानिर्वहणस्य निश्चयानन्तरं कतिपयानां अध्यापनकौशलानाम् चर्चा भवति । तेषाम् अभ्यासः छात्राध्यापकैः कर्तव्यः भवति । अत्र निश्चितस्य कौशलस्य अभ्यासः करणीयः । कौशलस्य अभ्यासार्थं योजना सज्जता च क्रियते । प्रत्येकं छात्राध्यापकः स्वस्य रुचिकरं विषयं चिनोति ।

**तृतीयचरणम्**

---

[१] . https://mgkvp.ac.in/Uploads/Lectures/15/3351.pdf Page No - 4

[२]. Simulated Teaching Definition, Characteristics and Assumptions

**कार्यानुसूचिकायाः निर्माणम्** - अस्मिन् चरणे कार्यानुसूचिकायाः विवरणं निर्मितं भवति। कः प्रथमं शिक्षणम् आरभेत, पाठं कः अवलोकयिष्यति, संभाषणे कः हस्तक्षेपं करिष्यति इत्यादि ।

**चतुर्थचरणम्**

**प्रविधीनां निर्धारणम्** - अस्मिन् चरणे अवलोकनप्रक्रियायाः प्रविधीनां च निर्णयः भवति । तन्नाम कथं निरीक्षणं कर्तव्यम् ? कथं तल्लेखनीयम् ? इति । दत्तांशस्य विश्लेषणमपि क्रियते ।

**पञ्चमचरणम्**

**प्रथमस्य अभ्यासपाठस्य आयोजनम्** - प्रथमस्य अभ्याससत्रस्य कृते समयसूचिकायाः अनुसरणं भवति । अध्यापनस्य आयोजनं भवति । तदनु शिक्षकस्य शिक्षणकार्यस्य मूल्याङ्कनार्थं अवलोकनं भवति । अवलोकनस्य अनन्तरं चर्चा क्रियते । चर्चायां अध्यापनस्य निरिक्षणवेलायां अवलोकितानां गुणदोषाणां विमर्शनं भवति । अन्ते अध्यापनव्यवहारस्य परिष्कारार्थं मार्गदर्शनं दीयते ।

**षष्ठचरणम्**

**प्रक्रियायाः परिवर्तनम्** अस्मिन् चरणे विषयं भूमिकां अध्यापनकौशलं च परिवर्त्य द्वितीयम् अभ्याससत्रम् आरभ्यते । अस्मिन् अपि चरणे पूर्ववत् प्रत्येकं छात्राध्यापकः शिक्षकस्य छात्रस्य पर्यवेक्षकस्य च भूमिकां निर्वहति ।

**अनुरूपितशिक्षणे के व्यवहाराः निरीक्षणीयाः ?**

- अध्यापकस्य कथनम्
- छात्रस्य कथनम्
- मौनम्
- अध्यापकस्य अनुक्रिया
- छात्राणां अनुक्रिया

**अनुरूपितशिक्षणस्य न्यूनताः**

- अस्य प्रविधेः प्रयोगार्थं प्रस्तुतीकरणस्य आवश्यकता विद्यते । प्रस्तुतीकरणे अधिकाः छात्राध्यापकाः परिश्रमं कर्तुं न शक्नुवन्ति ।
- शिक्षणेऽस्मिन् विषयवस्तुं प्रति अवधानं केन्द्रितं न भवति ।

- प्राथमिकस्तरे शिक्षणकौशलानामभ्यास: कष्टकर: भवति।
- अस्य प्रयोग: सरलतया न भवति ।
- अस्य प्रविधे: अनुप्रयोग: समेषां विषयाणां पाठ्यक्रमस्य कृते नास्ति ।
- सर्वेऽपि अध्यापका: निरीक्षकस्य स्थानं निर्वोढुं असमर्था: भवन्ति ।
- अस्य प्रविधे: प्रयोगार्थं प्रस्तुतीकरणस्य आवश्यकता विद्यते । एतादृशप्रस्तुतीकरणे समधिका: अध्यापका: परिश्रमं कर्तुं न शक्नुवन्ति ।
- शिक्षणेऽस्मिन् विषयवस्तुं प्रति अवधानं केन्द्रितं न भवति ।

**अनुरूपितशिक्षणस्य उपयोगिता:**

- शिक्षणस्य कठिनप्रत्ययानां न्यूनीकरणं/ सरलीकरणं वा भवति ।
- शिक्षणविधिना शिक्षणसम्बद्धकठिनसमस्यानां समाधानं कर्तुं शक्यते ।
- क्रमबद्धरीत्या प्रश्नकरणक्षमताया: विकास: भवति ।
- पाठ्यवस्तुन: क्रमबद्धरूपेण उपस्थापनस्य सामर्थ्यं वर्धते ।
- शिक्षकस्य व्यवहारपरिवर्तनाय अस्य प्रविधेः उयोग: करणीयः ।
- प्रदर्शनपाठस्य स्थाने अनुकरणीयशिक्षणस्य उयोग: कर्तुं शक्यते ।
- तात्कालिकप्रतिपुष्टे: सौविध्यं लभ्यते ।
- भूमिकानिर्माणे वास्तविकस्थिते: ज्ञानं भवति ।

एवं अनुरूपितशिक्षणस्य उपयोगितायाः न्यूनतायाः च विश्लेषणेन ज्ञायते यत् कक्ष्यायाः भूमिकां यथार्थरूपेणाधिगन्तुं अनुरूपितशिक्षणप्रविधेः आवश्यकता अस्ति इति । अयं शिक्षणप्रविधिः भारते अन्यदेशेषु च अध्यापकानां वर्तनस्य परिष्कारार्थं प्रयुज्यते । अस्य प्रविधेः उपयोगं कृत्वा कक्ष्यायाः व्यवहारस्य अध्ययनं यथायथम् अभ्यस्तुं शक्यते । अनुरूपितशिक्षणे शिक्षकस्य वर्तनसम्बद्धसमस्यानां कक्ष्याप्रबन्धनस्य च अनुभवात्मकं ज्ञानं प्राप्यते ।

****

**सन्दर्भग्रन्थाः**

1. **शिक्षा तकनीकी** – डा. जे.एस. वालिया, अहम् पाल पब्लिशर्स, जालन्धर शहर, पंजाब
2. **शिक्षणस्य वैज्ञानिकाधारः**, वृन्दावनपात्रः,अनन्ताक्षरप्रकाशनम्, पुरी

3. https://en.wikipedia.org/wiki/Simulation
4. http://anwaarahmadgulzar.blogspot.com/2014/04/simulated-teaching.html
5. Simulated Teaching Definition, Characteristics and Assumptions

# समाजः एवं शिक्षाप्रशासनम्

Society and Education Administration

**डा. अरविन्दकुमार सोमदत्तः**

सहायकाचार्यः, शिक्षाविभागः

शिक्षा सामाजिक प्रक्रियाया: एक: अङ्ग:। समाजेन शिक्षा, शिक्षया समाज: प्रभावित: वर्तते। वर्तमाने काले समाजे, शिक्षायां विशेषरूपेण नूतनत्वमानेतुं प्रयत्नं कुर्वाणा: वर्तन्ते। शिक्षाया एकाऽपि समास्या स्यात् तस्या परिणाम: समाजे प्रभावित: भविष्यति। विद्यालय: समाजस्य लघुरूपं सर्वे चिन्तयन्ति। समाजे किमपि परिवर्तनं जायते चेत् परिवर्तनस्य कारणं शिक्षाया एव सिध्यति। अत: समाजस्य कृते विद्यालयस्य प्रशासनस्य विषये अध्ययनम् आवश्यकम्।

1. समुदायिककेन्द्रम् – विद्यालय: समुदायिककेन्द्ररूपेण विकसितं कर्तुं प्रयास: कर्तव्य: तदा समाजस्य विकास: विद्यालयेन, विद्यलयस्य विकास: समाजेन भवति।
2. संयोजकसमिति: – विद्यालस्य - समाजस्य सम्बन्धवृद्ध्यर्थं एका संयोजकसमिति: रचणीया तथा बालका: परिवारस्य, सामाजिकस्य कार्येषु कार्यकर्तुं रुचिं प्रदर्शयन्ति।
3. विकससमिति:१ - विद्यालयस्य विकासार्थं समाजे विद्यमान विद्वांस:, क्रियाशालिन:, अनुभवज्ञानिन: विकाससमितौ स्थित्वा संरचणां कुर्यु:।
4. विकासकार्यक्रम: - शिक्षा-प्राशासकेभ्य: विद्यालये विद्यालय – समाज विकाससम्बन्ध विशिष्टकार्यक्रमाणां अयोजनं कर्तव्यम्। पलितांशं दृष्ट्वा अन्यस्मिन् विद्यालये अपि एतादृशकार्यक्रमा: योजनीया:।
5. समाजस्य सहयोग: - विद्यालयव्यवस्था, प्रशासनकार्याणि संचालने समाज: सक्रिया प्राप्तव्या।
6. अधिकतम लाभ: - शिक्षासम्बन्धित राष्ट्रियधारायां, प्रवृत्तौ स्थानीय धारा:, प्रवृत्तयो: प्रभाव: भवति। अत: एतादृशविकासे अधिका: व्यक्तय: अभिकलाभान्विता: भवेयु:।
7. आलोचना: स्वीकार्या: - शिक्षा-प्रशासनकार्यक्रमसम्बन्धित आलोचना: श्रोतव्या: तेषु उपयोगितान् स्वीकार्या:।

8. शिक्षाया: उत्तमयोजना: - प्रशानिका: शिक्षायोजननिर्मासमये समाजाय सार्वजनिकनीतीन्, योजना: स्वीकुर्यु:। एतयो: मद्ये किं स्वीकुर्याम इति चिन्तयन्ति चेत् शिक्षाया: निमित्तं उत्तम उपयोगीत्वं येषु विद्यते तान् स्वीकुर्यु:।
9. समाजेन मान्यता – शिक्षासम्बन्धित नियमा: and law समाजेन मान्यता प्राप्तव्या:।
10. श्रेष्टविचाराण् स्वीकार्या: - प्राशानिका: समाजाय उत्तम मूल्यान्, आदर्शाचिन्तनान्, विचाराण् शिक्षायाम् आनयनार्थं प्रयासं कुर्यु:।
11. समायोजनम् – शिक्षा-प्रशासकै: यथाशक्ति: समाजेन सह समायोजनम् स्थापनीयम्। समाजस्य इच्छा: उपेक्षा न कर्तव्या।
12. रचनात्मकरूपेण कार्यम् - समाजाय रचनात्मक, सृजनात्मक, उत्तमराजनैतिकरूपेण कार्याणि स्वागतीकरणीयानि। तथा एतादृशानुसारं शिक्षाव्यवस्थायां परिवर्तनार्तमानेतु प्रयास: कर्तव्य:।
13. कार्यप्रणाल्या: परिवर्तनम् - विद्यलस्य सलहासमित्या, समाजस्य प्रतिनिधित्वसमित्या कार्यप्रणाल्या: परिवर्तनम् अवसराणुगुणं कर्तव्यम्।
14. समान अवसर: - समाजे विद्यमानेभ्य: सर्वेभ्य: शिक्षानिमित्तं समान अवसर: कल्पनार्थं प्रयास: कर्तव्य:।
15. विविध संगठनानां सम्पर्क: - समाजे विद्यमान विविध सर्वविध शक्तिस्पन्न संगठनानां सम्पर्क: प्रत्यक्षरूपेण उत परोक्षरूपेण वा शिक्षां प्राप्तुं, दातुं सम्बन्ध: स्थापनीय:।
16. मानवीय गुणा:२ - शिक्षा-प्रशासकै: स्व व्यक्तित्वमानवीयगुणानां विकासकरणार्थं प्रयास: कर्तव्य:। तदा शिक्षाप्रशासने मानवीयसम्बन्धस्य वृद्धि:,सरलता,तीव्रता अनेतव्य:।

१.शिक्षा प्रशासन् (हिन्दी) – डा. उमेशचन्द कुदेसिया page no.150

२. शिक्षा प्रशासन् (हिन्दी) – डा. उमेशचन्द कुदेसिया page no.151

ISSN : 2249-538X

केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः
शृङ्गेरी–577139